काव्यमाला २६

श्रीक्षेमेन्द्रप्रणीत

दशावतारचरितम् ।

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना पण्डित-
दुर्गाप्रसादेन, मुम्बापुरवासिना परबोपाह्व-
पाण्डुरङ्गात्मजकाशिनाथशर्मणा च
सशोधितम् ।

(द्वितीयावृत्ति)

एतत्
मुम्बय्याम्
पाण्डुरङ्ग जावजी
इत्येतै स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये मुद्रयित्वा
प्रकाशितम् ।

काव्यमाला ।

महाकविश्रीक्षेमेन्द्रप्रणीतं
दशावतारचरितम् ।

१— मत्स्यावतार प्रथम ।

अशेषविश्ववैचित्र्यरचनारुचये नम ।
मायागहनगूढाय नानारूपाय विष्णवे ॥ १ ॥

देव पायादपायान्त्रिभुवनभवनस्तम्भभूत स युष्मा-
नायुष्मान्यस्य भक्त्या प्रभवति पुरुष स्वर्गमार्गोऽपवर्गे ।
मत्स्य कूर्मो वराह पुरुषहरिवपुर्वामनो जामदग्न्य
काकुत्स्थ कंसहन्ता स च सुगतमुनि कर्किनामा च विष्णु ॥ २ ॥

आदिमत्स्य स जयताद्यं श्वासोच्छ्वासितैर्जलै ।
गगने विदधेऽम्भोधिं गगन च महोदधौ ॥ ३ ॥
त नमस्कुर्महे कूर्मं य कवाटमसंकटम् ।
अतीतसर्वब्रह्माण्डमवशेषमिवावहत् ॥ ४ ॥
वराह नौमि सानन्ता येनोत्क्षिप्ता क्षिति परम् ।
अधोधृतार्धच्छत्रेव तलस्थार्कातपासहा ॥ ५ ॥

---

१ काव्यस्यास्य पुस्तकचतुष्टयमस्माभिरासादितम् तत्र पुस्तकद्वय डॉक्टर बूलरेण कश्मीरदेशादानीत साप्रत पुण्यपत्तनस्थराजकीयपुस्तकालये स्थित भाण्डारकरोपाह्वरामकृष्णशर्मपण्डितेन्द्रै कृपया प्रहितम्, तत्र प्रथम शारदाक्षरैर्लिखित १०९ पत्रात्मक क सज्ञम् द्वितीय नागराक्षरलिखित नवीन ६७ पत्रात्मक ख सज्ञम् पुस्तकद्वय चास्मत्परमसुहृद्भि कश्मीरमहाराजाश्रितै श्रीविश्वेश्वरदैवज्ञवरै प्रहितम् तत्र प्रथम ५३ पत्रात्मक नवीन ग सज्ञितम् द्वितीय ८८ पत्रात्मक समाप्तौ किंचित्त्रुटित नवीन नातिशुद्ध च घ सज्ञम् एतत्पुस्तकचतुष्टयमस्माभिरुद्राणधारता गतमस्ति २ 'शभवे' ग ३ 'अस्य कीर्त्या' ख ४ 'सुकृतमति' ग ५ 'यच्छ्वासोच्छ्वसितैर्जलै । गगने विदधेऽम्भोधि' ग ६ 'नमस्यामहे' ग ७ 'अतीतमर्ध' क, 'अतीतमर्धब्रह्माण्डमर्धशेष इवावहन्' ख, 'अतीव' घ ८ 'अतो' ग

जयाय नृहरिर्वोऽस्तु दैत्योर शोणितार्णवे ।
हारमौक्तिकगर्भास्तांश्चेरुर्यन्नखशुक्तयः ॥ ६ ॥
त्रिविक्रमोऽस्तु भूत्यै व प्राग्लघ्वी मध्यमा तत ।
यस्य पश्चादनन्ताभूत्सत्संगतिरिवाकृति ॥ ७ ॥
अभग्न जामदग्न्यो व प्रयच्छतु जयोद्यमम् ।
यत्कुठारकठोराग्नौ भूपालै शलभायितम् ॥ ८ ॥
नौमि राम रिपोश्चक्रे य काञ्चननिभै शरै ।
होमानलशिखारूढमिव वक्त्रवन पुन ॥ ९ ॥
यौरिर्जयति कसस्य जीवितप्रथमातिथि ।
यश्चक्रे चक्रदोनेन बाणबाहुप्रतिग्रहम् ॥ १० ॥
यस्य सभ्रूभ्रमाकम्पा माररामा ससैनिका ।
चकुर्न राग न द्वेष स शान्त्यै सुगतोस्तु व ॥ ११ ॥
स्वच्छन्दप्रोच्छलन्म्लेच्छतिमिरोद्भेदसच्छवि. ।
कर्किविष्णु प्रकाशाय प्रभातार्क इवास्तु व ॥ १२ ॥
अवतारकथायुक्त्या भक्त्या भगवतो हरे ।
श्रीव्यासदास क्षेमेद्र कुरुते सरसां स्तुतिम् ॥ १३ ॥
खञ्जनस्थितिखिन्नस्य पुण्यारण्यविहारिण ।
हरिभक्तिरसासिक्ता श्रूयन्ता मम सूक्तय ॥ १४ ॥
सतोषो यदि किं धनै सुखशतै किं वैद्यनायत्तता
वैराग्य यदि किं व्रतै किमखिलैस्त्यागैर्विवेको यदि ।
सत्सङ्गो यदि किं दिगन्तगमनप्रस्थानतीर्थश्रमै
श्रीकान्ते यदि भक्तिरप्रतिहता तर्किं समाधिक्रमै ॥ १५ ॥
लसति हसति हर्षात्तीव्रदु खे परेषा
स्खलति गलति मोहादात्मन क्लेशलेशे ।

---

१ 'यत्रेरः' ग २ पङ्क्तय' क ३ 'हेमानल' घ ४ 'बाणेन' क घ ५ 'प्रोल्लसन्' घ ६ 'कुरुते क्षेमेन्द्र' क-ख घ ७ 'सज्जन' क ख; 'सुजन' ग ८ 'विषया यत्तता' क; 'विषया यत्नता' ख

नदति वदति निन्द्य मानिना किं न नीच
परुषवचनमस्य श्रावितो हन्तुमेति ॥ १६ ॥
पुण्यान्यहीनहरिणानि तपोवनानि
सत्संगतानि शमधर्मविवेचनानि ।
एतानि तानि भवबन्धविमोचनानि
चर्चोचितानि चरितानि च चक्रपाणि ॥ १७ ॥
मान्य किल मनुर्नाम जगज्ज्येष्ठ प्रजापति ।
चचार पूर्वमुर्व्यां[1] य सेवतीर्थपथातिथि[2] ॥ १८ ॥
स बदर्याश्रम प्राप्य नरनारायणाश्रयम् ।
हरिसदर्शनधिया चकार सुचिर तप[3] ॥ १९ ॥
त कदाचिदतिस्वल्पतनुस्तनुतरेऽम्भसि ।
उवाच तलसलीनस्त्रासान्मत्स्यशिशु[4] शनै ॥ २० ॥
भीतोऽह स्थूलमत्स्येभ्यो रक्ष मा करुणानिधे ।
भक्षयन्ति क्षुधा नित्य दुर्बल बलवत्तरा ॥ २१ ॥
आश्वासन विषमशोकविमोहितस्य
भीतस्य भीतिशमन कृशपक्षपात ।
धृत्यै विपन्निपतितस्य करावलम्ब
संपूर्णपुण्यनिचयस्य[5] समुच्चयोऽयम् ॥ २२ ॥
मुनि श्रुत्वैतदाश्चर्यकारि मत्स्यशिशोर्वच ।
दयार्द्रस्त समादाय जलकुम्भान्तरेऽक्षिपत्[6] ॥ २३ ॥
अवर्तमान[7] कालेन तत्र वृद्धिमुपागतम् ।
समीपवाप्या चिक्षेप गङ्गायामथ सागरे ॥ २४ ॥
कालेन सकलाम्भोधिव्यापी विपुलविग्रह ।
कौतुकालोकनायात मनु मत्स्य समभ्यघात् ॥ २५ ॥

---

१ 'उर्वया' ग घ २ 'महत्तीर्थ' क ख ३ 'त्रसत्' ग ४ 'क्षिप्र' ग घ
५ 'निचयोच्चसमुच्चय' घ ६ 'कुण्डान्तरे' ग घ ७ 'आवर्तमान' इति सर्वेषु पुस्तकेषु

अधुना विषम काल कलुष प्रत्युपस्थित ।
विपरीतनिमित्तानि प्रवृत्तानि प्रजापते ॥ २६ ॥
परदारपरप्राणपरवित्तापहारिण ।
विचरंति[1] नरा कामक्रोधलोभपरायणा ॥ २७ ॥
धन नास्त्यस्ति वा स्तोक तदधर्म्यं न तिष्ठति ।
मुष्णाति दक्षिण पाणिं वामो वाम च दक्षिण ॥ २८ ॥
दास्य द्विज श्रयति शूद्रतपस्विशिष्य
शूद्रान्वय[2] कृषिवणिक्क्रियया[3] कृतार्थ ।
वैश्य स्वजात्यरुचिविप्रविवाहकारी
होता गुरुर्वदति मन्त्रपदानि शूद्र ॥ २९ ॥
शौच नास्ति कुत परोपकृतय सत्यस्य वार्तैव का
रौद्र क्षुद्रतया परं परधनद्रोही दरिद्रो जन ।
लेशेनापि सुख खपुष्पसदृश स्त्रैरापचारा स्त्रिय
सपूर्ण युगसक्षयस्य पुरत संलक्ष्यते लक्षणम् ॥ ३० ॥
कल्पान्तघनसंघातनिर्घातसंलिलाहतम्[4] ।
जगदेकार्णवीभूतमचिरेण भविष्यति ॥ ३१ ॥
सर्वबीजभृता तस्मिन्काले सप्तर्षिभि सह ।
मत्सृष्टा[5] नावमारुह्य स्थातव्य स्थितये त्वया ॥ ३२ ॥
मन प्रकम्पन श्रुत्वा मत्स्यस्य वचन मनु ।
तत्तथेति प्रतिश्रुत्य[6] जगाम निजमाश्रमम् ॥ ३३ ॥
अथोद्ययौ दिशा देहपरित्यागाग्निमण्डली ।
कालजिह्वासमूहाभा द्वादशार्कोदयद्युति ॥ ३४ ॥
अनेकोच्चण्डमार्तण्डदुष्टे भुवनमण्डले ।
चराचरजगत्सर्ग सहसा भस्मसादभूत् ॥ ३५ ॥

---

१ 'प्रचरंति' ग घ २ क्षुद्रान्वय' क ख घ ३ 'क्रियायाहितार्थं' ख ग
४ 'सलिलावहम्' ग घ ५ 'सदृष्टा' घ ६ विनिश्चित्य' ग घ

अथादृश्यत कार्तान्तमहिषस्येव सतति[1] ।
निर्दग्धजगदङ्गारमलिना मेघसंहति ॥ ३६ ॥
तत पपात नीरन्ध्रधारासारभर क्षितौ ।
विश्वसंक्षयशोकाश्रुप्रवाह ककुभामिव ॥ ३७ ॥
संवर्तकानलप्लुष्टे सप्तपातालमण्डले ।
कल्पान्तपवनापातभग्ने ब्रह्माण्डमण्डपे[2] ॥ ३८ ॥
पुष्करावर्तकाम्भोभृत्सृष्टवृष्टिसमुत्सुवै[3] ।
जगदेकार्णवीभूत क्षणेन समपद्यत ॥ ३९ ॥ (युग्मम्)
विपुले विप्लवे तस्मिन्मत्स्यस्य वचन स्मरन् ।
भुजविक्षिप्तसलिलस्त द्रष्टुमगमन्मनु[4] ॥ ४० ॥
स ददर्श महामत्स्य चण्डाशुशशिलोचनम् ।
कृतैक्यमिव संहारे दिनरात्रिप्रकाशयोः ॥ ४१ ॥
बिभ्राण मेरुसकाश शृङ्ग शिरसि काञ्चनम् ।
अम्भोभिरावृतस्थान निर्यान्तमिव वाडवम् ॥ ४२ ॥
पुच्छाच्छोटोच्छलितसलिलालोलकल्लोलजालै[5]
श्वासाभ्यासप्रसरदमलोत्तुङ्गरङ्गत्तरङ्गै[6] ।
ख कुर्वाण श्रितमिव घनोल्लासकैलासलक्ष्मी[7]-
र्दृष्ट्वा मत्स्य हरिरिति मनुस्तत्प्रणामानतोऽभूत्[8] ॥ ४३ ॥
तदुच्चशृङ्गसलग्ना नाव धृतिमिवायताम्[9] ।
आरुरोह गिरा तस्य सह सप्तर्षिभिर्मनु[10] ॥ ४४ ॥
तस्मिन्काले निरालम्बे मार्कण्डेयो निराश्रय ।
देवर्षि सलिलभ्रस्त दृष्ट्वा जगदचिन्तयत् ॥ ४५ ॥
अहो बत महानेष काल संकलिताखिल ।
जगद्ग्रासरसाभ्यासादनिश न निवर्तते ॥ ४६ ॥

---

१ सतति' क ख घ २ 'मण्डले' क ख घ ३ 'सृष्टि' क ख घ ४ 'युग्मम्' ग घ पुस्तकयोर्नास्ति ५ 'मुनि' ग घ ६ सलिलालोक' क ख घ ७ 'तुङ्गलङ्गत्' क, तुङ्गतुङ्गै' ख ८ 'श्रुत' क, 'धृत' ग घ ९ 'लक्ष्यै' क-ख-ग घ

क्व स सनगरग्रामग्राम समग्रगिरीश्वर
प्रथितभुवनाभोग सेन्दुग्रहार्कगतिर्गतै ।
अहह कुटिलस्रोतोत्पन्नैरिवाश्रितविभ्रमै-
र्भ्रमयति भवे भावै काल कृतैरथ संहृतै ॥ ४७ ॥
मान्यास्ते मुनयस्तपोवनभुवस्तास्तीर्थसार्थार्थिता
शौर्योत्साहमहोदया क्व बत ते भूभूषण भूमिपा ।
अन्ते सज्जनमन्युनीचविनयस्त्रीचित्तधूर्तभ्रम-
स्वभ्राकारमघर्मलब्धधनवत्कष्ट न किंचित्स्थितम् ॥ ४८ ॥
इति संचिन्तयन्दोर्भ्यां विक्षिप्तसलिलस्तरन् ।
तामासाद्य मुनिर्नावमाललम्बेऽम्बरोन्मुखीम् ॥ ४९ ॥
आकृष्यमाण स तया मत्स्यशृङ्गाग्रकृष्टया ।
मग्नोन्मग्न प्रपेदेऽन्त संसारस्येव नाम्भस ॥ ५० ॥
त्वङ्गत्तुङ्गतरङ्गभङ्गविहितव्योमाङ्गनालिङ्गने
वाताघातविभक्तयोजनशतावर्ते च निम्नेऽन्यत ।
अक्षोभस्थितिनिश्चले स्फटिकभूतुल्ये प्रसन्ने क्वचि-
न्नासालग्नजल श्वसन्मुनिवरस्तोये श्रमार्तोऽभवत् ॥ ५१ ॥
अनर्कचन्द्रनक्षत्रे दिनरात्रिविवर्जिते ।
अप्रमाणे गते काले मध्य प्रापाम्भसो मुनि ॥ ५२ ॥
तत्र सप्तर्षिभिर्जुष्टा मनुना च प्रजासृजा ।
नाव मत्स्य च नापश्यन्मुह्यमानमना मुनि ॥ ५३ ॥
अथ विद्रुमवैदूर्यहेमशाखासहस्रिण ।
उद्गतस्याम्भसो मध्यान्न्यग्रोधस्य महातरो ॥ ५४ ॥
अङ्के पर्यङ्कबन्धेन स्थित कमललोचनम् ।
ददर्श श्यामल बाल दीप्ताभरणभूषितम् ॥ ५५ ॥ (युग्मम्)

---

१ 'कृत ख २ आश्रत' क; 'आहत' ख; 'स्मित' ग; 'आवृत' घ ३ 'स्थिरम्' ग घ ४ 'तुङ्गोत्तुङ्ग' ख ५ 'प्रसक्ते' ख. ६ 'तनुर्मुनि' क घ

तत्समीपमवाप्तोऽथ स मुनिर्जलविह्वल ।
निपीत शिशुना तेन पयश्चुलकलीलया ॥ ५६ ॥
तस्योदरे सगिरिगर्ह्वरसागराणि
द्वीपापगानगरतीर्थतपोवनानि ।
पश्यन्नशेषभुवनान्यनिश महर्षि-
र्नैवान्तमन्तरचर कचिदाससाद ॥ ५७ ॥
प्रयाते विपुले काले निष्क्रान्तस्तन्मुखान्मुनि ।
अपश्यन्नाभिजाम्भोजे तस्य जात प्रजासृजम् ॥ ५८ ॥
ब्रह्मणो मानसाज्जातै प्रजापतिभिरद्भुत ।
मनुमुख्यै कृत प्राग्वत्सर्ग पुनरदृश्यत ॥ ५९ ॥
अथ बहुविधवर्णाकारचेष्टानुभाव
समविषमविभोग कर्मरेखाविभागै ।
नवविधिविहित तद्विश्वनिर्माणचित्र
भुवनभवनभित्तिव्यक्तसंसक्तमासीत् ॥ ६० ॥

इति श्रीव्यासदासापराख्यश्रीक्षेमेन्द्रविरचिते दशावतारचरिते मत्स्यावतार प्रथम ।

२- कूर्मावतारो द्वितीय ।

दक्षस्तत सर्गविधानदक्ष प्रजापति कान्तिविभूषिताश ।
एकाधिका सर्वगुणोन्नतेभ्य शतार्धसख्या प्रददौ स्वकन्या ॥ १ ॥
ज्येष्ठामुमाख्या भगवान्पिनाकी त्रयोदशान्या किल कश्यपश्च ।
सप्ताधिका विंशतिमत्रिपुत्रश्चन्द्र प्रपेदे दशक च धर्म ॥ २ ॥
असूत देवानदिति समस्तान्दैत्यान्दिति कश्यपत क्रमेण ।
कद्रूश्च नागान्गरुडारुणौ च खगाधिनाथौ विनताभिधाना ॥ ३ ॥
दनुस्तथा दानवसघमुग्र शुना जनित्री सरमा बभूव ।
अन्यासु चाभूदथ कश्यपस्य हसादिभेदेन विहगसर्ग ॥ ४ ॥

---

१ 'गिरिसागरगह्वराणि' क ख २ 'निर्गत' ग-घ ३ 'अद्भुते क ख
४ 'विराग' ग ५ 'विभावै' क

तत सुराणा बलवत्तराणा दिते सुताना च भुजोर्जितानाम्[1]।
दुग्धोदधौ मन्दरभूधरेण सुधाप्तये मन्थमनोरथोऽभूत् ॥ ५ ॥
अथार्थितोऽभ्येत्य हिताय विष्णु सुरासुरै प्रीतिधृतैककार्यै ।
मन्थक्षम मन्दरमादरेण दलद्दरीकदरमुज्जहार[2] ॥ ६ ॥
तटे निविष्टेषु सुरासुरेषु तार्क्ष्यध्वज क्षीरनिधिर्निरीक्ष्य ।
प्रक्षेप्तुमभ्युद्यतमद्रिराज कृताञ्जलिर्विग्रहवानुवाच ॥ ७ ॥
चतुर्मुख सृष्टिमिमा तनोषि विष्णु स्थितिं पासि जगन्निवास ।
अन्ते हर सहरसि त्रिलोकीमेकस्त्रिधा कारणभेदतस्त्वम् ॥ ८ ॥
भवद्भुजोत्क्षेपरयेण मुक्त स्वातन्त्र्यनिर्यन्त्रणगति प्रमाथी ।
न सप्तपातालतलावभेदी काप्येष विश्राम्यति शैलराज ॥ ९ ॥
मन्थप्रयत्नो यदि सर्वथैव तच्चिन्त्यतामस्य धृतिर्[3]महाद्रे ।
वोढु दृढोपक्रमकार्यभारं धृत्या विहीन किल क समर्थ ॥ १० ॥
यथार्थमाकर्ण्य सुधार्णवोक्त युक्त विनिश्चित्य तथेति विष्णु ।
मन्थोद्यमे मन्दरधारणाय द्वितीयरूपेण बभूव कूर्म ॥ ११ ॥
घनप्रमोदप्रतिभेन तेन विस्तारिणान्त परिपूर्यमाण ।
तरङ्गदोर्भिर्गगनाग्रगङ्गां क्षीरोदधि क्षीव इवालिलिङ्ग ॥ १२ ॥
क्षिप्तस्य सावेगमथाच्युतेन सेहे भर भूमिभृत स कूर्म ।
नवेश्वरस्येव विशृङ्खलस्य स्वकार्यसिद्ध्यै मतिमान्विकारम् ॥ १३ ॥
गिरा गरीयान्गरुडध्वजस्य वक्त्रक्रिया वासुकिरादधान ।
आकर्षयोग्य हृदयग्रहेण चक्रे गिरिं मुग्धमिवातिधूर्त ॥ १४ ॥
अथाद्रिनाथे त्रिगुणानुबद्ध मन्थोत्थिता मन्थनकार्यसिद्ध्यै ।
भुजगराज जगृहुर्महेच्छा पुच्छेन देवा वदनेन दैत्या ॥ १५ ॥

अथ मथनविधाने क्षोभणेऽब्धे[4] प्रवृत्ते
भुवनभवनभङ्गभ्रान्तिहेतुर्बभूव ।

---

१ 'बलोर्जितानाम्' ग २ 'दरत्' क-घ ३ 'गतिं' क ४ 'क्षोभने' क-ख-ग

कठिनकमठपीठप्रष्ठपृष्ठप्रतिष्ठ-
प्रविलुठदचलेन्द्रोद्धातनिर्घातघोष ॥ १६ ॥
तत श्रिय स्फाटिकमण्डपाभ दन्तायतस्तम्भचतुष्टयाङ्कम् ।
मथोत्थमैरावणमिन्दुशुभ्र द्विपेन्द्रमिन्द्राय ददावुपेन्द्र ॥ १७ ॥
ससत्त्वमुच्चै श्रवसं च सप्तिं निर्दोषमुत्साहगुणोपपन्नम् ।
प्रभाभिराम सकलक्रियार्हं शूरप्रतापोदयसुप्रकाशम् ॥ १८ ॥
श्रमश्वसद्वासुकिसृग्वि(कि)निर्यद्विषानलोल्काविकरालवक्त्रान् ।
विलोक्य दैत्यान्पुरत पयोधेरथोद्ययौ हास इवामृताशु ॥ १९ ॥
स्वय समादाय हरिर्हिमांशु हरस्य चूडाभरणीचकार ।
गुणोचितस्थानसमर्पणेन पुष्णन्ति मान महता महान्त ॥ २० ॥
अथोदित कौस्तुभमब्जनाभ स्वभावभव्य हृदये बबन्ध ।
सपूरिताश विशदप्रकाशै कृतज्ञधी साधुरिवोपकारम् ॥ २१ ॥
समुन्मिषद्विद्रुमहेमशाखासहस्रनिर्यन्नवरत्नपत्र ।
जात सुधाब्धेरथ पारिजात स्वय महेन्द्रोपवन जगाम ॥ २२ ॥
अथोद्ययावुत्कटकालकूट समीरसमोहितदेवदैत्य ।
दानोद्यतस्य स्वरसेन सिन्धोरत्यर्थमर्थार्थनयेव कोप ॥ २३ ॥
विष्णोर्गिरा विश्वहितप्रवृत्त शिवस्तदत्युग्रतर निगीर्य ।
गौरीपरिष्वङ्गरसादिवामूत्कपोलकालागुरुनीलकण्ठ ॥ २४ ॥
सुधाब्धिमध्यान्नवनीतमूर्द्धीमभ्युद्गता कान्तितरङ्गिताङ्गीम् ।
तत श्रिय श्रीरमण प्रपेदे स्वयवरक्षिप्तकटाक्षमालाम् ॥ २५ ॥
अथौषधीना घनसौरभेण श्रमापहारी त्रिदशासुराणाम् ।
हर्षाय धन्वन्तरिराविरासीत्पीयूषपूर्ण कलशश्च पश्चात् ॥ २६ ॥
सुरापनीतद्विरदाश्वरत्नशशाङ्कलक्ष्म्यक्षमिणोऽतिजिह्मा ।
दिवौकसा मूलवधे प्रवृत्ता दैत्या सुधा जह्रुरलक्ष्यवेगा ॥ २७ ॥

---

१ 'प्रविष्ट' ग २ 'प्रविचलत्' ग ३ 'निर्घोष' घ ४ 'सुप्रतापम्' ग
५ 'सुधाशु' ख-ग ६ 'भव्य' क घ ७ 'उद्धत' घ ८ 'लक्ष्मीक्षमिण' ख ग.

पीयूषपूर्णं कलश जवेन हृत्वा प्रयातेष्वसुरेषु विष्णु ।
मन्थाचलेन्द्र स्वपदे निधाय क्षण प्रदध्यौ विबुधार्थसिद्धिम् ॥ २८ ॥
सुनिर्मलाङ्गीं सुरवैरिवामा वामाकृतिं कामकृपाणवल्लीम् ।
तनीयसी विश्वतनुस्तनु स्वा लावण्यलीलालहरीं चकार ॥ २९ ॥

तरलवलनलीलामित्रनेत्रत्रिभागै
श्रवणकुवलयस्य क्लैब्यमौपादयन्ती ।
अमृतहरणहेलादृप्तदैत्येश्वराणा
हृदयहरणसज्जा सा समीप जगाम ॥ ३० ॥

शृङ्गारिणीं भगवतस्तनुमच्युतस्य
दृष्ट्वाद्भुता त्रिभुवनाभिमता बभूव ।
भव्यप्रभावविभवाय मनोभवस्य
तद्विभ्रमप्रभवभावभवोऽभिमान ॥ ३१ ॥

मनसिजविजयोद्यद्वैजयन्तीविलासा
तुहिनकिरणहासा ता विलोक्यैव दैत्या ।
झटिति गतविवेका शोकुराश्चर्यमोहा
दमृतमनृतलब्ध नैव पातु न हातुम् ॥ ३२ ॥

सत्यज्य लब्धामृतपानतृष्णा ते प्रेमलब्धाधरपानलुब्धा ।
गाढाभिलाषोष्णविषानुबन्धादूचुर्मिथ प्रस्खलितप्रतापा ॥ ३३ ॥

पूर्णेन्दुर्वदने गतौ गजपतिर्लावण्यसारे सुधा
श्रीर्गात्रे मधुराधरेऽरुणमणि सभाव्यते सुभ्रुव ।
नीत यत्त्रिदशैरहो सुमतिना भीतेन दुग्धाब्धिना
तत्सर्वं परितोषणाय वनिताव्याजेन न प्रेषितम् ॥ ३४ ॥

तीव्रश्रमाप्तममृत यदि बुद्धिमोहा-
देतत्कराम्बुरुहदत्तमिद न पीतम् ।

---

१ निवेश्य' ग २ 'उत्पादयन्ती ख-ग ३ 'ऐश्वर्य' ग ४ 'सुमनसा' ख ग

तत्किं वृथा दलितकदरमन्दराद्रि-
मन्थैरुपद्रवशतै परिखेदितोऽब्धि ॥ ३५ ॥
इत्युक्त्वामृतपूर्णरत्नकलश तस्यै ददुर्दानवा
साप्यादाय तमम्बरेण सहसा धामामराणा ययौ ।
अन्यायेन यदर्जित कथमिह स्वास्थ्येन तद्भुज्यते
यत्नात्तोऽपि पलायते विहगवन्मूढस्य हस्तान्निधि ॥ ३६ ॥
प्रत्याहृत तत्कमलाधवेन पातु प्रवृत्तेष्वमृत सुरेषु ।
विवेश राहु सुररूपगूढस्तन्मध्यमास्वादविशेषलुब्ध ॥ ३७ ॥
जिह्वाग्रलग्न रससारमाद्यमास्वादयन्विस्मयलोलवक्त्र ।
राहुर्मुहुः कातरतामवाप ससूचित सोमदिवाकराभ्याम् ॥ ३८ ॥
अर्धाग्रोत्कार(१)रावप्रविलुठदमृते कण्ठपीठेऽथ राहो-
र्वक्त्रस्य क्रूरकोपात्क्रमरहिततया चक्रिचक्रेण कृत्ते ।
निर्यान्ती व्यक्तरक्तस्रुतिभरशबला शेषपीयूषधारा
हाराग्रालीनपीनारुणमणिकिरणश्रेणिशङ्का चकार ॥ ३९ ॥
इति स भगवान्विष्णु कूर्माकृतिर्धृतभूधर
सुरहितविधौ बद्धश्रद्ध सुधा विदधेऽम्बुधे ।
अविचलतया ससक्ताना परोपकृतिव्रते
भवति महता स्फीतोत्साहे मनागपि न श्रम ॥ ४० ॥

इति श्रीव्यासदासापराख्यश्रीक्षेमेन्द्रविरचिते दशावतारचरिते कूर्मावतारो द्वितीय ।

३- वराहावतारस्तृतीय ।

अथामृते विष्णुहृते दिते सुत कृती हिरण्याक्ष इति प्रभावभू ।
तप श्रिया सर्वजगज्जयोर्जितामवाप भूतिं परिभूतवासव ॥ १ ॥
कदाचिदास्थानसभासुव श्रित स विप्रचित्तिद्रुमभौमतारकान् ।
निसुम्भसुम्भान्यकजम्भशम्बरान्महासुरान्वृत्रमुखानभाषत ॥ २ ॥

---

१ 'यत्नात्त' ग २ 'अधाग्रोत्कार' ग ३ 'शभरान्' ग घ

अपि श्रुत दृष्टमदृष्टमीदृश सुरै कृत वक्रतया कुकर्म यत्।
न मर्मसलग्नविषोक्षितेषुवत्करोत्यहो दु सहदाहलाघवम् ॥ ३ ॥
न लज्जते सज्जनवर्जनीयया भुजगवक्रक्रिययापि दुर्जन ।
धिय[1] कुमायासमयाभिचारिणी विदग्धतामेव हि मन्यते खल ॥ ४ ॥
रणाग्रभित्तिर्लिखितेव चक्रिणा दिगन्तपट्टेष्वयशोमषीभरै ।
भुजाभिमानाभरण करोति किं सुधापहार वनिताकृतिच्छलात् ॥ ५ ॥
निपीय पीयूषमुपायमायया जराक्षयादक्षयकायता गता ।
ध्रुव समुत्सारितसंपद सुरा सदैव निन्दन्त्यतिदीर्घजीवितम् ॥ ६ ॥
अदानभोगेन धनोदयेन किं मदस्पृशा द्वेषजुषा श्रुतेन किम् ।
सदम्भसभारवता व्रतेन किं विपद्विमानेन कुजीवितेन किम् ॥ ७ ॥

यस्मिन्नूर्जिततेजसा निजभुजोत्साहार्जिता सपदो
भुज्यन्तेऽल्पतरोऽप्यनल्पसुकृतै पूज्य स जीवक्षण ।
याच्ञाक्लिष्टनिकृष्टचेष्टमनिश कष्टेऽप्यपुष्टाशन
काकानामिव पुण्यपिण्डकभुजा कस्येष्टमायुश्चिरम् ॥ ८ ॥

विवासिता स्वर्गपदा मयाधुना सुधानिबद्धायतजीवितद्विष ।
व्रतानि देवा कुगतिक्षता क्षितौ चरन्ति तीर्थेषु तपोवनेषु च ॥ ९ ॥
घनावमानाशनिशातितौजसा वियोगिना दैवनिपीतसपदाम् ।
प्रतिक्रियाहीनरिपुप्रणामिना प्रजायतेऽतीव तपोवनादर ॥ १० ॥
रिपोर्गतस्यापि शरीरशेषता न नाम युक्त क्षणमप्युपेक्षणम् ।
अत सुराणा व्यसनप्रवासिना समूलनिर्मूलनकर्म कुर्महे ॥ ११ ॥
इति स्थिरान्तर्गतगूढमन्युना यथार्थमुक्त सुरवैरिभूभृता ।
निशम्य दैत्या प्रमदात्तमूचिरे सुधापहारोग्रनिकारदारिता ॥ १२ ॥
वय त्वदाज्ञापरतन्त्रवृत्तय पराभव शत्रुकृत सहामहे ।
रिपुक्षमापङ्ककलङ्कित यशो न नाकिकान्ताश्रुजलै पुनीमहे ॥ १३ ॥

---

१ 'क्रिय' ख ग २ 'कुमारक्रियया' क ख ग ३ भीति' क ख ४ 'क ष्ट' क ख ग ५ 'चाल्य' ग.

स कुञ्जरेन्द्र स हय स कौस्तुभ प्रसह्य सा श्री स शशी स पादप ।
हृता सुरैरेव विलोकिता पुर प्रणष्टचेष्टैर्लिखितैरिवासुरै ॥ १४ ॥
[1]अमर्षिभिर्मर्षित [2]एष दु सह सुधाशया दैत्यवरैर्न्यतिक्रम ।
न सापि पीता बत निष्फलोदय कृतोऽतिलोभा[3]दभिमानविक्रय ॥१५॥
पुन पुन किं विपुल विचार्यते समीहित ह[4]त हिते विधीयताम् ।
भवत्यभावप्रभवे दिवौकसा न नाम नामापि यथा जगत्त्रये ॥ १६ ॥
इति प्र[5]वृद्धोद्धतमन्युमूर्च्छितै सुरारिभि क्रूरतरैरुदाहृतम् ।
प्रिय समाकर्ण्य हिरण्यलोचन प्रमोददिग्ध सचिवानभाषत ॥ १७ ॥
अतीव युक्त मतमायतिक्षम भवद्भिरुक्त हितयुक्तमुत्तमम् ।
विनाशसज्ज प्रथम दिवौकसा क्षितिं स्थितिं देहधृतिं हराम्यहम् ॥१८॥
ममाज्ञया सप्रति सैन्यनायका प्रविश्य पातालतल बलाधिका ।
क्षितिं समाक्षिप्य नयन्त्वदृश्यतामसंशय[6] सक्षय एव विद्विषाम् ॥१९॥
इति प्रभोर्भ्रूभ्रमभीमशासन निशम्य दैत्या पृथिवी[7]प्रवासनम् ।
समुच्चलन्तश्चरणै प्रचक्रिरे क्षितिं क्षयत्रासविसस्थुलामिव ॥ २० ॥

अथ दितिसुतसेना भज्यमाननानना
स्थितिविदलनलज्जा दिग्गजाना दिशन्ती ।
धरणिहरणसज्जा मज्जयन्ती दिगन्ता-
नविशदतिविशालोत्तालपातालमूलम् ॥ २१ ॥

क्षितौ हृताया दितिजै सदानवैर्जगत्सु जाते स्थितिलोपविप्लवे ।
भुव समुद्धर्तुमथाच्युत स्वय वराहवक्त्र प्रविवेश भूतलम् ॥ २२ ॥
स रौ[8]जवर्तीचलतुल्यविग्रह सशङ्खचक्र शशिसूर्यवानिव ।
अकालसध्यामिव पिङ्गलोचन प्रभा बभार क्षयलक्षणा द्विषाम् ॥२३॥
स[9] सप्तपातालतलान्तकोटरे निसूदितामु[10]न्मददानवैर्महीम् ।
समुज्जहाराम्बुविहारलीलया तनीयसीं शैवलवल्लरीमिव ॥ २४ ॥

---

१ 'अमर्षितै' ख २ 'एव' ग घ ३ 'लोकात्' ख ४ प्रबुद्ध' ग घ ५ 'असशय' ग ६ 'प्रशासनम्' ग ७ नीलवर्णो रत्नविशेषो राजवर्त ८ 'समस्त' ग ९ 'दुर्मद' ख

पोत्रप्रान्तसमुद्धृता भगवत क्रोडाकृते श्यामला
दंष्ट्राग्रे शशिनीव लक्ष्मलहरीशोभा दिशन्ती क्षणम्।
वैक्रालोकनकम्पमीतितरला स्वेदाम्बुतिम्यत्तनु-
र्लीलापल्वलमुस्तपत्रलतिकालीलामुवाह क्षिति ॥ २५ ॥
अथाययौ भूमिसमुद्धृतिक्रुधा सुधापहारस्मृतिवर्धमानया।
भैरेण दैत्याधिपतिश्चलच्चमूरज पटप्रस्तसमस्तवासर ॥ २६ ॥
ततस्तदुत्सृष्टशराग्रमुद्गरत्रिशूलपाशाङ्कुशशक्तितोमरै ।
बभूव देव परिपूरिताकृतिर्महाभ्रवर्षैरिव निश्चलोऽचल ॥ २७ ॥
आशाकाशप्रसृतवपुषा व्याप्तसप्ताब्धिलोक
स्तोकारम्भक्षुभितभुवनभ्रशशङ्कानिलीन ।
स्वस्था धृत्वा स्थिरनिजपदे क्ष्मा हिरण्याक्षमुग्र
क्रोडीकृत्य प्रसभमवधीत्क्रीडया क्रोडराज ॥ २८ ॥
इति स भगवान्विष्णुर्जिष्णुर्जगत्कुशलक्रिया-
प्रणिहितमति कृत्वा विश्व समुद्धृतकण्टकम्।
निजनिजपदे धृत्वा देवाञ्जगत्त्रितयस्थितिं
विभुरभिनवोत्साहा चक्रे पुन प्रथमामिव ॥ २९ ॥

इति श्रीव्यासदासापराख्यश्रीक्षेमेन्द्रविरचिते दशावतारचरिते वराहावतारस्तृतीय ।

---

४ नरसिंहावतारश्चतुर्थ ।

हते महावराहेण हिरण्याक्षे क्षितिद्रुहि ।
हिरण्यकशिपु श्रीमानभवत्तत्सुतोऽधिक ॥ १ ॥
नो ननाम रणे यस्य क्षणाद्विश्वक्षय विना ।
दोर्दण्डपीडनक्रीडात्रीडाकुण्डलित धनु ॥ २ ॥
प्रतापकेसरी यस्य निःशेषीकृतविद्विष ।
अलब्धयुद्ध सुष्वाप जगद्विरिगुहागृहे ॥ ३ ॥

---

१ 'वक्र' ग २ 'ताम्यत्' ख ३ बलेन' घ ४ 'सुस्थां' ग ५ 'कृत्वा' घ ६ 'अधिकस्तत्सुतोऽभवत्' ग

स जम्भवृत्रनमुचिप्रमुखैर्दैत्यदानवै ।
हेमसिंहासनासीन सह भेजे सभाभुवम् ॥ ४ ॥
प्रणमद्दैत्यसामन्तप्रतिबिम्बभरक्षमे ।
विपुले[1] रत्नपर्यङ्के विन्यस्तचरणाम्बुज ॥ ५ ॥ (युग्मम्)
पार्श्वे हठहृतामर्त्यतरुणीचामरानिलै ।
प्राणेशविरहोच्छ्वासैरिव लोलाशुकाञ्चल ॥ ६ ॥
तस्याग्रे विग्रहग्रस्तसमस्तसुरसपद ।
तेजसा[2] मुद्रित कश्चिन्न वक्तुमभवद्विभु[3] ॥ ७ ॥
तस्मिन्नि शब्दसचारे दैत्यवृद्ध सभातले ।
प्राह राहु शिर शेष सुरवैर वहन्मुखे ॥ ८ ॥
दैत्याधिनाथ धन्योऽसि युधि येनासिधारया ।
क्षमापङ्ककलङ्काङ्क कुलस्य क्षालित यश ॥ ९ ॥
सुरापकारशल्यानि भ्रूभेदेन तवाधुना ।
काम कङ्कमुखेनेव हृदयादुद्धृतानि न ॥ १० ॥
पूज्य जन्म प्रथितयशसस्तस्य माहात्म्यपूत
मानस्तस्यामरगिरिगुरुर्वर्धते निष्प्रमाण ।
बद्धस्तेन स्थिरगुणकथाहेतुरौचित्यसेतु-
र्यस्योन्नत्या कुलमविकल याति सर्वोन्नतत्वम् ॥ ११ ॥
अल्पागसा वृथासाभि कृता हिंसा दिवौकसाम् ।
विष्णुर्मूल विकाराणामवलेपादुपेक्षित ॥ १२ ॥
तन्वी मूर्ति कुसुमकलिकाकोमला सा च वाणी
वक्र[5] सौम्य हृदयमदय दूषित चेष्टित च ।
वैदग्ध्य तद्वत मधुरिपोर्मायया मौग्ध्यदिग्ध
वामा[6]मूर्तेरमृतहरणे हन्त किं विस्मृत व ॥ १३ ॥

---

१ 'विमले ख २ ओजसा ख ३ प्रभु' ग घ ४ सेतुरौचित्यहेतु' क-ग
५ 'वक्रक्रूरं हृदय' ग ६ 'रामामूर्ते' ग

यश्चमत्कारविरहान्न स्मर्ता स्नेहवैरयो ।
तेन तुष्टेन रुष्टेन मित्रारिविफलेन किम् ॥ १४ ॥
दैत्येश्वरे हिरण्याक्षे क्षपिते तार्क्ष्यलक्ष्मणा ।
शृङ्गभङ्ग समुत्तुङ्गो दैत्यक्षितिभृता कृत ॥ १५ ॥
साधारोदधिमन्थोत्था लक्ष्मी वक्षसि कुर्वता ।
तेनाबलानामस्माक स्त्रीत्वमेवोपपादितम् ॥ १६ ॥
लक्ष्मीकौस्तुभपारिजातहरण स्त्रीमायया वञ्चन
मत्कण्ठे कठिनेऽमृतस्य लुठतो विघ्नाय चक्रक्रिया ।
दैत्येन्द्रैरवलेपविद्रुतमदैर्दैवेन वा मुद्रितै-
र्वैकुण्ठस्य शठस्य कुण्ठमतिभिश्चिन्त्य न तच्चिन्तितम् ॥१७॥
अधुना दानवपते खड्गपातपवित्रित ।
पितुर्विष्णुवधश्रद्धाश्राद्धकालो विधीयताम् ॥ १८ ॥
इत्युक्ते राहुणा स्पष्ट दैत्या क्लिष्टमुखत्विष ।
बभूवुर्लक्ष्यवैलक्ष्या प्रेक्षमाणा क्षण क्षितिम् ॥ १९ ॥
अमानमौनमूकेषु दानवेष्वभिमानिषु ।
उवाच तारक कृत्वा राहोरभिमुख मुखम् ॥ २० ॥
साभिमानमसभाव्यमौचित्यच्युतमप्रियम् ।
दु खावमानदीन वा न वदति गुणोन्नता ॥ २१ ॥
सर्वंकषेण कालेन दैत्येन्द्रे कवलीकृते ।
किं मिथ्याकारणत्वेन नीयते विष्णुरुन्नतिम् ॥ २२ ॥
कल्पान्ते क्षिप्यते येन सुमेरु पासुलीलया ।
विलम्ब कुरुते तस्य क कालस्य बलीयस ॥ २३ ॥
यस्य त्रैलोक्यभर्तुं सुरपतियशसां हर्तुराश्चर्यकर्तुं
कोटीनां षण्णवत्या सुगणितवयसो वर्षसंख्या बभूव ।

---

१ 'मुद्रितपदै' ख ग २ 'संचिन्तितम्' ख ग ३ 'पवित्रितम्' ख ग
४ 'श्राद्धकालाय दीयताम्' ख ग ५ 'मूढेषु' घ

नि शङ्काश्वासलीलालससरलमतेरङ्कसुप्तस्य मैत्र्या-
श्चित्र तस्यापि काल कवलनकलनातीतविघ्न कृतघ्न ॥ २४ ॥
दैवमेव वधे तस्य कारण दैत्यभूभृत ।
हरिर्हन्ति हिरण्याक्षमिति किं केन [2]सगतम् ॥ २५ ॥
निर्यत्नेण स्वतन्त्रस्य विचित्रचरित विधे ।
किं पात्यते न कीटेन शतशाखो वनस्पति ॥ २६ ॥
बलवा दुर्बल हन्तीत्येष नास्त्येव निश्चय ।
दीप हन्ति पतगोऽपि पन्नग च पिपीलक ॥ २७ ॥
भीरुर्जयति सङ्ग्रामे या[3]ति वीर क्षय क्षणात् ।
एवविधा एव भवे भवन्ति भवितव्यता ॥ २८ ॥
दैत्येंद्रस्यारिसंहारे प्रेरणा क्वोपयुज्यते ।
प्रेर्यते दन्तिदलने कानने केन केसरी ॥ २९ ॥
राहो निन्दापदेशेन कृता शत्रो स्तुतिस्त्वया ।
न वेत्सि हृदयाभावादनौचित्योक्तिलाघवम् ॥ ३० ॥
इत्युक्ते तारकेणाप्तजीविनामिव मानिनाम् ।
साधुसाध्विति दैत्याना निश्चेरुर्युगपद्गिर ॥ ३१ ॥
अथ धर्ममति प्राह हिरण्यकशिपो सुत ।
प्रह्लाद पितुरासन्ने यौवराज्यासने स्थित ॥ ३२ ॥
तात तिष्ठत्सु वृद्धेषु षाङ्गुण्यज्ञानमानिषु ।
मद्विधानामिद वक्तु युक्तमल्पधिया कथम् ॥ ३३ ॥
प्रस्थितानाममार्गेण निपातभयशङ्कया ।
दूराद्वारणनादेन येनकेनचिदुच्यते ॥ ३४ ॥
अयुक्त यद्भगवतो विष्णोर्निन्दाभिनन्द्यते ।
अशक्त वाङ्मय पापमभ्यस्त स्वस्तिनाशनम् ॥ ३५ ॥
यस्य सद्गुणनिन्दाया श्रद्धया वाक्प्रवर्तते ।
सत्क्षेत्रोप्तमपर्याप्तमयशस्तस्य जायते ॥ ३६ ॥

---

१ तेन ग २ सश्रुतम् ख. ३ यान्ति वीरा ' ख

विष्णोर्जगन्निवासस्य नैव द्वेष्योऽस्ति न प्रिय ।
दोषे वैर गुणे प्रीतिर्निसर्गेण जगद्गुरो ॥ ३७ ॥
गुणहीना वय नून त्रिदशा गुणशालिन ।
हरि कुतोऽन्यथास्मासु विमुखस्तेषु समुख ॥ ३८ ॥
प्रयत्न स्वगुणाधाने येन बुद्धिमता कृत ।
भूतये प्रणतास्तस्य मित्रता यान्ति शत्रव ॥ ३९ ॥
मित्रसृष्टिर्न भिन्नास्ति शत्रुजातिर्न भिद्यते ।
गुणेन जायते मित्र दोषेणोत्पद्यते रिपु ॥ ४० ॥
हिंसाविरहिता चेष्टा वाणी विनयकोमला ।
यस्यावैर मनस्तस्य शत्रुशून्या दिशो दश ॥ ४१ ॥
न तु विश्वाकृतेर्विष्णो कर्तुं शक्या प्रतिक्रिया ।
यस्योदरदरीकोणे लीना शेते जगत्त्रयी ॥ ४२ ॥

आशाकाशावकाशप्रविसृतवपुषा व्याप्तनि[3]शेषविश्व
श्वासोल्लासावहेलातुलतरलतरोत्तालकल्लोलभाग्भि ।
शुण्डोच्चण्डाभिघातस्फुटितमपि पुन [4]स्फाटिकस्फारवा[5]र्भि-
श्चक्रे मत्स्यावतारस्त्रिभुवनमिव य कस्य देव स जेय ॥ ४३ ॥

यस्याकरोद्विकचनाभिभवाब्जकोषे
सामस्वरेण विदधद्भ्रमराभिशङ्काम् ।
यज्ञोपवीतमुरसा धवल दधान
सलग्नमनाल[6]तनुत तुरिवाब्जयोनि ॥ ४४ ॥

दृष्ट्वैवावर्तमान घनभुवनगण जातलोकानुकम्प
मप्पन्ने सर्वबन्धे स्थितिधृतिदलनातङ्कमाशङ्कमान ।
पृष्ठे ब्रह्माण्डमन्यत्पृथुतरमकरोत्कूर्मरूप कवाट
यस्तस्याचिन्त्यशक्तेर्वदति मितमति क स्तुतिं कश्च निन्दाम् ॥४५॥

---

१ विद्यते' क-ख ग घ २ जायते' ख ग ३ 'सप्ताब्धिलोक' क ४ 'स्फा-टिक' क-ग ५ 'वाग्भि' ग ६ 'तलतन्तु' क-ग

परोक्षेऽधोक्षजाक्षेपमधिक्षेपविवक्षया ।
राहोर्व्याहरतो देहविरहात्तस्य शोभते ॥ ४६ ॥
न वैरे वाच्यता राहोर्यस्याद्यापि न शाम्यति ।
कण्ठे कठिनवैकुण्ठचक्रधारोद्धतव्यथा ॥ ४७ ॥
आक्रातिभरवक्रेण क्रूरचक्रेऽस्य चक्रिण ।
किं दृष्ट नष्टचेष्टेन विश्वरूप न राहुणा ॥ ४८ ॥
उचित दैत्यवीरेण तारकेण महात्मना ।
कथित यत्स कालेन दलितो मत्पितामह ॥ ४९ ॥
कालश्च भगवान्विष्णुर्विश्वव्यापी सनातन ।
अनाद्यन्तस्य यस्यान्तर्यान्ति कल्पान्तकोटय ॥ ५० ॥
पूज्यता विनयाद्विष्णुस्त्यज्यता मोहदुर्ग्रह ।
रक्ष्यता यक्षिणी (१) लक्ष्मी स्वहिते धीर्निधीयताम् ॥ ५१ ॥
मूर्खमत्र खलप्रीति पथ्यद्वेष प्रमादिता ।
प्रभविष्णुविरोधश्च विधिवैमुख्यलक्षणम् ॥ ५२ ॥
प्रह्लादगदित श्रुत्वा नि शङ्कासासुरेश्वर ।
अङ्कुशाकर्षकर्षणक्लेशी वन्य इव द्विप ॥ ५३ ॥
सोऽवदद्भत दैत्याना दुर्निमित्तमुपस्थितम् ।
यदादिशति वृद्धानामुपदेशमय शिशु ॥ ५४ ॥
कुलस्यातनिमित्तेन स्त्रीणा दुश्चरितेन वा ।
पापशापेन वा नून जायन्ते कुलपासना ॥ ५५ ॥
स्वकुलत्यागनि स्नेहाश्चपला मलिना खला ।
कोकिला इव कुर्वन्ति परपक्षसमाश्रयम् ॥ ५६ ॥
कुलक्रमागतेय श्री प्रह्लादाय न रोचते ।
यस्य वन्दिपदे शत्रो स्तोत्राङ्के रमते मति ॥ ५७ ॥

---

१ 'परोक्षाधोक्षजा' क घ २ राहोरतितरा' क ख ३ वारापथ' ख, धारा-पृथु' ग ४ 'आक्रान्ततरवक्रेण क्रूरचक्रेण चक्रिणा' ग घ ५ 'विनयी' क ख ग ६ 'वैधुय' ग ७ 'अङ्कुशाकर्षणक्लशी वने' ग ८ 'नव इव' ग घ

तेजोजीवदरिद्राणा दैन्यम्लानयशस्त्विषाम् ।
जायते शत्रुषु त्रासात्क्लीबानामिव [2]सनति ॥ ५८ ॥
वशक्षयक्षम कृष्णवर्त्मा भवति दारुण ।
दाहाय जनकस्यादौ [3]टाकारमुखर खल ॥ ५९ ॥
सेक्तार जनक त्यक्त्वा परेषा वेश्मसश्रया ।
वक्रवृक्षा कुजन्मान फलन्ति च नमन्ति च ॥ ६० ॥
कुठारिकेण येनैव च्छिन्नमूल कृतस्तरु ।
तस्यैव निर्म[4]ानतया मूढ पतति पादयो ॥ ६१ ॥
कस्य प्रह्लाद मत्स्यादिमहाकारविकारिण ।
विष्णो स्तुत्या करोषि त्वमेता शिशुविभीषिका ॥ ६२ ॥
भवन्त्येव भवे स्थूला सूक्ष्माश्चान्ये किमद्भुतम् ।
ब्रह्माण्डपरमाणुभ्या दर्शिता स्थूलसूक्ष्मता ॥ ६३ ॥
अब्धौ धूमसमूहतुच्छतनवस्तोय पिबन्त्यम्बुदा
पीत्वालम्बनशून्यमम्बरतल व्याप्याप्यातता शेरते ।
तद्वर्भाम्भसि विस्फुरन्ति दहनोद्गारोद्गता विद्युत
ससारे किमभितिचित्ररुचिरे नालोक्यते कौतुकम् ॥ ६४ ॥
वृत्रे शत्रुहरे मधौ जयनिधौ सुम्भासुरे भासुरे
मायाधाम्नि मये रणार्णवयश सतारके तारके ।
जम्भे स्तम्भितलोकनाथपृतने रुद्धाम्बरे शम्बरे
वातापि[5]यपि तापने प्रतपति स्वस्तिच्युत कैं[6]च्युत ॥ ६५ ॥
उपदेशस्त्वया प्राप्त कस्य मूर्खगुरोर्मुखात् ।
जलशायी जलपतिर्दैवत यस्य सोऽच्युत [7]॥ ६६ ॥
विचार्यमाणस्तस्यास्ति गुणलेशो न कश्चन ।
एतावदेव जानेऽह दम्भसिद्धोऽयमच्युत ॥ ६७ ॥

---

१ 'शत्रुसंत्रासात्' ग २ सतति ' ख ग ३ 'ङाकार ग ४ 'निर्माणया' क ख घ ५ व्याप्य तत ' ख घ ६ 'संतानके' घ ७ 'कोऽच्युत ' ग घ ८ 'खगा वास ' घ

ध्यान नेत्रनिमीलन विहसन भ्रूकुञ्चन घूर्णन
शूत्कारश्वसन विमूढगणन शिष्यस्पृहोल्लासनम्।
मूर्खत्रासनमुन्नतासनमतिप्रह्वस्य पादार्पण
धूर्तानां स्तुतिभूतिसूतिसदन दम्भप्रभावादिदम् ॥ ६८ ॥
विश्वव्यापी स चेद्देव सर्वस्यात्मा हृदि स्थित।
न तद्विरहित किंचिदचरेषु चरेषु च ॥ ६९ ॥
योऽय मरकतस्तम्भ सभाया मे पुर स्थित।
अस्यान्त स्थ न पश्यामि दुष्पुत्र तव दैवतम् ॥ ७० ॥
इत्युक्ते दितिजेन्द्रेण सहसा महसा निधि।
दीर्णान्मरकतस्तम्भान्निर्ययौ नरकेसरी ॥ ७१ ॥
सुवर्णशुक्तिद्वन्द्वाभ बिभ्राण श्रवणद्वयम्।
अन्त स्फुरत्प्रकोपाग्निनिर्यज्ज्वालायुगोपमम् ॥ ७२ ॥
सित केसरभारोऽस्य बभौ स्कन्धद्वयाश्रय।
मेरुशृङ्गयुगासक्तशुभ्राभ्रवलयप्रभ ॥ ७३ ॥
जृम्भमाणस्य तस्यास्ये ललास रसना मुहु।
करुपा तानललेखेव हेमाचलगुहागृहे ॥ ७४ ॥
नखास्तस्य बभुर्भीतिभग्नैणाङ्ककलोज्ज्वला।
दैत्यासृक्पानसनद्धमृत्युस्फटिकशुक्तय ॥ ७५ ॥
तस्य रौद्रतयोन्निद्ररोमाञ्चोत्कटकण्टका।
असूचयन्बहिर्घोरक्रौर्यकर्कशतामिव ॥ ७६ ॥
दैत्यकल्पान्तकालेन द्वादशार्कोदयत्विषा।
तत्तेजसा व्यदीर्यन्त तेजासि च तमांसि च ॥ ७७ ॥
करालकेसरिमुख दृष्ट्वा दितिजकुञ्जरा।
ते भग्नवदनोत्साहा ययुर्मददरिद्रताम् ॥ ७८ ॥

---

१ 'गह्वन' घ २ 'दनुजेन्द्रेण' ख, 'दैत्यराजेन' ग ३ 'द्वयी' क घ. ४ 'प्रताप' क-ग ५ 'विलसद्' ग ६ 'त' क घ

तद्दर्शनाद्भुताक्रान्त किमप्यातङ्कशङ्कित ।
आसनादुच्चलन्नूचे हिरण्यकशिपु श्वसन् ॥ ७९ ॥

नाय सिंहो न चाय पुरुषवपुरहो कोऽप्यपूर्वप्रकार
क्षिप्रोपेक्षाक्षमासिन्नहि नहि तरसा गृह्यता गृह्यता भो ।
आस्ता सज्जोऽहमस्य स्वयमिह दमनायेत्युदीर्यासुरेन्द्र-
स्त चक्रे शस्त्रवृष्ट्या निचितमुपचितोदञ्चिरोमाञ्चपूर्णम् ॥ ८० ॥

व्याप्त शस्त्रास्त्रवर्षेण हेलोन्मीलितलोचन ।
हरिर्दैत्येन्द्रमादाय विस्फुरन्तमपीडयत् ॥ ८१ ॥
उत्तानमङ्के विन्यस्य पिङ्गभ्रूभङ्गया दृशा ।
अकालसध्यामसृजन्नृहरिस्त विलोकयन् ॥ ८२ ॥
दैत्येन्द्रहाररत्नाङ्के स्ववक्त्र प्रतिबिम्बितम् ।
करालक्रूरमालोक्य सोऽभूदुद्भूतविस्मय ॥ ८३ ॥
अय मा योद्धुमायात इतीव हसितच्छलात् ।
दैत्यवक्षसि चिक्षेप हरिर्नखपरम्पराम् ॥ ८४ ॥
तस्योग्रसिंहनखशुक्तिशिखावखात-
वक्ष स्थलव्रणगुहाप्रतिशब्दधीर ।
भोस्तिष्ठ तिष्ठ चपल क्व गमिष्यसीति
कण्ठे स्वन सह ययावसुभि समाप्तिम् ॥ ८५ ॥
विदीर्णे दैत्येन्द्रे खरनखरदानैर्नरहरे-
श्चकाशे रक्ताक्तत्रुटिततहाराग्रगलित ।
शुकीतुण्डाघातव्यतिकरदलद्दाडिमरुचि
व्रजद्भिर्जीवाशैश्चित इव लुठन्मौक्तिकभर ॥ ८६ ॥

वृत्रश्चित्रार्पितामस्तिमितृतमनमत्तारकस्तारकोऽपि
ध्वस्त स्तम्भेन जम्भ प्रणिहितनयन शम्बरोऽप्यम्बराग्रे ।

---

१ 'क्षुद्रोपेक्षा' ग घ २ 'इति' ख ३ 'व्यलोकयत्' क ग घ ४ 'रत्नाङ्के' ख-ग
५ 'तिमिरमित' ख 'स्तिमितमितमित' घ

वातापि सानुताप क्षतधृतिरभवन्निर्मम कालनेमि-
दैत्येन्द्रे रौद्रवृत्त्या नरहरिदलिते विप्रचित्तिर्विचित्त ॥ ८७ ॥
हत्वा हिरण्यकशिपु हरिर्हरिणलीलया ।
हर्षेण दर्शनायातान्ददर्श त्रिदशान्पुरः ॥ ८८ ॥
भीमभैरावणाग्रात्सुरपतिरचलद्विद्रुताश्वश्च भानु-
स्रस्त तत्याज वाह महिषमपि यमश्चन्द्रमा निर्मृगोऽभूत् ।
पार्श्वे वक्र विविग्न गणपतिरकरोदित्यमर्त्योत्तमाना-
मग्रे तस्योग्रमूर्ते स्थगितगतिरभूत्संभ्रम सप्रहर्ष ॥ ८९ ॥
इति स भगवान्कृत्वा विष्णुर्जगज्जनितोदय
कुशलमचल प्रह्लादाय प्रदाय सहायुषा ।
निजनिजपदे देवान्धृत्वा स्थिरस्थितिपालने
दयितमगमत्सौम्या मूर्ति विधाय सुधाम्बुधिम् ॥ ९० ॥

इति श्रीव्यासदासापराख्यश्रीक्षेमे द्रविरचिते दशावतारचरिते नरसिंहावतारश्चतुर्थ ।

---

५ वामनावतारः पञ्चम ।

भक्त्याभिषिक्त प्रह्लाद स्वय देवेन विष्णुना ।
विदधे धर्ममर्यादा दितिजानां विभूतये ॥ १ ॥
विकासहेतुर्गुणिना मित्राभ्युदयकारिण ।
प्रभातस्येव तस्य श्रीर्निर्दोषाभिमतामवत् ॥ २ ॥
कालेन दैत्यमातङ्गा. संजातनिजदुर्मदा ।
तच्छासनाङ्कुशाकर्षक्लेशलेशं न सेहिरे ॥ ३ ॥
राज्येऽभिषिच्य प्रह्लाद पात्र पुत्र विरोचनम् ।
मेजे सतोषसाम्राज्यं निः संख्यसुखसपदम् ॥ ४ ॥
कालेनासुरराज्येऽथ दैत्यदोषासहिष्णुना ।
त्यक्ते विरोचनेनापि तत्सुतोऽभूद्विभुर्बलि ॥ ५ ॥

---

१ 'हारिण' ख २ 'भीमभैरावणाग्र' ग घ ३ 'धृत्वा देवान्' ख घ.
४ 'नि सङ्ग' ग

विक्रमप्रभवा संपत्संपन्नाभिनवोदया ।
सहस्रगुणतामेति धर्मेणाप्यायिता यदि ॥ ६ ॥
मार्गणापूरणासक्तिविस्तीर्णगुणसंतति ।
स्वचापतुल्यशैलोक्यमजयल्लीलया बलिं ॥ ७ ॥
ससत्त्वतातिगाम्भीर्यं तेज स्फूर्जितमूर्जितम् ।
तत्तस्य भूषणमभूद्भूषणं यन्महोदधेः ॥ ८ ॥
न बाणदानपूर्णेन शत्रुणा याचकेन च ।
प्रधने मार्गणे तस्य पुनः पाणिः प्रसारितः ॥ ९ ॥
क्षीणदोषस्य तस्याद्यैर्भाविभिर्वा दिनैरिव ।
न ग्रीष्मान्तदिनाभस्य महत्त्वेऽनुकृतः परैः ॥ १० ॥
शौसनोल्लासितस्तस्य भ्रूविलासाग्रविभ्रमः
चकार सुरहसानां सहसैव विवासनम् ॥ ११ ॥
विपन्नविभवोत्पन्नदैन्या शून्यवनाश्रया ।
गुणासज्जनरागेण तेन विसारिता सुरा ॥ १२ ॥
अतप्तपनो भूत्वा सोमो भूत्वासृजत्सुधाम् ।
उवाह हव्य भूत्वाग्निर्वायुर्भूत्वा ववौ स्वयम् ॥ १३ ॥
स दधार धरा धीरः शेषात्मा सैंचराचराम् ।
विधिर्भूत्वासृजद्विश्वं कुर्वन्सर्वामरक्रिया ॥ १४ ॥
मौलौ कमलजन्यस्ता हेममालामुवाह सः ।
संध्यामिव जगद्वन्द्या प्रतापार्कोदयाग्रजाम् ॥ १५ ॥
तस्यासपत्न्यैर्यात्रासु गन्धर्वगणगीतिभिः ।
ननृतुः षट्सहस्राणि सुरवारमृगीदृशाम् ॥ १६ ॥
तं सभाम्भोजिनीराजहंसं सिंहासनस्थितम् ।
सेवायां सैंसलोकैशमसुरेन्द्राः सिषेविरे ॥ १७ ॥

---

१. 'वा' ख-ग २ 'शासनोल्लासन' ख. ३. 'विपत्ति' क घ ४. 'सधराधराम्' ग घ ५. 'सृष्टिं' क घ ६ 'सर्व' ख

तारकस्त्रिशिरा वृत्रः शम्बरस्तुरगानन ।
विप्रचित्तिर्द्रुम. सुन्द[1] सुबन्धुर्बन्धुरन्धक ॥ १८ ॥
वातापिर्नमुचिर्जम्भः सुम्भ शम्भुर्जलोद्भव ।
मायावी महिष क्रौञ्च कैटभो मधुरिल्वल[4] ॥ १९ ॥

[2] ।

राहुर्गजासुराद्याश्च तत्सभासभ्यता ययु ॥ २० ॥
स बभौ जाह्नवीधूतव्यजनेनोपवीजित ।
सेवायातेनेव लोलाशुकलापेन हिमत्विषा ॥ २१ ॥
बिम्बितानन्तसामन्तलोकमौक्तिकशोभिना ।
स हारेण हरेश्चक्रे विश्वरूपप्रतिक्रियाम् ॥ २२ ॥
मणिकङ्कणकेयूरकिरणै सोऽदिशद्दिशाम् ।
दारिद्र्यद्रावणोन्निद्रा सृष्टिं रत्नमयीमिव ॥ २३ ॥
मौलौ तस्य सितोष्णीषपल्लवश्चपलाञ्चल ।
शुशुभे भुवनाक्रान्तिहर्षहास इव श्रिय ॥ २४ ॥
वज्रदन्त. प्रतीहारस्तस्याग्रे विदधे दिश ।
हेमवेत्राशुभि पिङ्गभ्रूभङ्गैरिव निश्चला ॥ २५ ॥
सभा नि स्पन्दनि शब्दा स कृत्वाङ्गुलिसज्ञया ।
प्रसादप्रणयोत्साही दैत्यराज व्यजिज्ञपत् ॥ २६ ॥
पतति विनयपूते यस्य यस्य त्वदीय,
शिरसि नखमयूखोत्केसर पादपद्म ।
उपविशति सहर्षा तत्र तत्रातपत्र-
व्यजनतिलकहासा हारशाकारिणी श्री ॥ २७ ॥
एते बहि प्रतीक्षन्ते देव सेवार्थिनस्तव ।
शक्रभ्रशनिरालम्बा सिद्धगन्धर्वकिंनरा ॥ २८ ॥
दृश देहि प्रसादार्द्रा प्रणमत्येष मातलि. ।
प्रत्रेशप्रतिषेधोऽस्य नारदेन निवारित ॥ २९ ॥

---

१ 'स्कन्द' ख-गा घ. २ अत्राधश्लोकत्रुटित सर्वेषु पुस्तकेषु ३. 'हारण' ख
४ 'शत्रु' ख

एष विज्ञापयत्यग्रे हयग्रीवो हयाधिप ।
उच्चै श्रवा श्रीसहज कस्या धुंरि निधीयताम् ॥ ३० ॥
आज्ञामर्थयते देव गजाध्यक्षो गजासुर ।
कास्तामैरावणो गन्ध सहते नान्यदन्तिनाम् ॥ ३१ ॥
भार्गवस्य मिरा लब्धतत्तुल्याभ्यर्चनासन ।
मान्यतामवधानेन प्रस्तुताशीर्बृहस्पति ॥ ३२ ॥
विज्ञत्यवसराकाङ्क्षी राहुर्बहुमतस्तव ।
कमलाकेलिसदन वदनाब्ज निरीक्षते ॥ ३३ ॥
प्रभोरभिमुख कृत्वा क्षण विज्ञापनामिति ।
परिवृत्ताननोऽग्रस्था प्रतीहारोऽब्रवीत्पुन ॥ ३४ ॥
रम्भे स्तम्भय विभ्रमभ्रमकरीं निर्ह्रादिनीं मेखला
गीत सवृणु चित्रसेन चतुर स्वैर पुनर्गास्यसि ।
आशीर्न प्रतिषिध्यते कुरुत ता सक्षिप्य सप्तस्वरो
राहुर्दैत्यमहत्तम प्रकुरुते विज्ञप्तिमग्रे प्रभो ॥ ३५ ॥
द्रष्टा स्वर्गपुरे धृत क्षितितले दत्तोऽधिकारी क्षम
पाताले विहितश्च तत्समुचितास्तत्रैव विज्ञप्तय ।
देव संप्रति निर्वृतिप्रणयिनी निश्चिन्तता सेवते
पर्याप्ता सुखसुप्तसप्तभवनव्यापारपारगम ॥ ३६ ॥
इत्युक्ते वज्रदत्तेन तद्भ्रूनिर्दिष्टवेत्रिभि ।
कृते सभाग्रे नि शब्दे भ्रूलेखाङ्गुलिसज्ञया ॥ ३७ ॥
बलि स्तोकनमन्मौलिरभिनन्द्य बृहस्पतिम् ।
तन्मानालोकनोत्साहादुच्चैरुच्चारिताशिषम् ॥ ३८ ॥
कृत्वा दृक्संविभागेन प्रणताना कृतार्थताम् ।
विभज्याभिमताज्ञाभि प्रणय शासनार्थिनाम् ॥ ३९ ॥
स प्रसादादरस्निग्धस्मितदिग्धाधरद्युति ।
चक्रे श्रवणसंनद्ध राहोरभिमुख मुखम् ॥ ४० ॥

---

१ द्वारि' क-ग घ २ 'विभ्रमभ्रमरक निर्ह्रादिनी मेखला' ख ३ 'निश्चिन्यतां सेव्यते' ख ४ प्रसादादरोदारस्मित' ख

क्षण कुण्डलयोस्तस्य चण्डरश्मिशशित्विषो ।
राहुसदर्शनत्रासादिवामूत्कम्पविप्लव ॥ ४१ ॥
उच्यतामिति तेनोक्त प्राह राहुरदेहताम् ।
दष्ट्राशुपटलस्पर्शपटेनाच्छादयन्निव ॥ ४२ ॥
जीर्णत्वादतिवृद्धाना क्लेशाय चिरजीवितम् ।
सर्वभावावियोगेन सदा येषामनिर्वृति ॥ ४३ ॥
रम्य किं त्वेकमेवास्ति विस्तीर्णस्यायुष फलम् ।
दृश्यते यत्कचित्किंचित्सोत्कर्षचरिताद्भुतम् ॥ ४४ ॥
सर्गारम्भदिने जातैर्नासाभिर्दृष्टमीदृशम् ।
तदैश्वर्य त्वदैश्वर्यप्रभावस्योपमाक्षमम् ॥ ४५ ॥
इय श्रीरपरिश्रान्ता प्रभावोऽय भुजोद्भव ।
इय शक्तिर्यश सिक्ता कस्यान्यस्य यथा तव ॥ ४६ ॥
सर्गारम्भान्निसर्गेण नैव दृष्टो न च श्रुत ।
अदर्पसपत्प्रणयी निर्लोभविभवो जन ॥ ४७ ॥
नतिर्मूर्ध्नि श्रुत श्रोत्रे हृदये सत्त्वमुज्ज्वलम् ।
मौलिकुण्डलहारास्ते पुनरुक्त विभूषणम् ॥ ४८ ॥
यश सप्तसु लोकेषु श्रीराश्रितगृहेषु च ।
प्रोषितारातिचित्तेषु प्रतापाग्निस्त्वयार्पित ॥ ४९ ॥
श्रुतमाश्रितवात्सल्य कस्य वा सदृश तव ।
प्रभो प्रापयतो भृत्यान्ध्रुवैव भुवनेशताम् ॥ ५० ॥
त्वत्पादाब्जप्रणामे नखकिरणमिलन्मौलिपट्टेन बद्धे
जम्भेनोत्तम्भिता भू सुरभवनवती शातकौम्भाद्रिभर्तु ।
पाताल तालकेतो सकलमुपनत तारकेणाहृता भू
कौबेर कोष एव प्रविशति नमुचेर्वेश्म युष्मद्विलब्ध ॥ ५१ ॥
प्रसादभूमय सर्वे दैत्यास्ते भुजशालिन ।
महोत्साहास्त्वय राहुरबाहु कोपयुज्यते ॥ ५२ ॥

---

१ 'प्रभवस्य' ख २ प्रथयत ख

अह हि हितैमात्रैकचिन्तालब्धप्रजागरः ।
त्वत्पितामहमुख्याना भोगभागी निरर्गल ॥ ५३ ॥
अत्यन्तस्थविर कायापायसकुचितोद्यम ।
चित्तग्रह न जानेऽह तारुण्यतरलस्य ते ॥ ५४ ॥
तुहिनातपतुल्योऽय वीणापटहसंनिभ ।
न सङ्गः श्लिष्टतामेति वृद्धस्य तरुणस्य च ॥ ५५ ॥
केशोत्तालनमङ्गभङ्गवलन भ्रूविभ्रमोल्लासन
यत्तत्कत्थनमप्रसङ्गहसन दन्तप्रभादर्शनम् ।
उत्सिक्तै प्रकटीकृत विटनटै कौटिल्यनाट्यायित
यूना वृद्धमतिद्विषामभिमत प्राय प्रभूणामिदम् ॥ ५६ ॥
भवानभिमुखायातैर्भृत्यैरभिमुखीकृत ।
उत्सङ्गवर्धितमपि त्वा न जानामि सेवितुम् ॥ ५७ ॥
कोषप्रवेशकुशला सकला कमलश्रियम् ।
मधुपा मधुरालापनिपुणा एव भुञ्जते ॥ ५८ ॥
अङ्के वृद्धिमुपागत शिशुतया सर्वाङ्गमालिङ्गित
मत्स्य श्रीपरिरम्भनिर्भरतर व्याकोशकोषोन्मुखै ।
आशासै परिपीयमानमनिश नि स्पन्दमिन्दिन्दिरै-
र्दूरादेष निमेषशून्यनयन पद्म समुद्वीक्षते ॥ ५९ ॥
दैवेन पक्षपातोऽय कृत कायव्ययाय मे ।
त्वत्कृतः पक्षपातस्तु न मयास्त शरीरत ॥ ६० ॥
ऐन्द्र वारुणमाग्नेय याम्य सौम्य च पावनम् ।
प्राजापत्यं च कुर्वाण कर्म सर्वं त्वमास्थित ॥ ६१ ॥
आर्त्ता शरीरविरहक्लेशप्रशमन मम ।
त्वद्विभूतिप्रभावैऽस्मिन्प्रकृत हारित मया ॥ ६२ ॥
पीयूषपानपैशुन्यमन्युशल्यानुबन्धिन ।
विधिना मम निर्दिष्टौ चन्द्रार्कौ जातु भोजनम् ॥ ६३ ॥

---

१ 'देहमात्रैक' ख २ 'आयातै' क-ग घ ३ 'सपावनम्' ख

भवद्भूभङ्गसिंहेन त्रासितो हरिणाश्रय ।
न वेद्मि विद्यते केन्दुर्विद्युताश्च क्व भास्करः ॥ ६४ ॥
चिरसेवापरिश्रान्त क्षीणवृत्तिर्निरुद्यम ।
विशेषलाभत्यक्ताश स्वेनैवार्थेन तुष्यति ॥ ६५ ॥
तस्मान्ममानुरोधेन क्रियतामर्कचन्द्रयो ।
त्वदादेशविमुक्तैव निर्विण्णा गगने गति ॥ ६६ ॥
इत्युक्ते राहुणा नासान्यस्ताङ्गुलितल क्षणम् ।
आलुलोके बलि क्षोणीं वैलक्ष्यक्षामलोचन ॥ ६७ ॥
सोऽवदन्मुखमुद्यम्य शनैर्मुकुलितस्मितम् ।
दिशन्दिक्षु प्रसादार्द्रां दृष्टिं चन्द्रमयीमिव ॥ ६८ ॥
मदाज्ञाप्रतिषिद्धोऽपि स्वाधिकारोऽर्कचन्द्रयोः ।
अधुना निर्विबन्धेन वज्रदन्त विमुच्यताम् ॥ ६९ ॥
इति शासनमम्लानप्रसादप्रभव विभोः ।
प्रतीहार समादाय वैत्रिमण्डलमादिशत् ॥ ७० ॥
अत्रान्तरे समासन्नस्थानावसरसूचक ।
उदभूद्भुवनव्योमिमुखर शङ्खनि स्वन ॥ ७१ ॥
राहोराश्रितवत्सल फलवतीं कृत्वार्थनां मानव
सर्वाशापरिपूरक प्रणयिनामुन्निद्रकल्पद्रुम ।
वेत्रिव्रातनिवेद्यमानविनमत्सामन्तचूडामणि
व्याकीर्णांशुविचित्रितादुदचलत्सिंहासनाग्राद्बलिं ॥ ७२ ॥
अथ कीर्तिसुधाधौतसुकृत क्षपन विधिम् ।
विधाय प्रययौ श्रीमान्दानस्थानभुव बलि ॥ ७३ ॥
तत्र त्रिवेदीविद्वद्भ्य काञ्चनप्रचयान्बहून् ।
मेरुश्रमोपविष्टाश्रानदभ्रान्प्रत्यपादयत् ॥ ७४ ॥

---

१ 'हरिणो यथा' क ग　२ 'त्यक्तविशेषलाभाश' क-ख.　३ 'निर्मुखा' ग घ
४ 'क्षणात्' क ख.　५ 'व्यापी' ख.　६ 'स्नानसविधिम्' ख

मुहुर्विप्रार्प्यमाणाना हयाना हेममालिनाम् ।
स्खलत्खलीनफेनौघैर्यश सिक्तेव भूरभूत् ॥ ७५ ॥
दन्तिदानक्षणे तत्र घटासंघट्टघट्टिता ।
संश्लिष्टघण्टाटकारैर्ययुर्मुखरता दिश ॥ ७६ ॥
रत्नभारानताश्चेरुर्यस्या यस्या दिशि द्विजा ।
सन्त संतोषिताश्चक्रुस्तस्यै तस्यै नमो नम ॥ ७७ ॥
तस्याग्रे रोहणाद्रि शिरसि धृतमहारत्नसपूर्णपात्र
कैलास शक्रशैल सह बहलतरै कल्पवृक्षै सदेहै ।
भूमिश्चिन्तामणि श्रीर्विविधनिधिगण कामधेनु सुधाब्धि-
र्भूक्षेपाज्ञाविलासे[1] प्रचरणचतुरा दानकाले बभूवु ॥ ७८ ॥
संपूर्णेष्वर्थिसार्थेषु याचकाभावदु खिन ।
विश्रान्तपाणेश्चिन्तान्तर्मुहूर्तमभवद्बले ॥ ७९ ॥
दानोद्यमेऽर्थिविरहाद्विपलै[2] विभूतिं
स क्षिप्रमूषरमहीमिव मन्यमान ।
दृष्टिं मुहुर्दिशि दिशि प्रदिदेश दीर्घा-
मस्तोकलोककरुणामृतवृष्टिमिष्टाम् ॥ ८० ॥
सर्वार्थानर्थिसार्थेभ्य परिकल्प्याविकल्पधी ।
निजजीवितदानेन बलिश्चक्रे मनोरथम् ॥ ८१ ॥
अथ त्यक्तजलासङ्ग प्रसन्नगगनद्युति ।
प्रतिबुद्ध[3] शरत्काल श्रीकान्त समुपाययौ ॥ ८२ ॥
मयूरा मौनिनोऽरण्ये ययुर्दैन्यनिलीनताम् ।
शरत्कालेन बलिना सुरा इव हृतश्रिय ॥ ८३ ॥
ववुर्देवकदम्बेषु यातेषु विशरारुताम् ।
द्युलोकशोकनि श्वासा इव सप्तच्छदानिला ॥ ८४ ॥

---

१ 'विलासप्रचरण' ख २ 'अफलां' ख ३ 'प्रतिबुद्धशरत्काल' ख

तीव्रशूरप्रतापेन नष्टमाना समाययौ ।
विल्लुप्तावरणोत्साहा हीनता सुरवाहिनी ॥ ८५ ॥
सदानवप्रभोल्लास बभौ आजिष्णुतारकम् ।
शरन्निशासु विपुल दैत्यैश्वर्यमिवाम्बरम् ॥ ८६ ॥
लोकपालवियोगिन्य ककुभ काशपाण्डुरा ।
फुल्लै कमलकह्लारै कृतशय्या इवाबभु ॥ ८७ ॥
शुशुभे शैलशीर्षेषु नक्त दीप्तौषधिव्रज ।
नश्यतामिव मेघाना विद्युल्लेखाचयश्च्युत ॥ ८८ ॥
भग्ने प्रभौ सहस्राक्षे पयोदास्त्यक्तकार्मुका ।
ययुस्तीव्रव्रतेनेव तनुता भस्मपाण्डुरा ॥ ८९ ॥
बलिराज्योपमे तीव्रप्रतापे शरदुद्भवे ।
नाक्रान्ति शक्रचापस्य अष्टस्यादृश्यत क्वचित् ॥ ९० ॥
ययु शुकमृगापाते कलमक्षेत्रपङ्क्तय ।
विधवा इव तारुण्ये कृच्छ्रसरक्षणीयताम् ॥ ९१ ॥
काशेन्दुहसकुमुदैर्महीव्योमसरिद्दिश ।
दानोदितैरिव बलेर्यशोभि शुभ्रता ययु ॥ ९२ ॥
अथास्मिन्समये जग्मु सुरा शरणमच्युतम् ।
निवारितार्चाबलिना बलिना बलिना जिता ॥ ९३ ॥
घनावमानसंतप्ता मानलोपात्तलाघवा ।
प्रकाशाशाप्रणयिन शारदा इव वासरा ॥ ९४ ॥
ते क्षीरोदधिमासाद्य ददृशु शेषशायिनम् ।
सप्रसाद सकमल शरदारम्भसन्निभम् ॥ ९५ ॥
समुच्छ्वसत्फणाग्रस्य फुल्लफेनाम्बुधेरिव ।
शेषस्योपरि पर्यङ्कबन्धेन सुखमास्थितम् ॥ ९६ ॥
प्रभाभिराम श्रीकान्त पीताम्बरमनोहरम् ।
प्रभातमिव लोकाना कल्याणोदयकारणम् ॥ ९७ ॥

---

१ 'विल्लुप्तरवणो' क, 'विल्लुप्तरत्नो' ध २ 'विग्रहा' ग ३ 'दानोद्यतै' ख-ग घ.

त प्रणम्य सहस्राक्षप्रमुखास्त्रिदिवौकस. ।
धृतिसजीवन प्रापुस्तत्प्रसादावलोकनम् ॥ ९८ ॥
प्रवासव्यसनोद्विग्नान्भगवान्भूतभावन ।
तान्विभाव्याभवत्क्षिप्र वैलक्ष्यविनतानन ॥ ९९ ॥
शनैश्चिन्ताविषावेशप्रशमासङ्गिनीं गिरम् ।
उज्जगारामृतोद्गारगुर्वीं गरुडलाञ्छन ॥ १०० ॥
चिरप्रवासनि[1] श्रीकशोकशल्यशलाकया ।
चिन्तया व्यथिता यूय सतत प्रथमानया ॥ १०१ ॥
दैत्यदौरात्म्यसजाता सह्या सर्वात्मना विपत् ।
ते कथ भाजन भूतेर्ये सहन्ते न दुर्दशाम् ॥ १०२ ॥
सुखलवदशाहर्षक्लैब्ये खल खलु खेलते
स्खलति भजते लेशक्लेशो विषादविषूचिकाम् ।
भवति न सता दर्पोद्दामा न दैन्यमयी मति[2]-
र्दुरभिभवता गम्भीराणा सुखेष्वसुखेषु[3] च ॥ १०३ ॥
त्यक्त्वा श्रीर्दुर्जनान्दैत्यान्साधून्युष्मानुपैष्यति ।
स्थिरा सता न विपद खलानामिव संपद ॥ १०४ ॥
वित्ते त्याग क्षमा शक्तौ दु खे दैन्यविहीनता ।
निर्दम्भता सदाचारे स्वभावोऽय महात्मनाम् ॥ १०५ ॥
स्वाम्ये पेशलता गुणे विनतता हर्षे निरुत्सेकता
मन्त्रे सवृतता श्रुते सुमतिता वित्तोदये त्यागिता ।
साधौ सादरता खले विमुखता पापे परं भीरुता
दु खे क्लेशसहिष्णुता च महता कल्याणमाकाङ्क्षति ॥ १०६ ॥
उक्ते हिते भावता पद्मनाभेन भूतये ।
सुरास्तमूचिरे बाला इव वात्सल्यलालिता ॥ १०७ ॥
देव त्वय्यपि संनद्धे हितचिन्तासु नः परम् ।
इयती कर्मवैचित्र्याद्दुर्वारा दु खसंतति ॥ १०८ ॥

---

१ 'नि शूक' ख २ 'गति' क ३ सुखेषु दु खेषु च' ख

जीवाम क्लिष्टसङ्क्लिष्टा निश्चेष्टा नष्टवृत्तय ।
वनान्तविवरालीना शिशिरे मधुपा इव ॥ १०९ ॥
बलिना वयमाक्रान्ता प्राक्तनेनेव कर्मणा ।
स्वत्प्रभावोद्भवा भोक्तु विभूतिं न लभामहे ॥ ११० ॥
बलिप्रभावादस्तोकैस्त्रिलोकी लोककण्टकै ।
इय त्वद्भुजगुप्तापि लुण्ठ्यते दैत्यदस्युभि ॥ १११ ॥
सा नन्दनोद्यानवती हृता तेनामरावती ।
वने विनोदयत्यस्मान्मनोरथपथागता ॥ ११२ ॥
वने स्वर्गपुरीमेव चिन्तयन्त्य सुराङ्गना ।
काङ्क्षन्त्युत्कण्ठया निद्रा स्वप्नसदर्शनाशया ॥ ११३ ॥
अग्रे समग्रसैन्याना बलिसंश्रयनिर्भय ।
अहो बाहुविहीनोऽपि राहुराहवमीहते ॥ ११४ ॥
दैवेनेवार्पिताक्रान्तिर्बलिनाश्चर्यकारिणा ।
सहस्राक्षस्य निर्बन्धादन्धक श्रीविर्बन्धक ॥ ११५ ॥
जृम्भते तारक काम त्रिदशश्रीप्रतारक ।
दु शील स बले शक्त्या लीलातरलतारक ॥ ११६ ॥
गजासुर कथायाते स्पर्धाबन्धे मदान्धधी ।
बलेरग्रे गणपतेरेकदन्तस्य लज्जते ॥ ११७ ॥
शोचन्सिंहनखोत्खात हिरण्यकशिपु रुरु ।
असनिघानानुशयी हरिणा योद्धुमिच्छति ॥ ११८ ॥
सहस्रदोष्णा बाणेन बालेन बलिसूनुना ।
गुहवाहमयूरोऽपि नीत क्रीडाशिखण्डिताम् ॥ ११९ ॥
वह्निवाहशुकस्तेन न्यस्त कोऽञ्चनपञ्जरे ।
गृहोपवनवापीषु राजहसाश्च वारुणा ॥ १२० ॥

स्थितां पुरीं' ख २ 'निबन्धक' घ ३ ख पुस्तके पूर्वोत्तरार्धयोर्व्यत्यय ६' ख.

सोऽपि प्रतापशिखिना युगपत्सयुगोन्मुख ।
अचिरात्त्रिपुरश्लोष रौद्रो बाण करिष्यति ॥ १२१ ॥
शम्बरोऽम्बरचित्राभ दर्शयत्यद्भुत रणे ।
यदस्य शत्रुहृदये शक्तिर्व्रजति शूलताम् ॥ १२२ ॥
यान्ति निष्फलतामेव तेषूपाया प्रकल्पिता ।
उपकारा कृतघ्नेषु सज्जनेष्विव मन्यव ॥ १२३ ॥
समता सामविमुख सामस्खनविधायिन ।
स तवाप्यश्वशीर्षस्य हयग्रीव समीहते ॥ १२४ ॥
सुरसर्वस्वहारिभ्यस्तेभ्य किं वा प्रदीयते ।
मेरुरत्नाकरवती कोषो येषा जगत्त्रयी ॥ १२५ ॥
बलिशासनवश्याना भेदो नास्ति सुरद्विषाम् ।
आलिङ्गति हयग्रीव निर्वैरो महिषासुर ॥ १२६ ॥
भवद्भ्रूभङ्ग एवैकस्तेषा दण्ड क्षयक्षम ।
सोऽप्यस्मद्भाग्यलेशेन मन्ये विस्मारितस्तव ॥ १२७ ॥
बलि करोति भगवँल्लोकपालक्रिया स्वयम् ।
लोके द्रष्टासि नि शेषे शेषे शेषे नु केवलम् ॥ १२८ ॥
इत्युक्ते त्रिदशैरूचे विचार्य चिरमच्युत ।
सुराणा विभवभ्रश बलेश्च गुणगौरवम् ॥ १२९ ॥
बैलि पुण्यप्रवृत्तत्वान्नोच्छेद्य सत्त्वसागर ।
चिर क्लेशार्दिता यूयमिति दोलायते मन ॥ १३० ॥
विचार्यमाणस्तु बलेर्नात्मदोष प्रदृश्यते ।
दैत्यदुर्जनसङ्गेन स गतश्चिन्तनीयताम् ॥ १३१ ॥
शमयति यश क्लेश सूते दिशत्यशिवा दशा
जनयति जनोद्वेगप्रायास नयत्युपहास्यताम् ।
भ्रमयति मतिं मान हन्ति क्षिणोति च जीवित
गिलति सकल कल्याणाना कुल खलसंगम ॥ १३२ ॥

---

१. 'तेन माया' ख २ 'समत्व' ख ३ 'बले' ख ग-घ ४ 'लोलायते' ख

सर्वात्मना गुणनिधिर्न वध्य सुकृती बलि ।
किं त्वस्य विभवभ्रश करोमि भवता हितम् ॥ १३३ ॥
हितक्रियासु युष्माक न कार्यं गणयाम्यहम् ।
गम्यता त्यज्यता चिन्ता यतिष्ये कुशलाय व ॥ १३४ ॥
इत्युक्ते विश्वगुरुणा त प्रणम्य ययु सुरा ।
अचिन्तयच्च तत्कार्यं भगवान्गरुडध्वज ॥ १३५ ॥
अत्रान्तरे भृगुसुत षाड्गुण्यज्ञानलोचन ।
शुक्र प्रोवाच वात्सल्यान्निर्जनावसरे बलिम् ॥ १३६ ॥
औचित्याभरण चित्त सत्याभरणमाननम् ।
गुणाभरणमैश्वर्यं भुवनाभरणस्य ते ॥ १३७ ॥
लोके त्वत्सदृशी लक्ष्मीर्न श्रुता न विलोकिता ।
शक्यानुकर्तुं लेशेन या न पूर्वैर्न चापरै ॥ १३८ ॥
गुणक्षये पलायन्ते धीवराणामिव क्षणात् ।
एताश्चपलचारिण्यश्चमर्यं इव सपद ॥ १३९ ॥
क्षीयते श्री प्रमादेन शरत्कालेन निम्नगा ।
ग्रीष्मागमेन रजनी कृष्णपक्षेण चन्द्रिका ॥ १४० ॥
[1]नीतेरश्रवण हिते विहसन धूर्तव्रजावर्जन
दोषे व्याकरण गुणेऽप्यगणन छिद्रच्छलालोकनम् ।
लोकाना विनिपातलक्षणमिद श्रीभोगनिर्वासन
साधूना दलन खलेषु ललन मित्रादिसदूषणम् ॥ १४१ ॥
दोषा अपि न बाधन्ते विचारविमलीकृता ।
गुणा अप्यगुणायन्ते गाढग्रहघनीकृता ॥ १४२ ॥
न शरीरविकाराय स्वल्पमात्राहृत विषम् ।
देह चन्दनलेपोऽपि निबिड पीडयत्यलम् ॥ १४३ ॥

---

१ 'नीतेरश्रवण हृते विहसन सत्यच्युताकर्णन विद्वद्वर्जनमार्जवोपहनन धूर्तव्रजावर्जनम् । दोषे व्याकरण गुणेऽप्यगणन छिद्रच्छलालोकन लोलाना विनिपातलक्षणमिद श्रीभोगनिर्वासनम् ॥' ख २ 'विरलीकृता' ख.

गुणरत्नावलीमध्ये सारभूत गुणद्वयम् ।
तवैतद्दोषता यातमतिनिर्बन्धसेवया ॥ १४४ ॥
श्लाघ्यमाश्रितवात्सल्य दान च श्रीविभूषणम् ।
विभवायासता नीत भवतात्यन्तवर्धितम् ॥ १४५ ॥
कुर्यादाश्रितवात्सल्यात्पक्षपात न दुर्जने ।
कृष्णपक्षाश्रयेणैव पक्षे पक्षे क्षयी विधु ॥ १४६ ॥
चित्र चारित्रचित्र ते दिग्भित्तिलिखित महत् ।
दैत्यदुर्जनवात्सल्यधूमेन मलिनीकृतम् ॥ १४७ ॥
भूतेर्दुर्व्यसन धृतेरसहन मानोन्नतेर्याचन
प्रीतेर्विस्मरण तनोर्निकषण नीतेरसन्मज्जनम् ।
कीर्तेर्लोभघन स्थिते प्रवसन वृत्तेरसचिन्तन
शक्तेर्दुर्जनपक्षपातकरण नि:शेषनिर्मूलनम् ॥ १४८ ॥
अतिप्रदाननिर्बन्ध सर्वस्वक्षपणक्षम ।
छिनत्त्यन्यार्थिवैफल्याद्धर्मवृक्ष क्रियाफलम्[1] ॥ १४९ ॥
सर्वोपजीव्य सर्वस्व सकृद्येन व्ययीकृतम्[2] ।
पुन सर्वार्थिदानस्य तेन मूलक्षय कृत ॥ १५० ॥
वित्तायत्त सदा धर्म कामो वित्तनिबन्धन ।
वित्तायत्तानि चित्तानि वित्त जीवितवर्धनम्[3] ॥ १५१ ॥
धन रूपमवैक्लव्य धन कुलमसकुलम्[4] ।
धन यौवनमम्लान धनमायुर्निरामयम् ॥ १५२ ॥
रूप वेषैर्बल भृत्यैरुत्तमैर्मानमर्थिभि ।
महाकुलविवाहैश्च कुल क्रीणाति वित्तवान् ॥ १५३ ॥
भिषग्भैषज्याभ्या तरति धनवान्रोगविपद
धनेनान्धश्चक्षुर्युत इव चरत्यर्पितकरः ।

---

१ 'प्रधान' ख २ 'क्रियाल्लताम्' ख ३ 'वर्तनम्' ख, 'च धनम्' ग ४ 'अ वैरूप्य' ख

धनै सत्कारार्हो जगति गतजीवोऽपि लभते
धनेन प्राप्नोति प्रगुणगुरुमाराध्य सुगतिम् ॥ १५४ ॥
श्राद्धोत्सवलसद्बन्धुर्जीवतीव शव श्रिया ।
भोज्योपचारविरहाद्बन्धूना निर्धनो मृत ॥ १५५ ॥
क्लेशलभ्य धन येन क्षपित नातिमात्रया ।
कुलमानगुणाचारनिधन तेन रक्षितम् ॥ १५६ ॥
गुणा धनेन लभ्यन्ते न गुणैर्लभ्यते धनम् ।
धनी गुणवता सेव्यो गुणी न धनिना क्वचित् ॥ १५७ ॥
सेव्यन्तेऽर्थार्थिभिर्भूपा जयजीवेति वादिभि ।
स्याच्चेन्न धनसंबन्ध क सेव्य कश्च सेवक ॥ १५८ ॥
सदृशो पुरुषत्वेऽपि तुल्यपादकरोदरे ।
एक प्रभु परो दास इति वित्तविजृम्भितम् ॥ १५९ ॥
सर्वे धनमदान्धस्य प्रात प्रातर्धनाशया ।
सेवा विधातु धावन्ति विविधाराधनोद्यमै ॥ १६० ॥
सिद्धौ वेतालवद्यस्य भोग्यस्तस्यैव भूपति ।
शेषा शीतातपश्रान्ता दिनान्ते यान्ति निष्फला ॥ १६१ ॥
दिशति कथमप्यन्तस्तारा दृश मदमन्थरा
वदति विरल देवोऽसीति प्रमूढमदो नृप ।
प्रणमति च त भीत्या भृत्यस्तदुत्तरकातर-
स्तदिदमखिल दानादान धनोपनिबन्धनम् ॥ १६२ ॥
क्षीणे धने गुणे ग्लाने म्लाने माने गते जने ।
कलत्रमपि वैमुख्यमचिराद्याति निश्चितम् ॥ १६३ ॥
धनवैक्लव्यवैराग्यादपका प्रव्रजन्ति ये ।
धनोपायव्रत तेषा धने ध्यान धने जप ॥ १६४ ॥

---

१ 'भूपते' क-ग घ २ 'प्रमूढपद' ग ३ 'मानामान' ख ४ 'कलत्रमत्रपैर्या वत्परोपकरणीकृतम्' क

पुसा निवृत्तवित्तानां प्रवृत्ते वित्तयाचने ।
उत्तानपाणिदीनानां[1] मन्ये मरणमुत्तमम् ॥ १६५ ॥
जीवत्यर्थक्षये[2] नीचो याच्ञापचयवञ्चनै ।
कुलाभिमानमूकानां साधूनां नास्ति जीवितम् ॥ १६६ ॥
अप्रस्तावस्तुतिभिरनिश कर्णशूल करोति
स्व दारिद्र्य वदति वसन दर्शयत्येव जीर्णम् ।
छायाभूतश्चलति न पुन पार्श्वयोर्नापि पश्चा-
न्नि स्व खेद दिशति धनिना व्याधिवद्दुश्चिकित्स्य ॥ १६८
तस्मात्सर्वप्रयत्नेन रक्ष्य मानार्थिभिर्धनम् ।
महाव्ययपरिष्कारैर्विशेषेण नरेश्वरै ॥ १६८ ॥
अश्वमेधस्त्वयारब्ध क्रतु सर्वस्वदक्षिण ।
एवमेव त्वमुद्दामवर्षी यज्ञे विशेषत ॥ १६९ ॥
दृश्यन्ते दुर्निमित्तानि प्रवृत्तानि समन्तत ।
दैत्याना[3] यै कुवृत्तानां निवृत्ति सूच्यते श्रिय ॥ १७० ॥
इत्युक्त[4] कविना श्रुत्वा बभाषे त शनैर्बलि ।
सत्त्वोदधि सृजन्दन्तकान्त्या चन्द्रकलामिव ॥ १७१ ॥
युक्त कल्याणसंयुक्तमुक्तमुन्मुक्तसंशयम् ।
भगवन्भवता सर्वमखर्वप्रतिभोद्भवम् ॥ १७२ ॥
न जातु मे भुजच्छायाविश्रान्तिसुखशायिषु ।
अपत्येष्विव दैत्येषु पक्षपातो निवर्तते ॥ १७३ ॥
चिराश्रितपरित्यागे[4] मतिर्यस्य प्रवर्तते ।
भूमिर्भार वहन्ती त मन्ये मज्जति लज्जिता ॥ १७४ ॥
स्वजनद्रोहरौद्रस्य चिताग्नेरिव भीषणा ।
भीति[5] सर्वजनोद्वेगकारिणी कोपयुज्यते ॥ १७५ ॥

---

१ 'दैन्यानां' ख २ जीवन्त्यर्थक्षये नीचा याच्ञोपप्लव' ख ३ 'इत्युक्ते' क-ग
४ 'चिराश्रय' क ग घ ५ 'भीति' क-ग

आशाक्षाश्रितपक्षपातविकला या शक्तिरुज्जृम्भते
दीर्घा वेतसवल्लरीव विफला कस्योपकाराय सा ।
वन्द्यश्चन्दनपादप पृथुभुजच्छायाश्रया यस्य ते
सताप प्रविहाय शीतलतया सर्पा सुख शेरते ॥ १७६ ॥
प्रदानफलशून्याभि किमेताभिर्विभूतिभि ।
दृश्यते यासु भग्नाशाविमुख मुखमर्थिनाम् ॥ १७७ ॥
आयाति धातुरादेशात्तदादिष्ट पलायते ।
न त्यागेन न भोगेन क्षीयते रक्ष्यते धनम् ॥ १७८ ॥
निर्बन्धादपि लुब्धेन निरुद्ध बद्धमुष्टिना ।
निर्यात्यलक्षित क्षिप्र मत्स्यपुच्छोपम धनम् ॥ १७९ ॥
कुर्वन्ति सुधियो यत्नादेतदर्थं[1] धनार्जनम् ।
आर्तोपकारसतोष कदाचिल्लभ्यते धनात् ॥ १८० ॥
क्षणेन वृद्धिं व्रजता क्षणात्क्षयमुपेयुषाम् ।
अनाना च धनाना च केन विज्ञायते गति ॥ १८१ ॥
गुप्त विनष्ट प्रकट विनष्ट कीर्ण विनष्ट मिलित विनष्टम् ।
स्खय विनष्ट परतो विनष्ट दीनार्तदत्त[2] द्रविण न नष्टम् ॥ १८२ ॥
मृत्पाषाणगुणै सुवर्णमणिभि शुक्त्यस्थिभिर्मौक्तिकै[3]-
र्लोके मूढतमे धन धनमिति व्यक्त्या प्रसिद्धिं गतै ।
य कोष क्रियते न तस्य रुचिर पश्यामि किंचित्फल
नि शेषाश्रितभृत्यबान्धवसुहृद्दीनार्थिदान विना ॥ १८३ ॥
त्यक्ता मर्त्यभुव स्थितस्य विजने मेरो सुवर्णश्रिय
विश्रान्ता स्वशरीर एव वहत किं निष्फलेनायुषा ।
एकस्योन्नतिरेव सत्त्ववसतेर्विन्ध्यस्य वन्द्या न सा
दत्त्वा य किल तामनन्यमहिमां शेते सुख भूसम ॥ १८४ ॥
इत्युक्त बलिना श्रुत्वा चिन्तयन्भवितव्यताम् ।
किंचिदालक्ष्य वैलक्ष्य शुक्रश्चक्रे नत शिर ॥ १८५ ॥

---

१ 'अर्ति' ख २ 'अर्थे' ग ३ 'मुक्त' ख ४ 'शुक्त्यस्थिकै' घ

अथाश्वमेधसभार प्रावर्तत महान्बले ।
पुन प्रदानदक्षस्य दक्षस्येवापरिक्षय ॥ १८६ ॥
तत प्रजापतिगणे प्राप्ते सप्तर्षिभि सह ।
अभूत्सुरर्षिभिर्जुष्ट ब्रह्मलोकनिभ सद ॥ १८७ ॥
तस्मिन्क्रतौ महादानपरिपूर्णेऽर्थिमण्डले ।
बभूव याचकाभावाद्भूलेश्चिन्तैव केवलम् ॥ १८८ ॥
अत्रान्तरे दैत्यजयासहिष्णुर्विष्णुस्त्रिलोकीकुशलप्रवृत्त ।
देवस्तनु स्वा बलिवञ्चनाय विश्वाकृतिर्वामनता निनाय ॥ १८९ ॥
धृतैव चित्ते लघुता करोति या धैर्यमानाहरणैकभूमि ।
सा दुर्दशेवातिशयेन याच्ञा न कस्य मानक्षतिमातनोति ॥ १९० ॥
श्याम शिशु कुञ्चितकृष्णकेशस्त्रिदण्डिकालकृतपाणिपद्म ।
सकङ्कण कुण्डलवान्किरीटी स ब्रह्मराज्य(१)प्रतिमश्चकाशे ॥ १९१ ॥
स मञ्जुसामस्वरसारणोद्यद्दन्ताशुसूत्रत्रयसनिवेशम् ।
यज्ञोपवीत धवल दधान शनैर्बलेर्यज्ञमहीमवाप ॥ १९२ ॥
स वेत्रिभिस्तत्र सुदुर्लभार्थिसदर्शनात्यादरविस्मयेन ।
असंनिरुद्ध प्रसभ प्रविश्य वृत मुनीन्द्रैर्बलिमाल्लुलोके ॥ १९३ ॥
बलिश्च त पद्मदलायताक्ष विलोक्य लक्ष्मीनिलय प्रहृष्ट ।
अदापयत्तस्य सुवर्णपीठ समुन्नत मानमिवादरेण ॥ १९४ ॥
सामस्वरेणाशिषमभ्युदीर्य क्षण स विश्रम्य जगाद धीर ।
संदर्शयन्दन्तरुचा तरस्थजगत्त्रयश्चान्द्रमिव प्रकाशम् ॥ १९५ ॥
इन्द्रस्य चन्द्रस्य चतुर्मुखस्य रुद्रस्य दक्षस्य मनोश्च यज्ञा ।
पुरा बभूवुर्न बभूव कश्चिदाश्चर्यकृत्त्वत्सदृशस्तु यज्ञ ॥ १९६ ॥
अहो महात्मा सुकृती जगत्सु जातस्त्वमेवाद्भुतसत्त्वसिन्धु ।
यश्चारुरत्नाश्वगजेन्द्रचन्द्रलक्ष्मीप्रदानेष्वपि निष्प्रकम्प ॥ १९७ ॥
धवस्त्रिलोक्यास्तिलक कुलस्य सर्वस्वदानेष्वतिमुक्तहस्त ।
दत्त्वाप्यशोक सरल प्रकृत्या त्व श्रीफलोऽप्यर्थिषु कल्पवृक्ष ॥१९८॥

---

१ 'पद्मदलायतेक्षण' ख २ 'सुवर्ण' इति क पुस्तके टिप्पणम्

इत्युक्तमत्यर्थसुधास्वभाव[1] तेनान्तरस्थामृतसिन्धुनेव ।
श्रुत्वा बलि प्रीतिविकोसिताक्षस्तमस्यधादागतपक्षपात[2] ॥ १९९ ॥
अल्प वय स्वल्पशरीरतेयमनल्पकल्प प्रतिभाविकल्प ।
कर्णानुकूल च वचस्तवैतत्कस्याद्भुतार्थं न मन करोति ॥ २०० ॥
हर्षं वर्षति दर्शन नयनयो सूते श्रुतौ वाक्सुधा
चित्त चन्दनपेशलश्च सहसा[3] स्नेह पर लिम्पति ।
बध्नन्त्यन्यमनस्कतामपि गुणा भाग्यैर्भवत्सगम
सजात सुकृताय मे सुमहते कीर्तिप्ररोहाय च ॥ २०१ ॥
निरर्गल संप्रति कथ्यता तद्यदीप्सित [4]प्रीतिपदोपयुक्तम् ।
सर्वस्वमेतन्मम जीवित वा न नाम किंचिद्भवतेऽस्त्यदेयम् ॥ २०२ ॥
इति प्रयत्नात्प्रथमादरेण सोऽभ्यर्थित सर्वपरिग्रहाय ।
दैत्याधिपेन प्रथमानमानमहोदयाय प्रणयात्तमूचे ॥ २०३ ॥
त्वद्दर्शनात्प्रीतिसुधानिधानात्पर किमस्मादुपयुज्यते मे ।
न नाम वन्ध्य क्रियते वचस्ते पदत्रयीं देहि वसुधराया ॥ २०४ ॥
श्रुत्वैवमाश्चर्यतर वचस्तद्बलि सवैलक्ष्यमिवाबभाषे ।
अहो भवान्सकुचितार्थवादी विडम्बनायैव मम प्रवृत्त ॥ २०५ ॥
अह प्रदाता त्वमुदारशील [5]प्रतिग्रहीतात्र [6]पदत्रयी किम् ।
प्रदीयते यद्यवमानलीला विनिर्मिता नर्ममयी सिताय ॥ २०६ ॥
गृहाण सर्वं मम विद्यते यत्त्वद्दर्शनानन्दसमुद्भवस्य ।
मन प्रसादस्य हि सत्यमस्य न तुल्यमूल्या सकला त्रिलोकी ॥ २०७ ॥
इत्यर्थित पूर्णपरिग्रहाय पुन प्रयत्नाद्बलिनापि देव ।
यदाग्रहीन्नाभ्यधिक तदासौ पदत्रयीमेव बलिर्दिदेश ॥ २०८ ॥
प्रतिग्रहाम्भावसरेऽथ विष्णोरुत्तानहस्ताम्बुरुहेऽम्बुधाराम् ।
सुवर्णभृङ्गारमुखात्पतन्तीमस्तम्भयद्दैत्यहिताय शुक्र ॥ २०९ ॥

---

१ 'अत्यन्तसुधास्वभाव' ग घ २ 'विकासिचक्षु' घ ३ वपुश्रि' क पुस्तके पाठान्तरत्वेन धृत ४ 'प्रीतिपदप्रयुक्तम्' ख ५. 'सवैलक्ष्य' ख ६ 'प्रतिग्रही तत्र पदत्रयी' ख ७ 'प्रतिग्रह'

त शुक्रवक्रक्रममाकलय्य चक्री त्रिलोक्याक्रमणाभिकाम ।
लोकसिताङ्क कुशतूलिकाग्रभेदेन चक्रे कविमेकनेत्रम् ॥ २१० ॥
विश्वाकृतिर्दानजल गृहीत्वा लोकत्रयाक्रान्तिविवर्धमान ।
बभौ जगन्मण्डपमानदण्डशोभाभिरामोदितदण्डपाद ॥ २११ ॥
त्रैलोक्याक्रान्तिलीलाप्रविसृतवपुष श्रीपतेर्दण्डपाद
प्रौढोत्क्षेपोग्रवेगोल्लसदतुलबलोद्भ्रान्तकल्पान्तवात[1] ।
नि शेषाशाप्रबन्धप्रचलनभुवनाखण्डनाकाण्डकम्प-
भ्रश्यद्ब्रह्माण्डरक्षानिहितमरकतस्तम्भशोभा बभार ॥ २१२ ॥
प्रवर्धमानस्य विलम्बिहारपर्यन्तसक्तस्तरणिर्मुहूर्तम् ।
विष्णोर्बभौ नाभिभवाब्जचुम्बी कुर्वन्मुहुर्लोहितरत्नशङ्काम् ॥ २१३ ॥
प्राप्तेऽथ विष्णोश्चरणारविन्दे विरञ्चिलोक त्रिदशाभिनन्द्ये ।
पादार्घ्यदानावसरेऽब्जजन्मा कमण्डलु निर्जलमालुलोके ॥ २१४ ॥
घर्मे द्रुते तत्क्षणमम्बुभाव यातेऽथ पाद्ये कमलासनेन ।
भक्त्या प्रदत्ते बलिकीर्तिशुभ्रा तरङ्गभङ्गैरुदियाय गङ्गा ॥ २१५ ॥
किं विष्णो पादपद्मस्फुटनखकिरणश्रेणिरच्छोच्छलन्ती
विश्वव्याप्तिप्रजातोर्जितविजयलसद्वैजयन्ती सिता किम् ।
किं स्वर्गश्रीप्रहर्षोचितहसितरुचि प्रोन्मिषत्संशयाना-
मित्युच्चै. खेचराणा चिरममरसरित्सभ्रमेऽभूत्प्रवाद ॥ २१६ ॥

एकक्रमावृतसमस्तजगत्त्रयस्य
शेषक्रमद्वितयदानविशुद्धिधीर[2] ।
निर्व्याजधर्मधवल स्थिरसत्त्वसत्य-
स्तत्याज दैत्यतिलक सकला त्रिलोकीम् ॥ २१७ ॥
तस्याथ सैत्यसमयप्रतिपन्नसर्व-
त्यागस्य दीर्घगुणपाशनियन्त्रितस्य[3] ।
धीरस्य सप्तमतलान्तसुतालनाम्नि
पातालधाम्नि भगवान्स्थितिमादिदेश ॥ २१८ ॥

---

१ 'वेलोल्लसत्' क ग घ २ 'चारविशुद्ध' क ग घ ३ 'सत्त्व' ख.

जातो जगत्युचितकुड्मलिरेक एव
तस्यैव सप्तभुवनाभरण यशासि ।
येनातिदानविततद्रविणावशेष-
शुद्धि कृता स्वतनुबन्धसमर्पणेन ॥ २१९ ॥
अश्रद्धया कुहकदम्भभरेण यद्य-
त्पित्र्यक्रतुव्रतजपादि करोति लोक ।
तत्तद्बलेर्नियमसकलितात्मवृत्ते
र्वृत्त्यै विचार्य परिकल्पितमच्युतेन ॥ २२० ॥
साश्चर्यं युधि शौर्यमप्रतिहत तत्खण्डिताखण्डल
याच्ञोत्तानकर कृत स भगवान्दानेन लक्ष्मीपति ।
ऐश्वर्यं स्वकरासप्तसप्तभुवन लब्धाब्धिपार यश
सर्वं दुर्जनसगमेन सहसा स्पष्ट विनष्ट बले ॥ २२१ ॥
सशरशबरत्रासत्वङ्नन्मृगीतरला श्रिय
सुखमपि कपिप्रेङ्खद्वल्लीदलाञ्चलचञ्चलम् ।
प्रतिदिनमिय भुङ्क्ते जन्तोरभावविधायिनी
प्रसभपतिता भाव भाव भवे भवितव्यता ॥ २२२ ॥
इति स भगवान्विष्णु कर्तुं सुराश्रयिणीं श्रिय
बलिभुजतरुच्छायाहीनान्विधाय महासुरान् ।
अपि खलजनासङ्गाद्भूमेर्गतस्य तल बले
प्रणयरचिता पुण्यै कीर्तिं निनाय समुन्नतिम् ॥ २२३ ॥

इति श्रीव्यासदासापराख्यश्रीक्षेमेन्द्रविरचिते दशावतारचरिते वामनावतार पञ्चम ।

---

६ परशुरामावतार षष्ठ ।

बद्धे बलौ निश्चलधर्मसेतौ भग्नेषु दैत्येषु निराश्रयेषु ।
बभूव निर्विघ्नमहोत्सवश्रीर्नि शल्यकल्याणवती त्रिलोकी ॥ १ ॥

---

१ 'उत्' ख २ 'प्राप्तवत्' क ग घ ३ 'भावे भावे' घ ४ 'रचनां' ख
५ 'घनोत्सव' ख

शक्रेण वृत्रे निहते सजम्भे सुम्भे निसुम्भे प्रसभं भवान्या ।
जीर्णेऽप्यगस्त्येन समस्तलोकशोकेऽथ वातापिनि सेल्वले च ॥ २ ॥
चामुण्डया चण्डपराक्रमे च ग्रस्तेऽथ पातालततानने न ।
रुरौ रणप्रच्युतरक्तबिन्दुवृन्दोदरोद्यद्रुरुकोटिलक्ष्ये ॥ ३ ॥
गुहेन भिन्ने युधि तारके च गजासुरे धूर्जटिनान्धके च ।
दैत्येषु चान्येषु हतेषु देवैर्निं शङ्कमासीत्सुरराजराज्यम् ॥ ४ ॥
यातेऽथ काले शनकैर्विशाले दैत्येश्वरा क्ष्मामवतीर्य सर्वे ।
क्रमेण ते दुर्मददस्युरूपा सपापशापा क्षितिपा बभूवु ॥ ५ ॥
शशास तस्मिन्समये महीयान्महीपतिर्हैहयवंशजन्मा[1] ।
प्राज्योर्जितश्रीर्जगदर्जुनाख्य सहस्रबाहु कृतवीर्यसूनु ॥ ६ ॥
स्पर्धानुबन्धोद्धतदर्पयुद्धसनद्धधीर दशकधरं य ।
गदाग्रहेलाहतिनष्टचेष्ट शय्याङ्कपर्यङ्कतले बबन्ध ॥ ७ ॥
अत्रान्तरे शौर्यनिधिर्भृगूणा कुले विशाले जमदग्निपुत्र ।
हरिस्तम कुञ्जरपुञ्जभेदी प्रतापदीप्तोऽवततार राम ॥ ८ ॥
तस्योपदेष्टा भगवान्बभूव शार्ङ्गे धनुर्वेदविधौ पिनाकी ।
आदानसंधानदृढातिदूरलक्ष्येषु दत्ताद्भुतलक्षशिक्ष ॥ ९ ॥
शस्त्रास्त्रविद्याविदितप्रकर्षसंघर्षयुद्धे[2] जिततारकारि ।
पुत्राधिका वल्लभता गुणेन जगाम रामस्त्रिपुरान्तकस्य ॥ १० ॥
मदग्रहोद्दग्रगजासुरास्थिविसस्थुलाखण्डनखण्डधारम् ।
ददौ त्रिशूली परशु स्वमंसै क्रूर कुमारावजयेन तुष्ट ॥ ११ ॥
तत कदाचिन्मृगयारसेन स कार्तवीर्य प्रविसारिसैन्य ।
वन विगाह्य क्षयमक्षयेषुश्चक्रे मृगद्वीपिमृगेश्वराणाम् ॥ १२ ॥
मन्नद्विषा दु सहमोहहेतुर्दयादरिद्र हृदय सदैव ।
कर्षत्यल शोणितमांसलुब्धा धराधराणा मृगयापिशाची ॥ १३ ॥
तुरङ्गसेनामृदितस्थलानि शराहताशेषमृगद्विपानि ।
विश्वद्रुतोपद्रुततापसानि[3] प्रविश्य चक्रे स तपोवनानि ॥ १४ ॥

---

१ 'हेहय क-ग घ २ 'सघट्ट' ख ३ 'विश्वद्रवोपद्रुत' ख

अथाश्रमाग्र जमदग्निजुष्ट भग्नद्रुम रुग्णविविग्नसत्त्वम् ।
कृत्वा शनै श्रान्तहय स तस्थौ विश्रामकाम कुसुमस्थलीषु ॥ १५ ॥
होमावशेषै सकुशै पयोभि सवर्धिताना स कुरङ्गकाणाम् ।
मुनीन्द्रशिष्यैरपि वार्यमाण सैन्यै क्षय निष्करुणश्चकार ॥ १६ ॥
स कामधेनु मुनिहोमहव्ययोग्या सवत्सा गुणगौरवेण ।
कण्ठे गृहीत्वा जमदग्निनापि रुद्धा मदान्धस्तरसा जहार ॥ १७ ॥
क्रौर्येण कीर्तिर्व्यसनेन लक्ष्मीर्द्वेषेण विद्या विनतिर्मदेन ।
क्षमातिकोपेन धृतिर्भयेन प्रयाति लोभेन च सर्वमेव ॥ १८ ॥
यात स हृत्वा मुनिहोमधेनु लोभेन विक्रीतविवेकसत्त्व ।
यशासि लोकत्रयविश्रुतानि चकार धिक्कारकलङ्कितानि ॥ १९ ॥
निरुद्धाशा सर्वे दधति भृशमुद्वेगकलना
विवेकालोकस्य प्रभवति न लेश क्वचिदपि ।
न मित्रस्यालोको भवति परिहारेण वदने (?)
घने लोभे जन्तो स्थितिमुपगते कस्य सुगति ॥ २० ॥
गतेऽथ तस्मिन्नृपतौ स्वदेश महामुनीना विहितापकारे ।
राम समभ्येत्य गजाश्वभग्न तपोवन निर्मृगमाकुलेके ॥ २१ ॥
निवृत्तवेदस्मृतियज्ञविद्यापुराणवाद विरताग्निकार्यम् ।
भग्ननोद्विग्नजन विलोक्य तपोवन प्राप च शोकशङ्कुम् ॥ २२ ॥
विज्ञाय राज्ञा तदशर्म कर्म स कार्तवीर्येण कृत सकोप ।
शुश्राव तेनैव पितु सवत्सा बलेन नीतामपि होमधेनुम् ॥ २३ ॥
स निश्वसन्दु सहकोपकम्पलुठज्जटाभारभृतांसकूट ।
क्षत्रक्षयोत्कण्ठमकुण्ठधार कुठारमादाय जवाज्जगाम ॥ २४ ॥
स हैहयीं हेममयीमवाप्य प्रतापदीप्तामिव राजधानीम् ।
युद्धाय सनद्धभुजासहस्रमस्तस्थैर्योऽर्जुनमाजुहाव ॥ २५ ॥
तयो प्रवृत्ते भुवनप्रकम्पदीक्षाक्षमे सक्षयधाम्नि युद्धे ।
क्षोभ प्रभूताद्भुतसभ्रमोऽभूदभूतभूताभिभवप्रगल्भ ॥ २६ ॥

---

१ 'अथावसा-त' ग घ २ 'स' ख ३ 'पीठ' ख ४ 'प्रकम्प' क-ग घ

[1]तस्याषण्ढप्रताप कठिनमदभराकुण्ठकण्ठस्य वेगा-
न्निक्षिप्य स्कन्धपीठे गिरिदलनसह घोर[2]धार कुठारम् ।
भूभर्तुर्धेनुचौर्याचरणघनरुषा कार्तवीर्यस्य राम
[3]स्तासं दो सहस्र युधि नवनलिनीनाललाव [4]लुलाव ॥ २७ ॥
प्रतापमित्रे निहते सहस्रकरेऽथ तस्मिन्भुवनैकशूरे ।
रामस्य निर्यन्त्रनिपातितारेर्मर्मप्रसारी न शशाम मन्यु ॥ २८ ॥
द्विबाहुना बाहुसहस्रदीप्ते हते नृशत्रे मुनिना प्रसह्य ।
स शृङ्गभङ्ग क्षितिभृत्कुलस्य तीव्र पर मानविनाशनोऽभूत् ॥२९॥
कालेन तन्मन्युर्धेनानुतापा पापाय सर्वे मिलिता क्षितीशा ।
वैरप्रतीकारविधानसज्जा जग्मुर्वन भार्गवकुञ्जरस्य ॥ ३० ॥
रामे फलेध्माहरणाय याते शून्य प्रविश्याथ तपोवन ते ।
निष्कृत्तकण्ठस्रुतशोणितौघमग्न निजभ्रुर्जमदग्निमेव ॥ ३१ ॥
रामस्तत पितृवधोद्धतशोकवह्ने
शान्तिं न बाष्पजलबिन्दुभिरप्यवेत्य ।
आसीत्क्षण क्षितिपर्[6]जीवितजातलज्ज
स्तद्रक्तसागरनिमज्जनसज्ज एव ॥ ३२ ॥
गत्वा जवेन रणयज्ञविधानदीक्षा-
क्षेत्र क्षणात्क्षितिपवशवनोग्रवह्नि ।
कृत्वा समस्तनृपसंहतिमेकवार
वैरी[7]क्षयेण [8]न मनाग्विरराम राम ॥ ३३ ॥
स्नात्वा रक्तपूर्णे रणसरसि [9]लसत्कीर्तिधौतोत्तरीय
क्रोधानृण्य विधातु कृतसकलजगत्क्षत्रवशाग्निकार्य ।
श्राद्धश्रद्धाविधान व्यधित शरकुशाकीर्णभूपालमौलि-
श्रेणीहेमाशुनिर्यत्तिललवकलितन्यस्ततन्मुडपिण्ड [10]॥ ३४ ॥

---

१ 'तस्याकुण्ठ' ख २ 'कर्मधारं' ख, 'कर्मधारे' घ ३ 'संस्रस्त' ख ४ 'घनाभितापा' ख ५ 'निकृत्त' ख ६ जीवन' ख ७ वैरि' ख ८ 'स' ग ९ लुठत्' क १० 'तिम्यत्' ख

निक्षत्रा[1] क्षत्रियारिर्जलनिधिपरिखामेखलान्तामखिन्न
कृत्वा त्रि सप्तकृत्व पितृवरनिधनक्रोधन क्ष्मा क्षणेन ।
य प्रादादेकविप्रार्पितजलचुलुकस्तोकदानातिलज्जा-
मज्जन्मानाननाब्ज सितसितयशसस्तस्य किं वर्ण्यतेऽन्यत् ॥ ३५ ॥

इति श्रीव्यासदासापराख्यश्रीक्षेमे द्रविरचिते दशावतारचरिते परशुरामावतार षष्ठ ।

---

७ रामावतार सप्तम ।

कालप्रवाहे महति प्रयाते तन्मध्यवेगाभिरते गते च ।
तरङ्गलोलाद्भुतभाववर्गे रक्ष कुलैर्भारयुताभवद्भू ॥ १ ॥
अत्रान्तरे सालकटङ्कटाना[3] वशे विशाले क्षणदाचराणाम् ।
पुष्पोत्कटा नाम बभूव कन्या तारुण्यदर्पेऽपि विवाहहीना ॥ २ ॥
सा मेरुपार्श्वे मणिहेमवल्लीविलासरम्योपवने चरन्ती ।
सुत पुलस्त्यस्य तपोनिधान सध्याक्षणे विश्रवस ददर्श ॥ ३ ॥
ध्यानावसाने मुनिना सकम्पा प्रीत्याथ सा तेन विलोकितैव ।
नवाभिलाषोद्भवविह्वलेव भावान्विता गर्भवती बभूव ॥ ४ ॥
क्रमेण तेनैव मुने सपर्याविधायिनी तस्य तपोवने सा ।
असूत पुत्रत्रितय विचित्रकर्मप्रकारेण विभिन्नरूपम् ॥ ५ ॥
दशाननाद्या परिवर्धमानाश्चक्रुश्चिर घोरतर तपस्ते ।
पितामहप्रीतिवरादवापुर्येन त्रिलोकीक्षपणक्षमत्वम् ॥ ६ ॥
महेश्वराराधनहोमवह्नौ छित्त्वा दशास्य स्वशिरासि हुत्वा ।
जम्भारिसाम्राज्यजयी जगाम जगत्त्रयीलुण्ठनकण्टकत्वम् ॥ ७ ॥
त्रैलोक्यपुण्यैरथ कुम्भकर्णस्तपोवराप्तौ विपरीतवाचा ।
अक्षीणनिद्र सतत बभूव प्रबोधनादेकदिनाशभोज्य ॥ ८ ॥
वरप्रदानेऽथ विधिं ययाचे बिभीषणो धर्ममतिं मनीषी ।
तद्वाक्यतुष्टेन पितामहेन नीत स धीमानमरत्वमेव ॥ ९ ॥

---

१ 'नि क्षत्रा' क ग, 'निष्क्षत्रा' घ २ 'भार्गवावतार' क-ग घ ३ 'कटो त्कटाना' ख

भ्रातुर्बलाद्वैश्रवणस्य लङ्का हृत्वा[1] पुरीं रत्नहिरण्यहर्म्याम् ।
दशानन' पुष्पकमुज्ज्वल च विमानराज विजयोद्यतोऽभूत् ॥ १० ॥
जित्वा स विश्व विगतारिचिन्त संजातसङ्गामवियोगखेद ।
लोकत्रये चित्तविनोदनाय विमानमारुह्य चिर चचार ॥ ११ ॥
स निर्झरोद्गारतुषारशैलसुवर्णरत्नोज्ज्वलतुङ्गशृङ्गे ।
क्षण न्यषीदद्दिवसावसाने तद्भीतिलीनासिव पद्मिनीषु ॥ १२ ॥
ताप मुहुर्दिक्पतिवल्लभाना करावमर्षै[2] ककुभा विधाय ।
कुमुद्वतीबन्धनपापशापाज्जगाम दु शील इवास्तमर्क[3] ॥ १३ ॥
साध्य प्रकाश परिपीय रक्त निजौजसा लोकनिमीलनानि[2] ।
निशागमोत्साहपद क्रमेण तमासि रक्षासि च तुल्यमापु ॥ १४ ॥
अथोदयावग्रसरप्रकाशभ्रश्यत्तम स्तोकयुतान्तरिक्षे ।
सुधातरङ्गाकुलकालकूटकरम्बिते क्षीरनिधाविवेन्दु ॥ १५ ॥
तम समूहस्तरुकुञ्जपुञ्जतलस्थितश्चान्द्रमस प्रकाशम् ।
बभौ दशग्रीव इव प्रयत्नात्कैलासमुल्लासयितु प्रवृत्त ॥ १६ ॥
जहार लक्ष्मी कमलाकराणा चकार भङ्ग सुरचक्रनाम्नाम् ।
बभार दोषाश्रयवान्कलङ्क लङ्कापतिर्दिग्विजयीव चन्द्र ॥ १७ ॥
हृन्मर्मसल्लशिलीमुखेषु दीर्णेषु सद्य कुमुदव्रजेषु ।
सर सु चन्द्रप्रतिबिम्बमूर्तिर्दशास्यभीत्येव मुहुश्चकम्पे ॥ १८ ॥
समीरा सोत्कण्ठा इव ललितवल्लीकुलवधू-
समाकर्षै[4] क्रीडानिबिडदशकण्ठानुकृतय ।
विचेरुर्वापीना कुमुदमधुमाद्यन्मधुकरा-
कुलश्रेणीवेणीहठहरणहेलातरलिता ॥ १९ ॥
उन्निद्रचन्द्राभरणे निशीथे तस्मिन्महानन्दघनप्रकाशे ।
प्रीति सुखस्पर्शमयी बभूव वैराग्यभाजामनुरागिणा च ॥ २० ॥
लङ्केश्वरस्तत्र शशाङ्करत्नशिलातले रश्मिविलासहासे ।
सुख शयान पुरत प्रयाती जितेन्द्रलक्ष्मीं ललना ददर्श ॥ २१ ॥

---

१ हित्वा' ख २ निमीलितानि ख ३ मुखी' क ख ४ वनिता' ख

दशाननोत्सादितनाकलोकलक्ष्मीमिवैका विजने भ्रमन्तीम् ।
मैत्रीमिव प्रेमभराभिरामा तारुण्यलावण्यमनोभवानाम् ॥ २२ ॥
विलोक्य लङ्कापतिरङ्कमुक्तशशाङ्कशङ्काजननानना ताम् ।
स्वप्नेऽप्यदृष्टा मनसाप्यचिन्त्या हर्षामृतक्षैव्यमिवाससाद ॥ २३ ॥
अचिन्तितापातकिरातभीता मृगीमिवालम्ब्य बलेन पाणौ ।
स ता बभाषे विभवाभिमान तद्भोगशून्य विफल विचिन्त्य ॥ २४ ॥
कस्यान्तिक कुञ्जरगामिनि त्व प्रयासि धन्यस्य रणोज्झितासो ।
आराधित केन तपोविशेषै सौभाग्यभूमिर्भगवा मनोभू ॥ २५ ॥
न त्यज्यसे[1] सुभ्रु कुरु प्रसाद लब्धा सुधा मुञ्चति मन्दपुण्य ।
त्यक्तान्ययत्नोपनतानि[2] मोहात्पुनर्न लभ्यानि समीहितानि ॥ २६ ॥
इति ब्रुवाणेन दशाननेन तन्वी घनालिङ्गनपीडिताङ्गी ।
काञ्चीविमुक्तिप्रतिषेधदिग्ध वैलक्ष्यमुग्धाक्षरमाचचक्षे ॥ २७ ॥
बलेन नीवी ननु न प्रमोच्या विमुञ्च मा दुर्व्यसनस्पृहा च ।
अशीललीलाशकलीकृता त्व ह्रिय श्रिय रक्ष यश कुल च ॥ २८ ॥
रम्भाभिधाना सुरलोककान्ता त्वद्भ्रातृसूनोर्नडकूबरस्य[3] ।
प्राणोपमाना धनदात्मजस्य[4] न वेत्सि किं मौ सुमते क्षुषा त्वम्[5] ॥२९॥
इति ब्रुवाणामबला बलेन सदूष्य मातङ्ग इवाङ्गिनीं ताम् ।
म्लाननानाङ्गामवमानलीना लज्जानिमज्जद्वदना मुमोच ॥ ३० ॥
उच्छिष्टाधरपल्लवा नखमुखोल्लेखावखातस्तनीं
विस्रस्ताशुककेशपाशकुसुमामुत्कम्पिनीं मन्युना ।
श्वासायासवतीं सबाष्पनयना तन्वीं वहन्ती तनु
सा गत्वा नडकूबरस्य विदित पौलस्त्यवृत्त व्यधात् ॥ ३१ ॥
दृष्ट्वाभिभूता नडकूबरस्ता श्रुत्वा कुवृत्त च निशाचरस्य ।
अकामका तारतिसगमान्त तस्यास्तु दुर्जीवितमित्युवाच ॥ ३२ ॥

---

१ 'त्याज्यसे' क-ग घ २ 'उपगतानि' क, 'उपहितानि' ख ३ 'धनदात्मजस्य' ख ४ 'नडकूबरस्य' ख ५ 'त्व सुमते क्षुषां माम्' ख

नक्तंचरैस्तत्क्षणवर्ण्यमान तच्छापमाकर्ण्य भृशं दशास्य ।
अन्तर्वहन्दुश्चरितानुताप विमानमारुह्य शनैर्जगाम[1] ॥ ३३ ॥

सुखक्षैब्यक्षामा प्रकटमवटापातगतय
क्षिपन्त शीलाख्य व्यसनमविलक्ष्या क्षतधिय ।
स्खलन्त कुर्वन्ति प्रसभमवलेपेन किल त-
द्यदुद्भूतस्ताप प्रचलति न जीवान्तनियत ॥ ३४ ॥

व्योम्ना व्रजन्त पुरतस्तमेत्य माहेश्वर प्राह गण सकोप ।
हहो निवर्तस्व भजस्व नीतिं व्योम्ना गतिर्नेह नभश्चराणाम् ॥ ३५ ॥

सतीसहाय स्फटिकाद्रिशृङ्गे देवो मृड क्रीडति चन्द्रचूड ।
पार्श्वेन यात्यत्र मरीचिमाली भयेन नोच्चैर्मरुतोऽपि वान्ति ॥ ३६ ॥

श्रुत्वा मदोद्धारगिर गणस्य दुष्टद्विप कृष्ट इवाङ्कुशेन ।
दष्टाधर कोपकषायचक्षुर्नोवाच किंचित्स[3] हरानुरोधात् ॥ ३७ ॥

श्वसन्विमानादवरुह्य सज्ज स मज्जयन्भूमिमिवाभ्युपेत्य ।
स्कन्धेन[4] पातालतलातमूलात्कैलासमुल्लासितमुज्जहार ॥ ३८ ॥

विघूर्णमानाद्रिगुहागृहेभ्य समन्तत सभ्रमविद्रुतानाम् ।
सत्रस्तविद्याधरसुन्दरीणा काञ्चीरवै ख मुखरीबभूव ॥ ३९ ॥

क्ष्मान्तोत्क्षेपातिवेगप्रसरदनलसोल्लासकैलासकम्प-
क्षोभे बिभ्यद्भवानीनिभृतभुजलतालिङ्गितश्चन्द्रचूड ।
दाशास्यैर्हर्षहास व्यभजत चरणाकुञ्चिताङ्गुष्ठपीडा-
व्रीडानिर्भुग्नमीलन्नयनगलगलद्गर्गरोद्धाररावै ॥ ४० ॥

अत्युग्रावेण दशाननस्य प्रसादवान्रावण इत्यमिख्याम् ।
चक्रे पिनाकी प्रियता प्रयान्ति प्राय प्रभूणा विपरीतचेष्टा ॥ ४१ ॥

तुष्टात्पुन प्राप्य वर त्रिनेत्रात्त्रैलोक्यलक्ष्मीपरिभोगभव्यम् ।
व्रजन्विमानेन दशानन खे सकौतुक पुष्पकमित्युवाच ॥ ४२ ॥

---

१ 'तदा' ख २ जगामेत्यनन्तर इति नडकूबरशाप' इति ख पुस्तकेऽधिकम स्ते ३ 'सहसानुरोधात्' क ग घ ४ 'स्कन्देन' सर्वेषु पुस्तकेषु

य एष दूरात्कनकाचलस्य सलक्ष्यते दक्षिणपार्श्वदेशे ।
शृङ्गाग्रलग्नोज्ज्वलरत्नशैलस्तदङ्कविश्रान्तिसुखे ममेच्छा ॥ ४३ ॥
इति ब्रुवाण क्षणदाचरेन्द्र क्षणाद्विमानेन जवेन नीत ।
तस्माद्भुताद्रेर्विचचार पद्मा रत्नस्थले कल्पलतावृतान्ते ॥ ४४ ॥
वैदूर्यगारुत्मतपद्मरागवज्रेन्द्रनीलामलशैलशृङ्गम् ।
पश्यन्नवालोकनहर्षमानी न रावण कौतुकतृप्तिमाप ॥ ४५ ॥
क्वचित्स्खलन्निर्झरराजवन्त गुहागृहोद्गीर्णमहाट्टहासम् ।
भीत्येव नीहारपटावृतानि निमीलयन्त ककुभा मुखानि ॥ ४६ ॥
समुल्लसन्नीलमणिस्थलोरुस्थूलाशुपुञ्जोन्नतदण्डपादम् ।
पुन प्रवृत्त बलिवञ्चनाय व्याप्ताम्बर विष्णुमिवाप्रमेयम् ॥ ४७ ॥
बलान्वितोद्यद्धनकालनेमिं प्रह्लादसरब्धजलोद्भवोग्रम् ।
सतारकाग्र कटक वहन्त यात हिरण्याक्षमिवाचलत्वम् ॥ ४८ ॥
सविस्मयानन्ददृशा समन्तान्निर्वर्णयन्नेव मुहुर्महाद्रिम् ।
तदुच्चशृङ्गाश्रमधाम्नि दिव्या कन्यामपश्यत्स तप प्रसक्ताम् ॥ ४९ ॥
तन्वीं स्तनाभोगभरादवाप्तससक्तकृष्णाजिनगाढबन्धाम् ।
लतामिवोद्यत्स्तबकाभिलाषनि स्पन्दलीनालिकुलाभिरामाम् ॥ ५० ॥
पौलस्त्यविध्वस्तसमस्तलोकघनावमानानलतीव्रचिन्ताम् ।
शक्रश्रिय स्वर्गवियोगखिन्ना रक्ष क्षयायेव तप प्रवृत्ताम् ॥ ५१ ॥
ता वीक्ष्य रक्ष पतिरक्षयेन्दुमुखीं सखीनेत्रसुधा[1] निपीय ।
मेने तदुच्छिष्टरुचापि शिष्टा स्पृष्टा न सङ्क्लिष्टनिकृष्टसृष्टिम् ॥ ५२ ॥
पुन सदाचारपरम्परार्हपाद्यासनादिप्रणयप्रवृत्ताम् ।
तामब्रवीद्भुतरूपसपत्सपन्नपूज क्षणदाचरेन्द्र ॥ ५३ ॥
का त्व मनोजन्मविवर्जितेव रतिर्विरागव्रतदुर्ग्रहेण ।
मदेन विद्या कपटेन मैत्री लोभेन लक्ष्मीरिव लुप्तशोभा ॥ ५४ ॥
ध्यानावधान परमोऽवमानस्नपाकर पात्रमथाक्षसूत्रम् ।
वने निवासस्तव यौवनेऽसिञ्जपश्च शाप कुसुमायुधस्य ॥ ५५ ॥

---

१ 'सुखी' ग सखीं' घ

त्यक्त्वाग्रह ब्रूहि विचिन्त्य तन्वि त्वमेव सत्य यदि युक्तमेतत्।
बिम्बाधरे चुम्बनकेलियोग्ये जपेन पापार्जनमेव मुग्धे ॥ ५६ ॥
निरञ्जनत्व कुसुमप्रसक्तिश्चित्र जटाबन्धनकारण ते।
अनङ्गराग कुरु मा शरीरमनङ्गराग वह चेतसि त्वम् ॥ ५७ ॥
भोगोत्सव मानय मा नय त्व क्लेशैरदोष कृशता शरीरम्।
अह हि ते तन्वि समीहिते च हिते च सपादनबद्धकक्ष ॥ ५८ ॥
शृङ्गारस्य गतैव भाग्यगुरुतानङ्गस्य नाङ्गस्पृहा
लावण्य घनमन्युदैन्यमलिन का यौवनस्योन्नति।
नोद्यान दयित मधुर्विधिहत कस्ये दुरानन्दन
कान्ते ते तपसि स्थिता यदि मतिस्तत्सर्वमस्त गतम् ॥ ५९ ॥
श्रुत्वैतदुक्त दशकधरेण सा किंचिदाकुञ्चितचेतनेव।
जगाद खेदेन विनि श्वसन्ती ह्रियावमानेन च मन्युना च ॥ ६० ॥
व्रते विवाद विमतिं विवेके सत्येऽतिशङ्का विनये विकारम्।
गुणेऽवमान कुशले निषेध धर्मे विरोध न करोति साधु ॥ ६१ ॥
कचस्य वाचस्पतिसभवस्य स्वाध्यायज्ञा वेदवती सुताहम्।
देया मयेय स्वयमच्युताय मनोरथोऽभूत्पितुरित्यय मे ॥ ६२ ॥
कालेन दैत्यै स हत पिता मे मातानल शोकमिव प्रविष्टा।
वरार्थिनी देवमनन्यचित्ता तप प्रवृत्ता हरिमर्थयेऽहम् ॥ ६३ ॥
इति ब्रुवाणा दशकधरस्ता गाढानुबन्धेन घनाभिलाष।
पुन पुन क्षीव इव प्रलापी कोपाग्निसतापवतीं चकार ॥ ६४ ॥
स्मृत्वा स शाप नडकूबरोक्त सत्यक्तकान्ताहठसङ्गवाञ्छ।
नखक्षतोच्छिष्टकुशस्थलीं ता कृत्वा जगाम स्वपुरीं सकाम ॥ ६५ ॥
सा मानिनी दुर्विषहावमान रक्ष करस्पर्शममृष्यमाणा।
कुलाभिमानेन्धनमात्मशुद्ध्यै[1] पूर्व प्रकोपाग्निमिवाविवेश ॥ ६६ ॥
चिर विचिन्त्याच्युतमच्युताशा जन्मास्तु मे राक्षससक्षयाय।
उक्त्वेति दृष्ट्वा रविमद्रिशृङ्गात्तापेन तन्वी तनुमुत्ससर्ज ॥ ६७ ॥

---

१ 'भिमान ख

अम्लान कुशल कुल च विमल सत्सङ्गगण्या गुणा
मान्या मानधनोन्नतिर्विनिधन धर्मावधान धनम् ।
कीर्तिर्मूर्तिरसक्षयाद्भुतवती शक्तिश्च सरक्ष्यते
जन्तोरिन्द्रियसयमेन सकल नष्ट न यस्यास्ति स ॥ ६८ ॥

प्रविश्य लङ्कामलका विजित्य हृत्वा पुनर्वैश्रवणस्य कोशम् ।
काले विशालेऽनिलवत्प्रयाते लङ्कापति पुष्पकमित्युवाच ॥ ६९ ॥
दृष्ट पुराश्चर्यगिरिर्मया य पुनस्तदालोकनकौतुक मे ।
रम्य निपीत बत नेत्रपात्रैर्न विस्मरत्येव मन कदाचित् ॥ ७० ॥
इत्यादराभ्यर्थनयन्त्रितेन नीत क्षणेनैव स पुष्पकेण ।
त देशमेत्यायतकालजिह्वालीढ न त प्रौढगिरिं ददर्श ॥ ७१ ॥
उत्पत्तिवृद्धिक्षयपाकयुक्त्या क्षणे क्षणे [1]दृष्टविनष्टसर्व ।
प्राय प्रपञ्चप्रणयी भवोऽयमभावसद्भावसमस्तभाव ॥ ७२ ॥
तत्राभ्यपश्यन्नगराण्यगण्यरत्नप्रयत्नक्रयविक्रयाणि ।
परस्परारब्धविरोध[2]युद्धसधानसन्नद्धधराधिपानि ॥ ७३ ॥
दृष्ट्वा तवाश्चर्यमचिन्त्यरूप चक्रभ्रमारूढ [3]इवाप्ररूढ ।
प्रौढोऽपि मूढत्वमिवानुभूय शनै स सप्राप्तधृति प्रदध्यौ ॥ ७४ ॥
अहो नु नानाद्भुतविभ्रमाणा हर्ता च कर्ता च सदैव काल ।
येनानिश दर्शयता विचित्र निपीतमन्यद्भुत वान्तमन्यत् ॥ ७५ ॥
क्षण विचिन्त्येति ययौ पुरी स्वामनित्यतानष्टधृतिर्दशास्य ।
गिरेर्वियोगाद्विचल द्वितीयमिवोद्वहन्विस्मयभारमन्त ॥ ७६ ॥
गते निगीर्णाद्भुतचक्रवाले काले विशाले बहुमोहजाले ।
स्मृत्वा समारुह्य विमानराज तमेव देश स पुनर्जगाम ॥ ७७ ॥
स तत्र चित्राणि पुराणि तानि न हेमहर्म्याणि न मन्दिराणि ।
स्वमान्तराणीव[4] कृतभ्रमाणि जन्मान्तराणीव[5] गतान्यपश्यत् ॥ ७८ ॥

---

१ 'दृष्ट्व' ग २ 'नियोग' ख ३ इव प्ररूढ' ग घ ४ 'एव' क ग घ.
५ 'एव' क ग घ

तत्राकुलोके स तमालतालतालीसहिन्तालनिरन्तरालम् ।
वन विशाल विवलत्पियालमालावलीसततनक्तमालम् ॥ ७९ ॥
घोरैर्घुरद्व्याघ्रघनप्रघोषैरिवोच्चरोमाञ्चचयाञ्चितानाम् ।
विशङ्कटैरुत्कटकण्टकाना व्याप्त समूहै खदिरद्रुमाणाम् ॥ ८० ॥
अन्त श्वसन्निश्चलदुष्टसत्त्वै कम्पप्रद पिप्पलपल्लवानाम् ।
तम पिशाचाचितमर्कभासा भीत्येव दूरात्परिवर्ज्यमानम् ॥ ८१ ॥
गतेष्वभाव नगरेषु तेषु दृष्ट्वा तदुग्र गहन गभीरम् ।
रक्ष पतिर्ग्रस्तसमस्तलोककुलाय कालाय नमश्चकार ॥ ८२ ॥
सोऽचिन्तयत्काल विहगमोऽयमलक्ष्यदाक्ष्यक्रमपक्षवेग ।
दिवानिश याति विचित्रशक्तिरहो कदाचिन्न चलत्यखिन्न ॥ ८३ ॥
अत्युच्चापातनिम्नोन्नतिकरणपटु श्लिष्टदूरस्थिताना-
मिष्टानिष्टव्रजाना सततमिव घनाश्लेषकेलिप्रसक्त ।
पर्यन्ताभावभूमिप्रपतनचतुरानन्यथा सर्वभावा
न्प्रात प्रातर्विधत्ते नवनवरचनाश्चर्यकृत्कालपाक ॥ ८४ ॥
इत्यद्भुतामाकलयन्नचिन्त्या कालस्य शक्तिं स विसस्थुलोऽभूत् ।
अनित्यताचिन्तनभङ्गभाजा नाङ्गानि केषा शिथिलीभवन्ति ॥ ८५ ॥
प्राप्त स लङ्का विभवोपभोगहर्षोत्सवैर्विस्मृतकाललील ।
मेने सुखक्षीबतयाक्षयाणि सभोगलीलाधनजीवितानि ॥ ८६ ॥
शनैं प्रयात क्षणसख्ययापि प्रवर्धमाने युगदीर्घकाले ।
पुनर्विमानेन तमेव देश कुतूहलात्त प्रययौ दशास्य ॥ ८७ ॥
स तत्र निर्घातघनप्रवाहदीर्णोर्वरानिष्क्रमणक्रमेण ।
ददर्श पातालमिवान्तहीन खात प्रजात भुवनत्रणाभम् ॥ ८८ ॥
क्षण तदालोकनभुग्नकण्ठ स्थित्वा प्रयात स पद स्वमेव ।
काले प्रयाते पुनरागतोऽथ स्मर समुद्रोपममभ्यपश्यत् ॥ ८९ ॥
अनन्तपद्मान्वितमप्रमेयमुदग्रनागेन्द्रसहस्रसेव्यम् ।
परागपुञ्जेन भुजगलोकमिवान्तराले कपिलेन जुष्टम् ॥ ९० ॥

---

१ निष्कुयण' क ख, निष्कृषण' ग

हसासकण्डूयनलोलनालफुल्लारविन्दोत्थितषट्पदानाम् ।
मुहु समूहैर्विहितान्धकार क्रोशन्निशाशङ्कितचक्रवाकम् ॥ ९१ ॥
स्वादूदक कोमलवीचिवात पद्मोज्ज्वल भृङ्गगणोपगीतम् ।
ससौरभ पुण्यवतामिवैक सर्वेन्द्रियाणामुपभोगपात्रम् ॥ ९२ ॥
सविभ्रम श्रीरमण परागपीताम्बर नाभिभवाद्भुताब्जम् ।
नीलोत्पलश्यामलमाकलय्य सर स नि स्पन्दतनु प्रदध्यौ ॥ ९३ ॥
अहो नु नेत्रार्पितकौतुकानि वैचित्र्यमैत्रीकृतविस्मयानि ।
पिबत्ययत्नेन कियन्ति काल सृजत्यजस्र च महाद्भुतानि ॥ ९४ ॥
क्षण विचिन्त्येति रसद्विवेक स शकरार्चारससादरोऽभूत् ।
अनित्यताचि तनखेदजम्भा न सद्विचार कुशलाय कस्य ॥ ९५ ॥

अय पिण्डक्रूर श्रयति न मन क्वापि मृदुता
न यावत्सस्पृष्ट सकलभवभावक्षयधिया ।
मनाक्तस्मिन्याते प्रशमलवपाकप्रणयिता
नमत्येतत्कस्य द्विजगुरुहरार्चासु न शिर ॥ ९६ ॥

सरस्तटे टङ्कितरत्नपीठे लिङ्ग विधाय स्फटिकाद्रिशृङ्गम् ।
सपुष्पकोपाहृतदिव्यपद्मैरर्चा चकारामृतरश्मिमौले ॥ ९७ ॥
स त्र्यम्बकस्याम्बरचुम्ब्यमाना विधाय पूजा कमलोपचारै ।
हृदस्य विष्णोरिव मध्यजात समादधे(दे) मूर्ध्नि विधातुमब्जम् ॥ ९८ ॥
तस्यान्तरे काञ्चनकर्णिकस्य विचित्ररत्नोज्ज्वलपल्वस्य ।
स दिव्यपद्मस्य ददर्श कन्या तद्धीतिलभामिव जात(तु) लक्ष्मीम् ॥९९॥
आदाय कन्या कमल विधाय तच्चन्द्रचूडस्य किरीटकोटौ ।
प्रीतिं वहन्विस्मयगर्भगुर्वीं लङ्केश्वर स्वा नगरीं जगाम ॥ १०० ॥
मन्दोदरी तद्दयिताथ तत्र तेनार्पिता कल्पितपुत्रिका ताम् ।
अनन्यलावण्यवतीं विलोक्य कन्यामभूद्विस्मयनिश्चलेव ॥ १०१ ॥
कदाचिदुत्सङ्गगृहीतकन्या ता नारदोऽभ्येत्य मुनिर्जगाद ।
पत्युस्तवेय चपलेन्द्रियस्य कन्या भविष्यत्यभिलाषभूमि ॥ १०२ ॥

---

१ 'विन्दोदित' क ग २ 'भव' क

श्रुत्वैतदाच्छाद्य महार्हपट्टै सुवर्णमञ्जूषधृता कुमारीम् ।
मन्दोदरी भूमितलावखाते तत्याज रत्नाकरपारतीरे ॥ १०३ ॥
काले प्रयाते जनकेन राज्ञा यज्ञाङ्गने हैमहलेन कृष्टे ।
लब्धा समृद्धेन्दुमुखी सुता सा सीतेति नाम्ना भुवने प्रसिद्धा ॥ १०४ ॥
तत कदाचिन्मणिमन्दिरस्थ दशानन शूर्पणखाभ्युपेत्य ।
सद्य प्रकृत्ताखिलकर्णनासा स्वसा श्वसन्ती विजने जगाद ॥ १०५ ॥
अहो प्रमादस्तव दुर्जयस्य जनत्रयीराज्यजयोर्जितस्य ।
यत्त्व प्रजातारिनवाङ्कुरोऽपि धत्से सुखी क्षीब इवातिनिद्राम् ॥ १०६ ॥
मन्त्रद्विष शक्तिमदेन यस्य निश्चेतनस्येव दिनानि यान्ति ।
दुर्वृत्तगोष्ठीपतितेव पत्नी न तत्र तिष्ठत्यपरोन्मुखी श्री ॥ १०७ ॥
राम पितुर्निश्चलशासनेन भ्रात्रा जटाभृत्सह लक्ष्मणेन ।
सीताख्यया चारुदृशा च पत्न्या धन्वी वने दाशरथि स्थितोऽस्ति १०८
यस्याङ्गना सा सुरसिद्धसाध्यगन्धर्वविद्याधरसुन्दरीणाम् ।
साश्चर्यसौन्दर्यमद वहन्ती दृष्टा मया त्वद्भवनोचितैव ॥ १०९ ॥
ता त्वत्कृते हर्तुमह प्रवृत्ता यावन्मनोजन्मजयप्रशान्ति(शक्ति)म् ।
रामानुजात्तावदय मयाप्त पराभव कर्तितकर्णनास ॥ ११० ॥
मन्मन्युशल्यव्यथयाभिभूता सुरासुरश्रीहरणप्रगल्भा ।
त्वद्भ्रातरस्ते खरदूषणाद्या रामेण सर्वे निहता ससैन्या ॥ १११ ॥
सुखोन्मुख कृष्णभुजङ्गमोऽपि विषोष्मशान्त्यै बिलवेश्मशायी ।
पिपीलकेनोदररन्ध्रयुक्त्या विदार्यते निश्चलकल्प एव ॥ ११२ ॥
आगुप्तचार स्वपरप्रदेशे जगत्त्रयीराज्यगृहीतभार ।
अहो प्रसिद्धा भुवनत्रयेऽपि त्व दण्डकारण्यकथा न वेत्सि ॥ ११३ ॥
इति स्वसुर्मर्मविदारणोग्रा श्रुत्वा गिर दुर्विषहा दशास्य ।
जवेन पार जलधेर्जगाम कालेन कामेन च कृष्यमाण ॥ ११४ ॥

---

१ भूमितले सुखाते' ख २ 'भूमितले निकृष्टे' ख ३ सुखक्षीब' ख घ
४ प्रच्युत' ख ५ 'अनुप्त' क ग घ

स प्राप्य मारीचममात्यमुख्यमरण्यपर्यं ततप प्रसक्तम् ।
न्यवेदयन्मर्त्यविकारमसौ सीतापहारव्यसनोद्यम च ॥ ११५ ॥
लक्ष्मीशरीरक्षपणाभियोगे गाढानुबन्धेन मदप्रमूढम् ।
[1]साचिव्यमन्त्रावधि याच्यमानो विचार्य मारीचमुनिस्तमूचे ॥ ११६ ॥
अहो बताय तव मोहमन्त्र खतन्त्रवाचा च्युतनीतितन्त्र ।
किं शत्रुणा पुत्रकलत्रमित्रदेहापहारी व्यसनाय दत्त ॥ ११७ ॥
[2]धूर्तैर्यदुक्त हृदयग्रहाय निन्द्य मदोत्तुङ्गमसङ्गत च ।
तदीश्वराणा परिणामकष्ट निर्दिष्टदुर्वेदमनिष्टमिष्टम् ॥ ११८ ॥
[3]सर्वापकार सुकृतप्रहार क्लेशावतार कुशलापसार ।
शीलापचार कुपदाभिसार पापप्रकार परदारहार ॥ ११९ ॥
पथ्य न जिघ्रन्त्यथ चर्वयन्ति स्पृशन्ति शृण्वन्ति विलोकयन्ति ।
विनाशकाले चपलेन्द्रियाणा सर्वेन्द्रियाणीव पुर प्रयान्ति ॥ १२० ॥
रामस्य हर्तुं कथमिच्छसि त्व पत्नीमयत्नक्षतराक्षसस्य ।
यद्धीतिनीत्येवं[4] तपस्तत मे क रक्षसामस्ति विवेकपाक ॥ १२१ ॥

जात कृती ततत[5]पश्चयऋष्यशृङ्ग-
मन्त्राहुतिप्रसृतयागविधिप्रभावात् ।
पृथ्वीपतेर्दशरथस्य पितुर्नियोगा-
द्य कौशिकस्य मखरक्षणदीक्षितोऽभूत् ॥ १२२ ॥

शूर शिशु कौशिकशासनेन म मातर वर्त्मनि ताटका य ।
हत्वा प्रपेदे मुनिना वितीर्णा सजृम्भकामस्त्ररहस्यविद्याम् ॥ १२३ ॥

अस्त्रोद्यत्पक्षपातै कुशिकसुतमखत्राणसज्जस्य यस्य
प्रक्षिप्तो योजनाना शतमुदधितटे मूर्च्छित प्रैच्युतोऽग्रे ।
वृक्षेष्वद्यापि बाणासनचकितभिया रामनामादिवर्णे
राकारामादिशब्देष्वपि भयसमुयान्न क्वचिन्निर्वृतिर्मे ॥ १२४ ॥

---

१ 'स दिव्यमन्त्रावधियाचमान' ख २ 'सूतै' ख, 'धूतै' घ ३ 'सर्वापहार सुकृतापकार' ख ४ 'नेत्येव' क, 'निन्येव' ग, 'नीत्येव' घ ५ 'तप स्थित' क ग ६ 'योग' क ग. ७ 'प्रत्युतामे' ख.

य प्राप यज्ञे जनकस्य पुत्रीं चण्डीशचापाक्रमणेन सीताम् ।
नीता त्रिलोकीविजयाशयेव शक्तित्वमेता कुसुमायुधेन ॥ १२५ ॥
आकर्णाकृष्टभङ्गोद्धुरवमुखरोच्चण्डचण्डीशचाप-
क्रोधाध्मातस्य सर्वक्षितिपवधविधेर्द्वन्द्वयुद्धातिथिर्यं ।
[2]चापश्रीकुञ्जनेन व्यथित भृगुपते सर्वधर्मस्य गोप्ता
पुण्यब्राह्मण्यजन्मापचयपरिचयक्षत्रवृत्तेर्निरोधम्[3] ॥ १२६ ॥
य सत्यपाशग्रथितस्य मुक्त्यै पितुर्गिरा निर्जनसश्रयाय ।
ययावरण्य सह लक्ष्मणेन भ्रात्रा समानव्रतया च पत्न्या ॥ १२७ ॥
वियोगशोकात्पितरि प्रतप्ते स्वर्गं प्रयाते भरतेन यत्नात् ।
अभ्यर्थ्यमानोऽपि निज न राज्य जग्राह राम स्थिरसत्यकाम ॥१२८॥
तत्पादुके मूर्ध्नि निधाय[3] धीमान्करोति शत्रुघ्ननिषेव्यमाण ।
राज्य जटाभृद्धरतस्तदीय वनान्तवासावधि तत्प्रदिष्टम् ॥ १२९ ॥
सहायता ते कुपदे करोमि कथ शरीरप्रतिकूलकार्ये ।
अकुर्वतस्त्वद्विशिखैर्विनाशस्ततस्तु रामान्निधन वर मे ॥ १३० ॥
श्रुत्वेति मारीचवच प्रहृष्टस्त राक्षसेन्द्र प्रथम विसृज्य ।
मायानिधान स्वविनाशसज्ज पश्चाद्ययौ कल्पितभिक्षुवेष ॥ १३१ ॥
अर्थानर्थक्षयभयजयान्सर्वथा वेत्ति सर्वं
श्रेय प्राप्तु किमपि यतते वर्जयत्येव दोषान् ।
तज्ज्ञोऽप्यन्ते पतति विवश क्लेशशोकार्तिगर्ते
दैवादिष्टे पतनसमये लङ्घने कस्य शक्ति ॥ १३२ ॥
अथ कनककुरङ्ग विद्रुमोत्तुङ्गशृङ्ग
रुचिरमणिविचित्र लोचनानन्दमित्रम् ।
द्युतिमिव विकिरन्त सनिकर्षे चरन्त
जनकनृपतिपुत्री कौतुकात्त ददर्श ॥ १३३ ॥
तच्चर्मलोभात्प्रणयप्रयत्नैरभ्यर्थितो मैथिलराजपुत्र्या ।
धृत्वाश्रमे लक्ष्मणमात्तचाप ससार सारङ्गवधाय राम ॥ १३४ ॥

---

१ 'शापात्' ख २ 'विरोधम्' क-ग, 'निषेधम्' ख ३ 'विधाय' क-ख-ग.

मायामृगस्तीक्ष्णतराननेन स पत्रिणा रामधनुश्च्युतेन[1]।
विद्धः[2] पतन्राक्षसरूप एव हा लक्ष्मणेत्यार्तरव[3] रुराव ॥ १३५ ॥
श्रुत्वा प्रलाप सहसैव सीता भर्तुर्विरुद्ध परिशङ्कमाना ।
उत्कम्पिताङ्गी विससर्ज यत्नात्ससम्भ्रम लक्ष्मणमीक्षित तैम्[4] ॥ १३६ ॥
अभ्येत्य सीतामथ कूटभिक्षुर्दशाननश्चन्द्रमुखीं ददर्श ।
सुरासुराणा कलहोपशान्त्यै सुधा सदेहामिव निर्जनस्थाम् ॥ १३७ ॥
प्रणामिनीं स्वागतवादिनीं ता पाद्यासनातिथ्यविशेषसज्ज्ञाम् ।
उवाच कौटिल्यनिलीनमाय प्रच्छन्नकाय क्षणदाचरेन्द्र ॥ १३८ ॥

लावण्य सकलाङ्गसङ्गसुभग माधुर्यधुर्यं वच-
स्तीक्ष्णान्ता नयनद्वयी च सुतरा प्रान्ते कषायच्छवि ।
मूर्तिं कान्तिसुधाचिता रसमयी चित्र चमत्कारिणी
यत्नेनाप्यभिलक्ष्यमम्लकटुक किंचिन्न ते चेष्टितम् ॥ १३९ ॥

एकाकिनी निर्जनकाननेऽसिन्करोषि किं रत्नविमानयोग्या ।
घोरं घुरद्व्याघ्रगुहाग्रमेतत्कस्मात्तवेष्ट विषमाश्मकाष्ठम् ॥ १४० ॥

एता निर्भरदर्भसूचिनिचयैर्दु सचरा भूमय
क्षुत्क्षुण्णाजगरोग्रकोपविषमश्वासोष्मशुष्यद्द्रुमा ।
ग्रीष्मग्लानिनिमग्नमत्तमहिषश्लिष्यत्करीषोन्मिष-
त्पङ्क्व्याकुलविक्लवत्तृणकुलक्लेदातितिक्त पय ॥ १४१ ॥

दिव्या रत्नहिरण्यहर्म्यरुचिरा रम्या तव श्रीसखी
लङ्का स्फाटिकमन्दिराशुनिवहै स्वर्गं हसन्ती मुहु ।
तस्या सुभ्रु विभात्यशोकवनिकालकारभूता मरु-
त्त्वङ्गत्कल्पलतापरागपटलीससर्गरङ्गा रति ॥ १४२ ॥

जगज्जयोद्योगरणाङ्कितश्रीलङ्काधिनाथ प्रणयी तवाहम् ।
य त्रासलोलाशुकपल्लवाङ्गा भ्रूभङ्गभग्नाखिदशा नमन्ति ॥ १४३ ॥

---

१ 'विद्धोऽपतत्' ख २ 'आर्तरवै' ख-ग ३ 'तत्' क ग घ ४ 'क्लिश्यत्' क-ग ५ 'विह्वत्तृण' क-ग घ ६ 'श्रीमुखी' ग ७ 'ससङ्ग' क-ग घ

श्रुत्वैतदुक्त दशकन्धरेण भयेन कोपेन च कम्पमाना।
जगाद जिह्म जनकात्मजा त समुद्धवद्वाहुशिर सहस्रम् ॥ १४४ ॥
अहो प्रशान्तव्रतकष्टकूटस्त्व शष्पसच्छन्न इवान्धकूप ।
पापाप्लुत जल्पन जल्पतस्ते किं नाम भूमौ पतिता न जिह्वा ॥ १४५ ॥
इति ब्रुवाणा कपटाकृतिस्था करेण मातङ्गनिभ प्रमाथी।
आकृष्य रम्भामिव वेपमाना जहार मत्त पिशिताशनेन्द्र ॥ १४६ ॥
तारप्रलापा शरणैषिणीं ता दयाभिमानी न ररक्ष कश्चित्।
प्राय स्वरक्षाप्रणयी जनोऽय परार्तिकाले विरलप्रयत्न ॥ १४७ ॥
सीता हरन्त रजनीचरेन्द्र लतामिवोग्रानिलमम्बरेण।
धीर कृपावानरुणस्य सूनुरभ्याद्रवद्भूभृपतिर्जटायु ॥ १४८ ॥
निकृत्तवर्मायुधमौलिवाह कृत्वा दशास्य नखचञ्चुपक्षै ।
दैवप्रमाणे विजये जटायुर्जुहाव जीव निजमाजिवह्नौ ॥ १४९ ॥
जायन्ते निधन प्रयान्ति सतत जन्मभ्रमे जन्तव
कोऽप्येक किल जायते स सुकृती य पीतपुण्यामृत ।
आर्तत्राणपवित्रितेन तृणवन्नीतेन जातु व्यय
व्याप्ताशेषयशोमयेन वपुषा कल्पस्थितिर्जीवति ॥ १५० ॥
लङ्काधिनाथ समुपेत्य लङ्कामशोकनाम्नीं वनिका प्रविश्य।
न्यवेशयन्मैथिलजा क्षयाय कुलस्य मानस्य च जीवितस्य ॥ १५१ ॥
दिनेषु यातेष्वथ रामवृत्त ज्ञातु विसृष्ट प्रणिधिर्निगूढ ।
सुकेतुनामा दशकधरेण विज्ञाय सर्वं स समाजगाम ॥ १५२ ॥
स तापसव्यञ्जनरञ्जितेन वेषेण लङ्कापतिमभ्युपेत्य।
स्वैर बभाषे भुवनत्रयेऽपि समस्तकार्येषु कथान्तरज्ञ ॥ १५३ ॥
न युज्यते वक्तुमसंमत यन्न चाहित न प्रकट न गुप्तम्।
प्राय प्रभूणामतिसंनिकर्षं क्षुराग्रधारे नवपादचार ॥ १५४ ॥
श्रुत च दृष्ट च निवेद्यमान सत्य वच प्रीतिकरं नृणां राज्ञाम्।
तुष्यन्ति भूपा स्तवकस्तवेन शून्येन वेश्याप्रणयोपमेन ॥ १५५ ॥

---

१ 'ज्ञात्म न' क २ 'कूलेषु' ख ३ 'वन' ग घ ४ 'नराणाम्' ख

कर्णानुकूल हृदयग्रहाय यदुच्यते तत्क्षणदृश्यदोषम् ।
बालभ्यभावप्रभवाय भृत्यैर्द्रोहप्रकार परम प्रभूणाम् ॥ १५६ ॥
सहायहीनस्य पदच्युतस्य क्षामस्य कान्ताविरहान्वितस्य ।
रामस्य वृत्त शृणु देव सर्वं श्रुत्वा विचार्य क्रियता हित यत् ॥ १५७ ॥
हत्वा स मारीचममेयमाय त्यक्त्वाश्रम लक्ष्मणमाप्तमग्रे ।
विलोक्य सीताहरणाभिशङ्की ध्यात्वापतत्तन्मुखदत्तदृष्टि ॥ १५८ ॥
दृष्ट्वाश्रम शून्यमचिन्तितोग्रशोकाभिघाताप्तमुहूर्तमोह ।
आसाद्य सज्ञा शनकै प्रपेदे चक्रभ्रमारूढ इवाकुलत्वम् ॥ १५९ ॥
जटायुषस्तत्क्षणमुक्तजीवशेषस्य कृत्वान्त्यविधिं विधिज्ञ ।
तद्दु खताप दयितावियोगे राम क्षते क्षारमिवाससाद ॥ १६० ॥
शैले शैले स्थलजलबिलप्रायपुञ्जे निकुञ्जे
कृत्वा कृत्वा हृदयमसकृज्जीविताशाविहीनम् ।
शोकेनान्तर्विहितवसति प्रस्खलद्बाष्पवर्षी
राम सीता धृतिमिव वने हारिता नासासाद ॥ १६१ ॥
सर फुल्लैर्व्याप्त विकचकुमुदेन्दीवरवनै
रज पुष्पालेख्य सँ खलु निखिलेन्दुद्युतिमुख ।
वहन्नन्तर्द्वेषादिव कमलखण्डेषु विमुख
क्षपामन्तश्चक्राह्वयसदृशवृत्ति समनयत् ॥ १६२ ॥
दृष्ट्वा श्रिय पुत्रमवाप्तघोरकबन्धरूप स विमोच्य शापात् ।
राकावियोगग्लपित शशीव ययौ तदुक्तेन पथा हितेर्नै ॥ १६३ ॥
शनैरवाप्याचलमृष्यमूक सुग्रीवनाम्ना प्लवगेश्वरेण ।
परस्पराबद्धहितप्रतिष्ठ स प्राप विख्यातबलेन सख्यम् ॥ १६४ ॥
तस्याग्रजेनातिबलेन राज्य हृत समाकर्ण्य स वालिनाम्ना ।
चकार मित्रोपकृतिप्रयत्नसंनद्धधीस्तन्निधने प्रतिज्ञाम् ॥ १६५ ॥
किष्किन्धामेत्य राम प्रथितभुजबलं वालिन शौर्यशाली
सुग्रीवाहूतमुमाननविशिखहत कीर्तिशेष चकार ।

---

१ परम' ख २ 'मुजे' ख ३ 'सखल' ग घ ४ 'च तेन' ख.
५ 'किष्किन्दां' क-ख-ग घ

सनद्ध सप्तसिन्धूद्भतसलिलचयाशान्तिसंतोषवृद्ध्या
सध्याध्यानाय धीर क्षणगमनपटुर्य सदैवात्र दृष्ट ॥ १६६ ॥
सुग्रीव हनुमन्मुखै परिवृत राज्येऽभिषिच्य स्वय
कृत्वा वालिजमङ्गद तदनुग तद्यौवराज्योर्जितम् ।
राम प्रस्रवणे गिरौ समनयद्विद्युत्प्रभापिङ्गल-
श्मश्रुव्याकुलमेघसघकलिले काल वियोगाकुल ॥ १६७ ॥
सरम्भोर्जितगर्जित जलधर क्षिप्रोद्यता विद्युत
खद्योतस्फुटन कदम्बपवन ता सस्मिता केतकीम् ।
सेहे सर्वममोघमेघचरित राम सुहृन्निर्मिता
सीतान्वेषणसविद धृतिमयीमाशा निवेश्याशये ॥ १६८ ॥
तत प्रयाते घनमेघकाले प्रशान्तबाष्पेषु दिशा मुखेषु ।
मित्रोदयश्रीरिव हर्षहेतु पद्माकराणा शरदाजगाम ॥ १६९ ॥
उद्योगकालेऽपि निरर्गलस्य वक्तु सुरौघै सुहृदश्च्युतस्य ।
क्रुद्धेन सौमित्रिरथाग्रजेन ययौ विसृष्ट कपिराजधानीम् ॥ १७० ॥
श्रीभोगसक्त दयितानुरक्त हरीश्वर विस्मृतमित्रकार्यम् ।
अभ्येत्य लज्जावनत जगाद रामानुज कोपकषायनेत्र ॥ १७१ ॥
आश्चर्य निजकार्यकालविनत पर्याप्ततात्पर्यवा-
न्कौर्यौदार्यमनार्य वेत्सि न घनक्लेशाश्मशय्याश्रयम् ।
उच्छिष्ट पिबसि प्रियाधरदलस्यालम्बराग मधु
प्रायेणोपकृति कृतघ्नहृदये पाषाणपट्टे कृषि ॥ १७२ ॥
सोल्लासा[1] कृकलासकूर्मशफरोत्फालाहिजिह्वालता-
संध्यावर्णपलाशपर्णकरिणीकर्णानुकारक्षमा ।
विद्युन्नृत्तनरेन्द्रवृत्तवनिताचित्तासवोन्मत्तधी-
दुर्नीतोन्नतिचारणस्तुतिकलालोला खलप्रीतय ॥ १७३ ॥
स लक्ष्मणेनेति विडम्ब्यमान. स्वदोषवैलक्ष्यविषण्णचित्त. ।
प्रसाद्य त सवरणप्रणामैश्चक्रे स्वसैन्य विजयाय सज्जम् ॥ १७४ ॥

---

१ 'सोल्लासंकृकलास' क-ग घ

नम्र समभ्येत्य तत्र कपीन्द्र प्लवगसङ्घै परिपूरिताश्च ।
राम प्रसादाभिमुख विधाय दिशो विजेतु बलमादिदेश ॥ १७५ ॥

सीतान्वेषणशासनप्रणयिना दर्पेण ससर्पता
संपूर्णे भुवने कपिक्षितिभृता सैन्येन दिग्व्यापिना ।
मेघप्रस्तमिवाम्बर घनतम सघातपीत दिन
दिक्चक्र च बभूव विन्ध्यशिखरप्राकारसंपूरितम् ॥ १७६ ॥

वेगेनाक्रन्दमैन्दनीलहनुमन्मुख्या प्लवङ्गास्तत
प्राप्ता दक्षिणसिन्धुमुद्धततरत्वङ्क्तैरङ्गोत्तरम् ।
आलिङ्गन्तमिवाम्बरप्रणयिनीं गङ्गा दिगन्तादिभि(१)-
र्दृष्ट्वा वन्ध्यपरिश्रमा प्रमुमुचुश्चिन्तानिमग्ना धृतिम् ॥ १७७ ॥

ततोऽब्रवीद्वालिसुत समुद्रसदर्शनत्यक्तजवाभिमान ।
सीता न लब्धाब्धिरय न लङ्घ्य कपिप्रभो क सहते प्रकोपम् १७८
इहैव नस्त्यक्तपरिग्रहाणा युक्त तप सगलितग्रहाणाम् ।
भग्नेऽभिमाने विततेऽवमाने वन विना भेषजमस्ति नान्यत् ॥ १७९ ॥

मिथ्यापुत्रकलत्रमित्रभरणारम्भाभियोगग्रहै-
राशापाशजुषा प्रभुप्रणयिना सेवाव्रतै शुष्यताम् ।
अन्ते हन्त दिशन्ति सततमहामोहप्ररोहावहा
वेश्याविभ्रमचञ्चला भ्रमभरदोन्मत्तक्रम संपद ॥ १८० ॥

धन्यो जटायुर्जगति प्रवीरो जीवत्यलोभोज्झितजीवितोऽपि ।
छिन्नस्य यस्योचितराजकार्ये लोके प्ररूढा किल कीर्तिलक्ष्मी ॥१८१॥

इत्यङ्गदेनाभिहिते समीप सपातिनामा शनकैरवाप्त ।
प्लवगमान्गृध्रपतिर्जगाद नवोद्भवत्तत्क्षणलक्ष्यपक्ष ॥ १८२ ॥

भ्राता जटायुर्मम पूर्वमर्कपथे व्रजन्मत्सहितो जवेन ।
स्पर्धानुबन्धी स मया स्वपक्षै संरक्षित प्रज्वलिताखिलाङ्ग ॥ १८३ ॥

---

१ 'सेन्द्र' क ख २ 'तरङ्गोद्धतम्' क ग घ ३ 'वेश्याविभ्रममाशु शोकनिवह विद्युद्विलोला श्रिय' ख ४ 'जटायु सफलाततायु' ख ५ 'व्रज सत्त्वहितो मदेन' क

निर्दग्धपक्ष पतित क्षितौ मा दिवाकराख्यो मुनिरित्युवाच ।
भविष्यसि प्रौढगति सपक्षस्त्व रामवृत्तामृतपूर्णकर्ण ॥ १८४ ॥
इहाद्य मे रामकथामृतेन पक्षै प्रजातैर्विगत स शाप ।
पश्यामि लङ्कोपवने निरुद्धा सीता निगद्येति जगाम गृध्र ॥ १८५ ॥
महामतेर्जाम्बवतो मतेन प्लवगमै सादरमङ्गदाद्यै ।
अभ्यर्थितोऽब्धेस्तरणेऽभिमानी समीरसूनुर्ववृधे हनूमान् ॥ १८६ ॥
महेन्द्रमारुह्य गिरिं स पादभरेण गुर्वीकृतमुत्पपात ।
आदातुमिच्छन्निव नाकचुम्बि दिनेशबिम्ब पुनरम्बराग्रात् ॥ १८७ ॥
स्वच्छाम्बुप्रतिबिम्बितेऽस्य वपुषि क्रूरप्रकोपाकुलै-
र्दंष्ट्राकोटिविपाटनेन मकरैर्मिथ्याभियोगे कृते ।
दूरोद्धारितदूरुवातविधुतस्फीतैस्तटाम्बुस्फुट-
च्छुक्तिव्यक्तसितैर्जहास जलधिर्मुक्तासमूहैर्मुहु ॥ १८८ ॥
व्रजन्स धीर शतयोजनान्त क्रमेण तद्वासविवर्धितास्याम् ।
जघान घोरामथ सिंहिकाख्या क्षपामिवार्कस्तमसो जनित्रीम् ॥ १८९ ॥
मानाय मैनाकमथार्णवेन विश्रान्तये रत्नगिरिं विसृष्टम् ।
करेण सस्पृश्य स लङ्घिताङ्घिर्लङ्काङ्कशैलस्य तटे पपात ॥ १९० ॥
अथ निशि शशिहासोल्लासशुभ्रासु दिक्षु
स्फुटमणिकिरणेषु(ष्वे[1])तत्प्रियान्त पुरेषु ।
प्रतिपदमतियत्नात्तेन सर्वं विचित्य
द्रुततरमभिपत्य स्वैरमाभाष्य सीताम् ॥ १९१ ॥
सुरतरुवनिकाया[2] मूलभङ्ग विधाय
प्रविधुतकुलशैलान्किंकरान्मन्त्रिपुत्रान् ।
सुरपुरभयदीक्षादक्षमक्ष च हत्वा
स्वयमभिसरता तामिन्द्रजिद्युद्धभूमिम् ॥ १९२ ॥
तृणमिव वहता तच्छद्मना ब्राह्ममस्त्र
हुतवहहुतलङ्कातङ्कनि शङ्कशक्त्या ।

---

१ तटान्त' ख २ 'वनिकायां' क-ख ग

कृतमिह कपिना यत्तच्च देवेन दृष्ट
तदपि कुमतिसृष्ट दैवदिष्ट न नष्टम् ॥ १९३ ॥ (तिलकम्)
यद्भक्तियुक्त विनयप्रमुक्त विज्ञाप्यसे शक्तिलवेन देव ।
आकुञ्चितभ्रूभ्रमकारि वक्त्र न तत्र कार्यं खहित विचार्यम् ॥ १९४ ॥
श्रुत्वैतदुक्त प्रणधिव्रतेन रक्ष पति क्ष्मां क्षणमीक्षमाण ।
न किंचिदूचे चरणाञ्चलेन समुल्लिखन्स्फाटिकपादपीठम् ॥ १९५ ॥
अथ प्रभाते किल मन्त्रिमुख्यनिषेव्यमाण क्षणदाचरेन्द्रम् ।
भ्राता सभाप्रस्थितमभ्युपेत्य विभीषण संप्रति त बभाषे ॥ १९६ ॥
अत्यल्पकेऽपि व्यसनाशलेशे न सवृतिर्यैं क्रियते प्रयत्नात् ।
तेषा प्रमादादवमानपूर्णा सक्तापवादा विपदो भवन्ति ॥ १९७ ॥
न धीमता धावति धी कुकार्ये क्षणादकार्याद्विरमन्ति भव्या ।
कुर्वन्त्यकार्यं विरमन्ति नैव हित न शृण्वन्ति च दैवदंग्धा ॥ १९८ ॥
पराभव यत्स कपिस्तवापि चकार सोऽय कुनयप्रभाव ।
सीतापहारप्रभवावमाने तत्त्याग एव प्रशमाभ्युपाय ॥ १९९ ॥
अहो नु चारैर्न निवेदित भो राम समुद्रस्य तटीमवाप्त ।
यद्भृत्यसुग्रीवविधौ विधेय स मारुतिस्तत्पृतनापदाति ॥ २०० ॥
प्रसाद्यतामात्महिताय राम सीतार्पणेनैव स शान्तिमेति ।
अय प्रमादस्य शरावपात (?) सीतापरित्यागकरावलम्ब ॥ २०१ ॥
हित तवैते न वदन्त्यमात्यास्त्वद्भूलताधीनविभूतिभोगा ।
चित्तग्रहाय प्रियतामवाप्तु कर्णानुकूल कथयन्त्यतथ्यम् ॥ २०२ ॥
सत्ये शङ्काचकितमतयो वञ्चकग्रामलीना
शैलस्थूलोपकृतिविफला खल्पदोषेऽतिकोपा ।
मन्त्रोद्विग्ना पिशुनवचना धर्मनर्मोक्तिदुष्टा
साधुद्विष्टा प्रखलसुहृद सर्वदा भूमिपाला ॥ २०३ ॥

---

१ 'विनति' ख २ 'मुख्यै' ख ३ 'सप्रहित' ख-ग ४ 'दुष्टा' ख
५ 'योगा' ख ६ 'दुष्टा' ख

इति ब्रुवाण कुशलानुबन्धाद्विभीषण भ्रूभ्रमणप्रकोप ।
आकृष्य खड्ग चरणाञ्चलेन न्यपातयन्निर्विकृतिं दशास्य ॥ २०४ ॥
स वेत्रिभिस्त्रासितसर्वलोकैर्निष्कासित सज्जनसश्रयार्थी ।
गुणाभिसारी गगन विगाह्य जगाम रामस्य समीपमेव ॥ २०५ ॥
अन्येद्युरन्त पुरसौधशृङ्गस्थित समेत्य प्रणिधिर्दशास्यम् ।
सुग्रीवसैन्यार्णवमध्यचारी जगाद विज्ञातसमस्ततत्त्व ॥ २०६ ॥
इत प्रयातस्य विभीषणस्य प्रणामिन पादनखांशुपट्टम् ।
रामेण मौलौ प्रविसार्य दत्तो लङ्काधिपत्ये प्रथमाभिषेक ॥ २०७ ॥
मन्त्रान्तरज्ञत्वमतीव यात स तस्य निर्व्याजहितोपदेष्टा ।
न बान्धवत्व सहज जनस्य स एव बन्धु किल योऽनुरक्त ॥ २०८ ॥
विभीषणस्यानुमते त्रिरात्र रामेऽब्धितीरेऽथ कृतव्रतेऽपि ।
गाम्भीर्यनि स्पन्दतयाम्बुराशिर्न किंचिदूचे तरणाभ्युपायम् ॥ २०९ ॥
रामस्य चापाक्रमणेन सिन्धुर्भयादथामन्यत सेतुबन्धम् ।
मृदोरवज्ञामुखभङ्गकारी लोक किलाय भयभोज्य एव ॥ २१० ॥
अथाम्बुधौ मन्दरतुल्यशैलै सेतुर्निबद्धोऽद्भुतकृत्प्लवगै ।
प्रभावशक्त्या दृढनिश्चयाना शिला प्लवन्ते सलिले किमन्यत् ॥२११॥
रक्ष कुले सेतुरभावहेतुर्दैवेन सृष्ट सलिलप्रचार ।
नून स निर्विण्णगतागताय लङ्कापदा राघवसपदा च ॥ २१२ ॥
तीर्त्वार्णव सेतुपथेन रामस्ततस्त्रिकूटस्य तटे निविष्ट ।
प्लवगसैन्येन घनेन यस्य त्रस्ता इव कापि दिश प्रयाता ॥ २१३ ॥

इत्युक्त्वा प्रणिधौ मनागपसृते लङ्काधतिर्भ्रातर
[illegible]म्मानुषसेवक क्षतकुल प्रम्लानमानानन ।
[illegible]रपि दुष्करेऽद्भुतनिधौ सेतौ निबद्धेऽम्बुधौ
लज्जाद्वेषविमर्शकोपकलनाव्याकीर्णचित्तोऽभवत् ॥ २१४ ॥

अथोच्चचारोद्धतयुद्धशसी भेरीनिनाद क्षणदाचराणाम् ।
शिलाहताट्टालपरम्पराणा झाकारराव घन कपीनाम् ॥ २१५ ॥

---

१ तोयाय' ख २ 'तरणे' ख ३ 'भीरी' क ख-ग घ

युद्धे प्रवृत्ते कपिराक्षसाना द्रुमाद्रिशस्त्रास्त्रसमाहता भू ।
पुन प्रजाताखिलदाहशङ्का लङ्का चकम्पे भयविह्वलेव ॥ २१६ ॥
तत प्रतीहारपति प्रविश्य विद्युन्मुखाख्य क्षणदाचरेन्द्रम् ।
व्यजिज्ञपत्संगररङ्गभङ्ग प्रत्यक्षमालोक्य निशाचराणाम् ॥ २१७ ॥

देवद्वन्द्वरणे प्रसक्तसुभटे तुल्यत्वमासीत्क्षण
रक्षोवानरसैन्ययोरथ मनाग्[1]म्लाने बले रक्षसाम् ।
वीरेणेन्द्रजिताभ्युपेत्य निहतौ भूमौ च्युतौ राघवौ
नागास्त्रेण समावृतौ त्रिशिरसा भग्न कपीना बलम् ॥ २१८ ॥

दिव्यप्रभावौ गरुडेन साक्षात्स्पृष्टौ विनष्टाखिलपाशबन्धौ ।
अथोत्थितौ दाशरथी वृथैव[2] किं पौरुषैर्दैवमलङ्घ्यमेव ॥ २१९ ॥
लब्धाधिकोत्साहबलै प्लवगैर्निपीड्यमानेषु निशाचरेषु ।
प्रहस्तधूम्राक्षमहोदराद्या[3] म्रियन्त रणे मन्दबलत्वमेव ॥ २२० ॥
भग्नेऽथ सैन्ये क्षणदाचराणा मानानुबन्धादविलुप्तधैर्या ।
हत्वा प्रहस्तप्रमुखा क्रमेण ते सगरोर्वीकुलभूधरेन्द्रा ॥ २२१ ॥
त्वदाज्ञया देव विबोधनाय प्रमृद्यमानोऽपि गजाश्वसैन्यै ।
अत्यन्तनिद्रातरुणीकरालो न कुम्भकर्णो विजहाति निद्राम् ॥ २२२ ॥
श्रुत्वा प्रतीहारगिर दशास्य सख्ये तनुत्यागसमुद्यतोऽभूत् ।
चित्तानुवृत्तान्तसहायहीन कस्येष्टमैश्वर्यमरण्यतुल्यम् ॥ २२३ ॥
स्नानार्चनादि प्रविधाय तूर्ण कार्यानुरोधादथ कुम्भकर्णे ।
श्रुत्वाखिल रामविरोधवृत्त पौलस्त्यमेत्य प्रणतोऽभ्युवाच ॥ २२४ ॥
अहो महा[4]दु सहदुर्महोऽय सन्मन्त्रिमन्त्रैर्न निवारितस्ते ।
क्रोधेन्धने किं भवता सराग्नौ हुता विभूतिर्गणिता न नीति ॥२२५॥
लीलानिबद्धाम्बुधिमध्यसेतो शक्तिर्मनुष्यस्य न चिन्तिता किम् ।
भ्रूभङ्गभीतिस्तिमिताम्बुराशौ यस्याज्ञया भूमिधरा प्लवन्ते ॥ २२६ ॥

---

१ 'म्लाने' क घ २ 'च सहसा' ख ३ 'तथैव' ख ४ 'मदोद्धतास्ते विविधा रणेवीम्' ख-ग-च

स दीर्घदर्शी हितकृन्मनीषी विभीषण किं भवता निरस्त ।
मन्नागमज्ञ प्रथम निहत्य पश्चाद्विष भक्षितमप्रमेयम् ॥ २२७ ॥

व्यसनपतनसक्तिस्तद्विरामेऽप्यसक्ति-
हिंतसचिवविरक्तिर्दुर्जनेष्वेव भक्ति ।
उचितमतिवियुक्तिर्दुर्ग्रहाणाममुक्ति
क्षितिपरिवृढलक्ष्मीसक्षये लक्षणानि ॥ २२८ ॥

श्रुत्वानुजोक्त हितयुक्तमेतन्नक्तचरेन्द्रो न विवेद युक्तम् ।
निपातकाले किल नैव बुद्धिर्भवेद्यया मोहरजोविशुद्धि ॥ २२९ ॥
स त जगाद प्रतिबोधितोऽद्य शिक्षाप्रदानाय न पण्डितस्त्वम् ।
मिथ्या भुजौ भूरिभुजस्तवेमौ भजस्व गत्वा घनमोहनिद्राम् ॥ २३० ॥
इत्यग्रजेनाभिहितो विचिन्त्य प्रभावशक्तिं भवितव्यताया ।
सनद्धबुद्धिर्निधने रिपूणां न कुम्भकर्णस्तमुवाच किंचित् ॥ २३१ ॥

सप्राप्ते कुम्भकर्णे रणभुवमभवायाससमन्त्रितानां
भग्ने सैन्ये कपीना दिशि दिशि रजसा भूयसा [1]सवृतायाम् ।
तत्कायच्छाययाधो जगति गुरुतरै सनिरुद्धेऽन्धकारै-
रर्के साकारराहुग्रहणसमयधी खेचराणा बभूव ॥ २३२ ॥

तत प्रविश्याविरलप्रहारो विदीर्णकाय स्रुतशोणितौघ ।
नक्तचर कुञ्जरकर्णनामा व्यजिज्ञपत्ससदि राक्षसेन्द्रम् ॥ २३३ ॥
देव त्वदाज्ञापरुषाक्षराणि ध्यायन्कपीना युधि कुम्भकर्ण ।
चक्रे महन्मन्युमनन्तमन्त [2]प्रारब्धकल्पान्तकृतान्तलील ॥ २३४ ॥

भग्नाशङ्क दधाने [3]जगति स गगनासङ्गितुङ्गोत्तमाङ्ग
पश्चा भूकम्पकारी भयनिबिडमिलद्धारणायूथि पिंषन् ।
सुग्रीव विग्रहोग्र लघुविहगमिवादाय मुष्टिग्रहेण
ग्रीवाकर्षैर्वभञ्ज द्रुमवद्दवगतिव्याहतानङ्गदाद्यान् ॥ २३५ ॥

क्षिप्र विभीषणमतेन निकृष्टचाप-
स्त्व राघव खकटकोपरि भूधराभम् ।

---

१ 'सवृतानाम्' ख. २ 'आरम्भ' ख ३ 'त्रिजगति' ग घ

बाणैर्निपात्य घनकायभरावपिष्ट-
रक्ष कुल भुवनविस्मयमाततान ॥ २३६ ॥
हते विकीर्णे युधि कुम्भकर्णे निकुम्भकुम्भादिषु च च्युतेषु ।
मानानुबन्धादपराङ्मुखाना क्षण क्षयोऽभूत्क्षणदाचराणाम् ॥ २३७ ॥
शोकप्रकोपानलविह्वलमान कुलक्षयादिन्द्रजिदभ्युपेत्य ।
सैन्य कपीना निखिल क्षणेन स रामसुग्रीवसुखं[1] जघान ॥ २३८ ॥
हतेषु सर्वेषु हरीश्वरेषु कण्ठावकीर्णक्षणजीवितेन[2] ।
अभ्यर्थितो जाम्बवता हनूमानेको विसृष्ट कपिजीवितार्थै ॥ २३९ ॥
स योजनशतत्रयीं दिवि विलङ्घ्य भास्वत्प्रभ
सपुष्करमपाहरत्सकलमौषधिक्ष्माधरम् ।
यदग्रसरसौरभैरभवदाशु जीव क्षणा-
त्सराघवकपीश्वर हरिसुसैन्यमत्यद्भुतम्[3] ॥ २४० ॥
मान नेच्छति यच्छति व्यसनिता मुग्धा विधत्ते धिय
कीर्तिं हन्ति कलङ्कयत्यपि कुल सोत्कर्षविद्वेषवान् ।
यद्यत्कर्म विधीयते सुमतिना[4] कार्यानुबन्धोद्यमै-
स्तत्तत्सर्वमलक्षित क्षयपति क्षिप्र विरुद्धो विधि ॥ २४१ ॥
अथेन्द्रजित्सर्वजगज्जयोग्रब्रह्मास्त्रसिद्धै विहितापचार ।
वन समागत्य निकुम्भिलाख्य यागोग्रवह्नौ रुधिर जुहाव ॥ २४२ ॥
यागार्धविघ्ने युधि वध्य एष नैवान्यथेत्याशु विभीषणेन ।
उक्ते हिते राघवशासनेन त लक्ष्मणो योद्धुमथाजगाम ॥ २४३ ॥
अथेन्द्रजिल्लक्ष्मणयोर्मदेन युद्धे प्रवृत्ते कपिराक्षसानाम् ।
परस्पर दीर्घमहास्त्रदीप्त सैन्यद्वय प्रेक्षकतामवाप ॥ २४४ ॥
क्रोधाकुलेनेन्द्रजिता प्रसह्य शक्त्याथ हृन्मर्मणि दारितोऽपि ।
त पत्त्रिणा कण्ठनिकृत्तवक्त्र सौमित्रिराश्चर्यनिधिश्चकार ॥ २४५ ॥
श्रुत्वैतदुग्राशनिपाततुल्य शोकेन निर्भिन्नधृतिर्दशास्य ।
व्याप्त स्फुटद्भि कटकाग्रलै पपात कल्पान्त इवाचलेन्द्र ॥ २४६ ॥

---

१ 'मुखान्' क ख २ 'वतीर्णं' ख ३ 'प्रवरसैन्य' ख ४ 'सुमतिभि' ख

स लब्धसञ्ज प्रियपुत्रशोके भ्रातृक्षयस्योपरि मर्मलग्ने ।
सीताभिलाष सहसा विहाय बबन्ध चित्ते मरणाभिलाषम् ॥ २४७ ॥

भ्रात्रा भुजेन सकलोद्यमदक्षिणेन
पुत्रेण सर्वगुणसंगमवल्लभेन ।
मानेन मौलिमणिना रहितस्य जन्तो
किं जीवितेन शितशल्यशताचि(यि)तेन ॥ २४८ ॥

प्राप्तस्तत समरभूमिमभ्रमानो
भृत्यानुजात्मजनिकृत्तशरीरपूर्णाम् ।
लङ्केश्वर पृथुविषादभरश्रमेण
विश्रान्तये निजवपु क्षयमाचकाङ्क्ष ॥ २४९ ॥

संनद्धे दशकधरे युधि भयव्याघूर्णदिङ्मण्डले
पैशाचाश्वरथस्थिते हरिरथारूढे च रामे पुन ।
बाणेषु प्रसरत्सु देहदलनव्यापारपाराप्तये
ह्येकस्य[1] स्वतनुक्षये रिपुवधे चान्यस्य लोभोऽभवत् ॥ २५० ॥

अग्रे शरीरनिरपेक्षमरक्षिताङ्ग
रक्ष पतिं घनरणक्षयमीक्षमाण ।
राम क्षण स्थगितनिश्चलचापपाणि
साश्चर्यशौर्यभरविस्मयवान्प्रदध्यौ ॥ २५१ ॥

काय कैलासमूलोद्धृतिविपुलशिलोल्लेखविख्यातसार-
स्तेज शक्रेभकुम्भस्थिरशरशकलक्लेशनि श्वासदीप्तम् ।
मानश्चाशेषलोकेश्वरमुकुटतटीलालिताज्ञाविलास
सर्वं साश्चर्यमस्य त्रिभुवनजयिन पापशापेन नष्टम् ॥ २५२ ॥

ध्यात्वेति निर्विवरमार्गणवर्षिणोऽस्य
दष्टौष्ठमाकुलितकुण्डलदीप्तगण्डम् ।
राम, शरेण दहनाचितदुर्निमित्त-
क्रूरार्धचन्द्रवदनेन शिरश्चकर्त ॥ २५३ ॥

---

१ 'तेन रण' ख २ 'शताश्रितेन' ख ३ 'लोकस्य' क ग

नित्यार्द्रेदु खे जनजीवितेऽस्मिन्सुखान्यनित्यानि सयौवनानि ।
धनानि विद्युद्द्युतिचञ्चलानि क्षणक्षयाणि प्रियसंगमानि ॥ २६३ ॥
बाल्ये भूमितलेऽर्पिता तदनु च क्लिष्टा वने भीषणे
पौलस्त्येन हृता भयक्षतधृतिर्बं(ती रु)द्धाथ लङ्कावने ।
लब्धाशुद्ध्यनले च्युता पुनरपि त्यक्ता सती जानकी
संसारे सतताश्रुपातिनि नृणा घिड्नित्यदु खस्थितिम् ॥ २६४ ॥
आश्वास्यमाना जनकोपमेन वाल्मीकिना दीनदयान्वितेन ।
काल तनुत्यागमनोरथै सा नित्याश्रुपातार्द्रकुचा निनाय ॥ २६५ ॥
सासूत भर्तृप्रतिबिम्बरूपौ पुत्रौ तनुत्यागविशेषविघ्नौ ।
वाल्मीकिना क्षत्रियसंक्रियाभि कुशो लवश्चेति कृताभिधानौ ॥२६६॥
प्रवर्धमानौ मुनिना स्वकाव्यमध्यापितौ गीतिविभक्तवर्णम् ।
पूर्वं भविष्यच्चरित निबद्ध रामायण कर्णरसायन तौ ॥ २६७ ॥
निरास सीताविरहे द्वितीये शशीव रामस्वनुतामवास. ।
प्रदीप्तदु खाग्निचिता विवेद श्मशानभूमिप्रतिमां विभूतिम् ॥ २६८ ॥
किं भोगरोगै किमयत्नरत्नै किं नन्दनैश्चन्दनचन्द्रसौधै ।
वियोगशल्यैर्हृदयेऽवसन्ने किं नित्यशोकेन कुजीवितेन ॥ २६९ ॥
कदाचिदास्थानसभासनस्थ राम प्रहारक्षतमस्तक श्वा ।
व्यज्ञिज्ञपद्देव यतिव्रतेन हतोऽस्मि विप्रेण विनापराधम् ॥ २७० ॥
भिक्षुर्विलक्ष क्षतकारण तत्पृष्टोऽपि किंचिन्न यदाचचक्षे ।
तद्दण्डमूकेषु सभास्थितेषु तदा पुन प्राह स निश्चित श्वा ॥ २७१ ॥
देव द्विजन्मा स्वमठेऽधिकारी पुराहमासं विगतस्पृहोऽपि ।
केनाक्रमेणोपग(न)ता न जाने तथापि मे निन्द्यतमा श्वजाति ॥२७२॥
कालज्ञरे देवमठाधिकारी विधीयतामेष विवेकहीनः ।
न यस्य कोपप्रशमेऽपि शक्तिर्लोभप्रहाणेऽपि स किं समर्थ ॥ २७३ ॥
एकोदरा मोहमहीप्रजाता मदस्मरक्रोधविषादलोभा ।
एकानुभावेन भवन्ति जन्तो सर्वे सदा स्थूललघुक्रमेण ॥ २७४ ॥

---

१ काव्य' ख

श्रुत्वैतदुद्दामगजाधिरूढ भिक्षु नृप स्फीतमठाधिनाथम् ।
चक्रे चलच्चामरचारुचञ्चद्विकुञ्चितोष्णीषविलासहासम् ॥ २७५ ॥
धर्मस्य गोप्ता च्यवनेन राम प्रीत्यार्थित क्रूरतरासुरस्य ।
त्रैलोक्यशत्रोर्लवणाभिधस्य वधाय शत्रुघ्नमथादिदेश ॥ २७६ ॥
शूलायुधे तेन हतेऽथ दैत्ये तत्कानने काञ्चनतोरणाङ्का ।
दिव्येव शत्रुघ्ननिवेशिताभूत्पुरी प्रथार्हा मधुराभिधाना ॥ २७७ ॥
काले प्रयाते सुतमष्टवर्षं स्कन्धे समादाय मृत द्विजन्मा ।
उच्चै प्रचुक्रोश सभाङ्गनाग्रद्वारान्तिके वेत्रिभयानभिज्ञ ॥ २७८ ॥
अय शिशुर्मे स्थविरस्य सूनुर्व्यसुत्वमाप्तस्तिलतोयदाता ।
नृपापचारेण भवत्यवश्यमकालमृत्युव्यसन प्रजानाम् ॥ २७९ ॥
धर्मद्रोहिणि विद्रुतार्द्रकरुणे क्षुद्रै प्रजोपद्रवै-
र्धूर्तैर्भुक्तधने[1] प्रधानविमुखे विज्ञप्तिनिद्राजुषि ।
कायस्थैरजितैर्जिते क्षितिपतौ लब्धोदयैरिन्द्रियै-
र्दुर्भिक्षानलचौरवारिमकरैर्दीनो जन पीड्यते ॥ २८० ॥
नाथे दिक्षु भगीरथे शुभकथे पुण्याप्ततीर्थप्रथे
क्रान्तस्वर्गपथे पृथौ दशरथे याते यश शेषताम् ।
कष्ट नष्टधृति प्रकृष्टविपदामाधारभूताधुना
देवी मज्जति राजदुष्कृतिभरैर्भीराभिभूतेव भू ॥ २८१ ॥
विप्रार्तनादेन विचार्यमाणकारुण्यदैन्यव्यसनेऽपि रामे ।
सभ्येषु मूकेषु मुनीश्वरेषु समभ्यधान्नारद एव वाग्मी ॥ २८२ ॥
शूद्रस्तपस्तीव्रतर करोति शम्बूकनामा दिशि दक्षिणस्याम् ।
स एव वर्णाश्रमधर्मलोप पुत्रक्षये कारणमभ्यजाते ॥ २८३ ॥
श्रुत्वोदित[2] नारदवाक्यमेतत्स्मृताप्तमारुह्य विमानराजम् ।
अदक्षिण धर्मपथस्य राजा गत्वावधीद्दक्षिणदिक्स्थित तम् ॥ २८४ ॥
रामासिपट्टेन निकृत्तकण्ठे शूद्रे विमानेन दिव प्रयाते ।
निजात्मजे तत्क्षणलब्धजीवे ममार्ज निन्दा स्तुतिभिर्द्विजाति ॥ २८५ ॥

---

१ 'करणे' क ग २ 'धनै' क ग घ ३ दुष्कृत ख ४ 'श्रुत्वोचित' ख

हैमी कृता तस्य सुवर्णकारैरभिन्नरूपा रघुराजपत्नी ।
अभूत्परित्यागघनावमानमन्युव्रता मौनवतीव सीता ॥ २८६ ॥
वाल्मीकिशिष्यानुगतौ कुमारौ रामात्मजौ तत्र लव कुशश्च ।
अगायता श्रोत्रसुख नृपाग्रे स्वरेण रामायणमादिकाव्यम् ॥ २८७ ॥
पुत्रौ परिज्ञाय मुनी द्ववाक्यात्तौ तुल्यरूपानुभवेन राम ।
करोतु सीता पुनरेव शुद्धिमित्यर्थना तत्र मुनेश्चकार ॥ २८८ ॥
वाल्मीकिशिष्यैरथ रामपत्नी ता प्रापिता यज्ञभुव क्षणेन ।
लज्जावती राजसहस्रमध्ये मन्युप्रगल्भा गिरमुज्जहार ॥ २८९ ॥
यद्यार्यपुत्रान्न पर प्रमृष्टश्चित्तेन वाचा मम कर्मणा वा ।
तत्सत्यसकल्पगुणेन तेन ददातु माता वसुधावकाशम् ॥ २९० ॥
अथोत्थिता मूर्तिमती क्षितिस्तामङ्के समादाय तल विवेश ।
काकुत्स्थहृद्भङ्गभियेव काङ्क्ष्या सुताररावेण निवार्यमाणा ॥ २९१ ॥
रामस्तत प्राप्तवधूनिराश पातालसहारविलाससज्ज ।
निवारित पद्मभवेन साक्षात्स्नेहार्द्रता पुत्रयुगे बबन्ध ॥ २९२ ॥
अथाश्वमेधे विधिभाजि पूर्णे कालेन साक्षाद्विजने समेत्य ।
सस्मारितो वैष्णवधाम राम सहानुजैर्दिव्यपद प्रपेदे ॥ २९३ ॥

अथ स भगवान्विष्णु कृत्वा जगन्निरुपप्लव
दशमुखभय हृत्वा हर्षप्रदस्त्रिदशश्रिय ।
पवनतनय धृत्वा धीरोन्नत सविभीषण
भुवनभवने कीर्तिस्तम्भ जगाम सुधाम्बुधिम् ॥ २९४ ॥

इति श्रीव्यासदासापराख्यक्षेमेन्द्रविरचिते दशावतारचरिते श्रीरामावतार सप्तम ।

---

८ श्रीकृष्णावतारोऽष्टम ।

अहो कालसमुद्रस्य न लक्ष्यन्तेऽतिसतता ।
मज्जन्तोऽन्तरनन्तस्य युगान्ता पर्वता इव ॥ १ ॥

---

१ 'प्रसृष्ट' क-ग घ

युगदीर्घे प्रयातेऽथ काले दिनक्ष(ग)णक्रमै ।
कैटभारिं पुनर्भूमिर्भारार्ता शरण ययौ ॥ २ ॥
सा ददर्श सुधाम्भोधौ प्रबुद्ध शेषशायिनम् ।
विश्वरूप फणारत्नसहस्रप्रतिबिम्बितम् ॥ ३ ॥
सुखप्रबोधपृच्छान्ते चतुर्मुखमुखै सुरै ।
मुनिभिर्नारदाद्यैश्च प्रणतै परिवारितम् ॥ ४ ॥
पादसवाहनव्यग्रा श्रिय प्रेमामृतह्रदे ।
वहन्त हृदये व्यक्त कौस्तुभप्रतिबिम्बिताम् ॥ ५ ॥
मही मरकतश्यामा व्यक्तमौक्तिकभूषणा ।
खलक्ष्मीर्लक्ष्यनक्षत्रमालेव प्रणनाम तम् ॥ ६ ॥
सा प्रणामचलत्कर्णोत्पलालिस्वनसनिभाम् ।
विज्ञप्तिं ज्ञातवृत्तस्य चक्रे विध्वान्तरात्मन ॥ ७ ॥
भगवन्भवत सर्वलोकचिन्तार्तिहारिण ।
वात्सल्यपेशलस्याग्रे पुनरुक्त निवेद्यते ॥ ८ ॥
हिरण्याक्षबलात्क्षिप्ता निक्षिप्तक्षितिभृत्कुला ।
समुत्क्षिप्ताक्षयैवाह वराहवपुषा स्वयम् ॥ ९ ॥
कालनेमिप्रभृतय पुरा मद्भारशा[1]तये ।
ये हता भवता दैत्यास्तेऽवतीर्णा पुनर्नृपा ॥ १० ॥
उग्रसेनस्य तनय क्रूर क्रूरतरानुग ।
वृष्णिवशे समुत्पन्न कालनेमिर्महासुर ॥ ११ ॥
अनन्तदैत्यभूपालबलभारभरार्दिता ।
अधर्मबहुल काल न सहे वोढुमक्षमा ॥ १२ ॥
श्रुत्वैतदुक्तमुर्वर्या भगवान्सस्मितानन ।
करिष्याम्युचित सर्वमित्युक्त्वा विससर्ज ताम् ॥ १३ ॥
पृथिव्यामथ यातायां विधा(ज्ञा)य हृदयस्थितम् ।
विष्णो समीहित सर्वं सुरान्प्राह पितामह ॥ १४ ॥

---

१ 'अथोद्गता' ख ग २ 'सम[2]तात' ख

भूमिभारावताराय देवोऽवतरति क्षितिम् ।
यदुवृष्णिकुले याति वसुदेवस्य पुत्रताम् ॥ १५ ॥
यूयमशावतरण कुले कुरुत भारते ।
इत्युक्ते पद्मगर्भेण तथेत्युक्त्वा ययु सुरा ॥ १६ ॥
तत कदाचित्प्रययौ नारदो मथुरा पुरीम् ।
स्वच्छ दवादनिरत कलिकेलिकुतूहली ॥ १७ ॥
स रह कसमभ्येत्य प्राप्तपूजासनोऽवदत् ।
धर्ममार्गेण वर्तस्व रक्षेमा विद्रुता श्रियम् ॥ १८ ॥
पितृष्वसुस्ते देवक्या य समुत्पद्यते सुत ।
स सुरैर्निश्चितोऽन्ताय विभूतेर्जीवितस्य ते ॥ १९ ॥
उक्त्वेति याते देवर्षौ कस पापी पितृष्वसुः ।
देवक्या किंकरान्गर्भनिधनाय समादिशत् ॥ २० ॥
हतेषु षट्सु बालेषु वसुदेवसुतेष्वथ ।
सपत्न्यै सप्तम गूढ रोहिण्यै देवकी ददौ ॥ २१ ॥
स विष्णो शयनाभ्यासाद्भूभारभरणक्षम ।
अवतीर्ण शिशु शेष प्रीतिमन्तर्वहन्निव ॥ २२ ॥
अथाष्टम सुत जात वसुदेव स्वय निशि ।
गोकुले नन्दगोपस्य निदधे वधशङ्कित ॥ २३ ॥
नन्दपत्न्या यशोदाया कन्या विनिमयेन स ।
आदाय गूढसंचारी निजजायान्तिकेऽक्षिपत् ॥ २४ ॥
सा कन्या करुणाहीनै प्रबुद्धैरथ किंकरै ।
शिलायामाहता दीप्ता विद्युल्लेखेव ख ययौ ॥ २५ ॥
साष्टादशभुजा कान्ता प्रदीप्तविविधायुधा ।
कसस्यायु पिबन्तीव भेजे विन्ध्यवसुधराम् ॥ २६ ॥
रोहिणीभवनाज्ज्येष्ठमपि गूढमति सुतम् ।
वसुदेव क्षयभयान्नन्दगोपगृहेऽत्यजत् ॥ २७ ॥

---

१ 'कुर्वन्तु' क २ 'मथुरा नारद' ख ३ 'विदित' ख ४ 'शिशु' क

तौ संकर्षणकृष्णाख्यौ यशोदा दधती ययौ ।
विश्रुता दानसभोगौ श्रीरिव स्पृहणीयताम् ॥ २८ ॥
संकर्षण शशिसित कृष्णो मरकतद्युति ।
बभतु प्रथमोद्भेदौ गङ्गायमुनयोरिव ॥ २९ ॥
स्वदेहरक्षायत्नेन बालोद्वलनशालिना ।
कसेनान्यत्कृत मोहादन्यद्दैवेन[2] निर्मितम् ॥ ३० ॥
कलयति धिया स्वार्थं सर्वं सदाभ्युदयेच्छया
किमपि यतते तावद्यावत्फल परिदृश्यते ।
तदनु च विधि क्रीडोन्मत्त करोति तदङ्गना
जलभृतघट भङ्क्त्वा दूरादिवाशु जैलस्थितिम्[3] ॥ ३१ ॥
राज्यार्हौ गोकुले बालौ कस श्रुत्वा तयो क्षये ।
चक्रे गूढोद्यमोपायान्गर्भव्यत्ययशङ्कित ॥ ३२ ॥
स्तन्यतृप्त शिशु कृष्ण कदाचिन्निद्रयान्वित ।
पादप्रहारेणाविद्ध बभञ्ज शकट महत् ॥ ३३ ॥
विसृष्टामथ कसेन पूतना निशि राक्षसीम् ।
विषार्द्रस्तनदा कृष्णश्चक्रे निष्पीतजीविताम् ॥ ३४ ॥
किंचित्सचरणाभ्यासे पाणिमालम्ब्य यत्नवान् ।
दत्तद्वित्रिक्रमश्चक्रे हर्षं मातुस्त्रिविक्रम ॥ ३५ ॥
तत कुमारयो पातभीत्या हरिणवेगयो ।
अविश्रान्तानुसरणे यशोदा श्रममाययौ ॥ ३६ ॥
उद्विग्ना गतिविघ्नाय कृष्णस्य जननी व्यधात् ।
बलिबन्धनधीरस्य दाम्ना बन्धमुलूखले ॥ ३७ ॥
दामोदरस्ततो नाम्ना समाकर्षन्नुलूखलम् ।
मध्येन निर्ययौ वेगाद्यमलार्जुनवृक्षयो ॥ ३८ ॥
सलग्नोलूखलाकर्षात्पेततुस्तौ महाद्रुमौ ।
यमुनाक्षोभसभूतभयकम्पितगोकुलौ ॥ ३९ ॥

---

१ 'विनतादान' ख-ग २ 'दैवविनिर्मित' ख ग ३ 'जन' क-ग

तत कृष्णाश्रयेण श्रीर्गोकुले जितनन्दना।
स्वभावरमणीयेऽपि रमणीयतराभवत् ॥ ४० ॥
स्निग्धश्यामास्तरुतृणभुव सपतन्निर्झरौघा
मेघप्रेमोन्मुखशिखिमुखस्थायिनो मन्थघोषा।
गायद्गोपीस्तिमितहरिणीहारिण काननान्ता
कान्ताश्चक्रु प्रमदसमय(मसम) यामुना कूलकच्छा ॥ ४१ ॥
तत स्तोकपरिम्लाने शैशवे शिशिरोपमे।
माधवस्याभवत्किंचिदुन्मुखी यौवनद्युति ॥ ४२ ॥
तत कृष्णस्य गोपालडिम्भमण्डलवर्तिन।
बभूव कन्दुकोद्दामक्रीडासु निबिडो रस ॥ ४३ ॥
पतिते यमुनाकूलसलिले केलिकन्दुके।
ददर्श कालियस्योग्र नागस्य भवन हरि ॥ ४४ ॥
व्याप्त कल्पान्तरजनीकवलीकारविभ्रमै।
कृतान्तमहिषश्यामैर्निर्स्निशविमलैर्जलै ॥ ४५ ॥
काल कथ वसतीह(त्येष) भयस्यापि भयकर।
स तैराकृष्यमाणोऽपि कृष्णस्तद्दर्शनोद्यत ॥ ४६ ॥
कदम्बशाखामालम्ब्य भवनोपान्तवर्तिनीम्।
पपात दुरितोत्पात सावेग क्षुभितेऽम्भसि ॥ ४७ ॥
भ्रमद्यमभुजाभेन शौरिभोगेन भोगिन।
आलिङ्गितस्तमाधूय वेगेनाचक्रमे शिर ॥ ४८ ॥
पादाक्रान्तफणस्य फूत्कृतिविषावेगोष्णनि श्वासिन
कोपक्लेशविशेषद तकषणप्रोद्भूतधूमैर्हरे।
कालभ्रूभ्रमभङ्गुरैर्वृतमभूत्पाताळमूलोद्भटै
काले कलियबान्धवैरिव जल साहायकाभ्यागतै ॥ ४९ ॥
पीडित शरण शौरिं स यातस्तद्विरा ययौ।
रौद्र समुद्र तत्पादमुद्रया तार्क्ष्यनिर्भय ॥ ५० ॥

ततस्तालवने दैत्य धेनुक खररूपिणम् ।
जघान गोकुले विघ्न हेलयैव हलायुध ॥ ५१ ॥
अथ गोपालरूपेण प्रलम्बो नाम दानव ।
कन्दुककीडया प्रीतिं विदधे रामकृष्णयो ॥ ५२ ॥
कदाचित्स्कन्धमारूढस्तेन वेगवता हृत ।
रामस्तस्याकरोन्मुष्टिपातेन शतधा शिर ॥ ५३ ॥
अथ गोवर्धनगिरौ शक्रयागमहोत्सवे ।
भक्ष्यभोज्यमहारम्भसभारो गोकुलेऽभवत् ॥ ५४ ॥
पूज्य पर्वत एवायमित्युक्त्वा शक्रपूजनम् ।
निवार्य कृष्णस्तद्भोज्य बुभुजे दिव्यरूपभृत् ॥ ५५ ॥
तत प्रम्लानमानेन मन्युना शतमन्युना ।
प्रेरिता घननिर्घोषघोरमेघा समाययु ॥ ५६ ॥
तैर्व्याप्तवासरालोकैर्निगीर्णभुवनैर्घनै ।
आहूतेव महारावै कालरात्रिरदृश्यत ॥ ५७ ॥
विरावक्रुतहृद्धट्टमेघसघट्टविप्लवे ।
ख क्षितौ जलरूपेण भयभग्नमिवापतत् ॥ ५८ ॥
ते शक्रक्रोधसनद्धा शक्रचापचिता घना ।
सद्य पीतमिवाम्भोधिं वमन्त क्ष्मामपूरयन् ॥ ५९ ॥
सरम्भेण घनाघनैर्घनतरै सपीड्यमानैर्मिथ
प्रोद्भूतेऽथ पृथुव्यथारवनिभे सस्फूर्जिते गर्जिते ।
भीत्या कापि ययु क्षितिच्युतनभ सभावनाकम्पिता
कल्पा तागमशङ्किता इव महानीहाररुद्धा दिश ॥ ६० ॥
धारासाराशनिनिपतनक्लेशसपीडितानाँ
सीदद्वत्सप्रणिहितदृशा शीतवातार्दितानाम् ।
वेगक्षोभागतगिरिनदीनाददीनाननाना
प्राणत्राण क्वचिदपि गवा नाभवद्विह्वलानाम् ॥ ६१ ॥

अङ्गभङ्ग गवा दृष्ट्वा गोविन्द [1]करुणाकुल ।
त्राणाय गिरिमुद्धृत्य गोवर्धनमधारयत् ॥ ६२ ॥
छत्रीकृते गिरौ तस्मिन्दोर्दण्डधृतिनिश्चले ।
गोगणाना सगोपाना पुनर्जीवागमोऽभवत् ॥ ६३ ॥
उत्क्षिप्तेऽसुरवैरिणा क्षितिधरे क्षीरोदधि क्षोभवा-
न्मेजे भीतिमकाण्डदण्डमथनक्षोभाभिशङ्की पुन ।
विन्ध्यस्यासमयोद्गम विगणयन्मन्ये श्वसन्कम्पवा-
न्हस्तन्यस्तसमस्तशापसलिल क्षोभादगस्त्योऽभवत् ॥ ६४ ॥
अवहदहतधैर्ये दोष्णि कृष्णस्य भार-
श्रमशमनधियेव क्ष्माधर सोपरोध ।
अविरतनिपतद्भिर्निर्झराणा सहस्रै
स्फटिकविकटजम्भस्तम्भसभारशोभाम् [2]॥ ६५ ॥
गोवर्धनस्य धरणे व्रजसुन्दरीणा
साहायकोच्चचरणोचितदोर्लतानाम् ।
अप्राप्तिलोलकरविभ्रममाकलय्य
कृष्ण स्मिताशुधवलाधरपल्लवोऽभूत् ॥ ६६ ॥
कृष्णेनाश्चर्यनिधिना गोगणे परिरक्षिते ।
लज्जयेव न्यवर्तन्त पवनोच्छ्वासिनो घना ॥ ६७ ॥
तत शक्र समभ्येत्य प्रसाद्य विजने हरिम् ।
कामधेनुगिरा तस्मै गोपालाधिपता ददौ ॥ ६८ ॥
अथ प्रपेदे गोविन्द प्रौढ मदमिव द्विप ।
सहकारतरु कान्त वसन्तमिव यौवनम् ॥ ६९ ॥
तस्य सानन्दशृङ्गारे वयसि व्यक्तता गते ।
बभूवाभिनवोत्साह प्रतापाभरणेन स ॥ ७० ॥
तस्य निर्भरतारुण्यलावण्य नयनामृतम् ।
पिबन्तीनामभूद्गोपकान्ताना मदविभ्रम ॥ ७१ ॥

---

१ 'करुणालय' क ग २ 'जम्ब' ग, 'जृम्भ' घ

[1]व्यामूढस्खलितार्धविक्लवपदा वाणी गतिश्चास्फुटा
चित्तं भ्रूयुगलं च वीचिरचनासवादि दोलायितम् ।
निद्रा किं च दरिद्रतामुपगता लज्जा च सज्जा स्मरे
क्षैब्यं माधवयौवनद्युतिपदे गोपाङ्गनानामभूत् ॥ ७२ ॥

स्वैराचारस्मरपरिचये तत्र शौरे प्रवृत्ते
वेषालापोद्धतगतितयान्योन्यसभाव्यमाने ।
आसील्लज्जाविनयनिभृता व्यक्तससक्तमन्यु-
स्तासामन्तः कलुषकलनानल्पसकल्पजल्पः ॥ ७३ ॥

कर्णाभ्यर्णविकीर्णलोचनरुचः सन्त्येव चन्द्रानना-
स्त्वत्तोऽन्या नवयौवनोन्नतिलसल्लावण्यगण्या परम् ।
यासामेष हरिर्मनोरथशतैरर्थी क्षणालोकने
किं कृष्णेन विलोकिताहमिति ते रूढः प्रमूढे मदः ॥ ७४ ॥

अन्तर्लोचनयोर्विशत्यविरतं लग्नश्च पाणौ गतिं
निर्बन्धेन रुणद्धि धावति मुहुर्दृशामिकामोऽधरे ।
सख्यः किं करवाणि वारणशतैर्नैवापयाति क्षणं
कृष्णः षट्चरणः प्रयाति चपलः पुष्पोच्चये विघ्नताम् ॥ ७५ ॥

कर्षत्यंशुकपल्लवं परिहृतः प्रत्याहृतिं नोज्झति
प्रक्षिप्तश्चरणे [2]लगत्यविरतं तिष्ठत्यदृश्यः पथि ।
अङ्गान्युल्लिखति प्रसह्य यदि वा लब्धावकाशः क्वचि-
त्किं शौरिर्धनकुञ्जवञ्जुललताजालान्तरे कण्टकः ॥ ७६ ॥

स्वच्छाम्बुप्रतिबिम्बवक्रतिलकोल्लेखादरालोकन
यत्नेनोचितचूतपल्लवलवे कर्णावतंसस्पृहा ।
एतस्या कुसुमेषु बन्धनधिया केशावकाशक्रिया
केनाय नवरागयोगगुरुणा वेषोपदेशः कृतः ॥ ७७ ॥

---

१ 'मूढप्रस्खलि' ख ग २ 'लीलायितम्' ख ग ३ 'गलति' क ख ४ 'वन' ग; 'नग' ख

कोऽय याति लघुक्रमैरहमह कस्त्व सखि श्यामला
श्वासायासवती क्व यासि तिमिरे त नष्टमिष्ट मृगम् ।
अन्वेष्टु यमुनातटीमुपगता भीतास्मि भूतभ्रमा-
न्मूढे कृष्णभुजग एष विटपे कौटिल्यलीन स्थित ॥ ७८ ॥
सतप्तैव हता करोमि किमह ता प्रेषयन्त्या मया
लब्ध मौग्ध्यफल भुजगनिकट वक्रा द्विजिह्वा सखीम् ।
धिग्दूतीं तरुणीं करोति किल या स्वीकृत्य दूरे प्रिय
हस्तोत्सृष्टखग प्रयत्ननिचयैर्नायाति तृप्तोऽन्यत ॥ ७९ ॥
जानेऽन्यासहित विलोक्य कुटिल त कूटकोष त्वया
प्रत्यक्षागसि निह्नवासहनया कोपेन दष्टोऽधर ।
श्वासायासविसस्थुला न च कुचोत्कम्प विमुञ्चस्यहो
मोहाद्वा सहविप्लवे चपलया किं प्रेषिता त्व मया ॥ ८० ॥
न स सखि यमुनायास्तीरवानीरकुञ्जे
गहनभुवि भवत्या मत्प्रिय क्वापि दृष्ट ।
सुमुखि फलमियत्तु स्नेहमोहात्त्वयाप्त
कुचमुखलिखितेय कण्टकोल्लेखरेखा ॥ ८१ ॥
इत्यभून्मदनोद्दामयौवने कालियद्विष ।
गोपाङ्गनाना सरम्भगर्भोपालम्भविभ्रम ॥ ८२ ॥
प्रीत्यै बभूव कृष्णस्य श्यामानिचयचुम्बिन ।
जाती मधुकरस्येव राधैवाधिकवल्लभा ॥ ८३ ॥
लावण्य नवनीतसारमभृतस्येवोद्वहन्त्यो नव
तन्वाना द्युतिदिग्धदुग्धधवला मुग्धस्मिताशुच्छटाम् ।
माद्यद्यौवनकुम्भिकुम्भसुभगाभोगस्तनोत्तम्भिता
धैर्यं कस्य न दीर्घनेत्रवलनैर्मथ्नन्ति गोपाङ्गना ॥ ८४ ॥
कदाचिदथ यातेऽस्त गभस्तिमति शर्वरी ।
आययौ गोपकान्तेन शनै कृष्णाभिसारिणी ॥ ८५ ॥

शशाङ्काकृतसकेतसमागमविलोकिनी ।
क्षपा प्रतीक्षमाणेव तम श्यामाम्बरा बभौ ॥ ८६ ॥
अथोदयौ सुधास्यन्दस्वेदार्द्रप्रसरत्कर ।
तुल्यालिङ्गनजामीर्ष्यां दिशन्निव दिशा शशी ॥ ८७ ॥
ततस्तारुण्यवानिन्दुर्मीलत्तरलतारकम् ।
मुख चुचुम्ब श्यामाया[1] कराकृष्टतम पट ॥ ८८ ॥
त्यक्त्वा पूर्वां स्पृशन्किंचिद्दक्षिणा च तथोत्तराम् ।
शिश्रिये पश्चिमामाशा सुधाशुर्बहुवल्लभ ॥ ८९ ॥
अत्रान्तरे समभ्यायादरिष्टो दुष्टचेष्टित[2] ।
जङ्गम शृङ्गवानद्रिरिव दैत्यो वृषाकृति ॥ ९० ॥
किंचित्कुञ्चितकण्ठकायकषणक्लेशत्रुटत्पादप-
प्रोद्भूतोत्कटटाकृतैर्गलल्लठद्गम्भीरघोरस्वनै ।
[3]सीत्कारश्वसितै खुराग्रविषमोत्खातावकीर्णक्षिते-
स्तस्योद्भारभरेण भग्नमभवत्कम्पाकुल गोकुलम् ॥ ९१ ॥
तद्भीतिच्युतगर्भासु गोषु गोपगणे गते ।
कृष्ण गोपाङ्गना कण्ठे जगृहुर्भयविह्वला ॥ ९२ ॥
शृङ्गप्रहाराभिमुख दोष्णा कृष्णस्तमुद्धतम् ।
निपीड्य कण्ठे कुण्ठेच्छ चकार गतजीवितम् ॥ ९३ ॥
निष्पिष्टे शौरिणारिष्टे कसामात्ये महौजसि ।
सत्कथा पप्रथे लोके पृथुविस्मयकारिणी ॥ ९४ ॥
तत प्रभाते कसस्य सुहृत्केशी महासुर ।
आययौ हयरूपेण खुराघातक्षतक्षिति ॥ ९५ ॥
करालो मासल श्रृङ्गी कृष्णताल्वोष्ठिकर्णवान् ।
लक्षित ककुदावर्ती जगत्सक्षयलक्षणै ॥ ९६ ॥

---

१ 'यामिन्या' ख २ 'चेतन' घ ३ 'सीत्कारोच्छ्वसितै' ख

तस्य हेषितनिर्घोषैर्घोरै खुररवेण च ।
त्रस्तगोगणमुद्विग्नगोप वनमकम्पत ॥ ९७ ॥
शृत्कारश्वसितेन तर्जितमरुत्कोपात्तमृत्युस्थिति-
स्तेजोनिर्जितपावक श्रमजलैर्विक्षिप्तपाथ पति ।
निश्चेष्टा वसुधा विधातुमुदित कल्पान्तकालोपम
सोऽभूदाकुललोकपालविभवावष्टम्भकृद्दु सह ॥ ९८ ॥
दन्ताभिघातसज्जस्य तस्यास्ये द्विगुणीकृतम् ।
उत्क्षिप्ताग्रखुरस्याशु न्यदधद्भुजमच्युत ॥ ९९ ॥
तद्दन्तकषणेनापि निर्विण्णघनविभ्रम ।
कृष्णप्रसारितो बाहु केशिवक्त्र द्विधा व्यधात् ॥ १०० ॥
भग्ने निपतिते तस्मिन्कंसस्येव मनोरथे ।
अभूज्जम्भारिभवने तार्क्ष्यध्वजजयस्वन ॥ १०१ ॥
अत्रान्तर वृष्णिवृद्धै सह स्वसचिवक्षयम् ।
चिन्तयन्मंत्रभवने कस प्रोवाच नि श्वसन् ॥ १०२ ॥
इय जनितलज्जेव मानम्लानिर्महीयसी ।
यन्मेरुतुल्यैर्युष्माभि क्रियते तृणचिन्तनम् ॥ १०३ ॥
उद्धव शनिरक्रूर शतधन्वा विदूरथ ।
भोजाद्याश्च ममापूर्वं शृण्वन्त्वसमविग्रहम् ॥ १०४ ॥
पितु स्वसु पतिर्वृद्ध स्नेहसंमानवृत्तिभि ।
वसुदेव स चास्माभि पूजित परिपूरित ॥ १०५ ॥
स्वसुतौ तेन निन्यस्तौ गोकुले गूढचारिणौ ।
शोकातङ्काङ्कुरौ यौ मे विषपादपता गतौ ॥ १०६ ॥
ज्ञातिभ्यो भयमस्तीति सत्यमाह महामति ।
विभीषणमतोपायैर्हन्यमानो दशानन: ॥ १०७ ॥

---

१ 'मन्त्रि' क घ २ 'न कृत' ख ३ 'शङ्कातङ्काकुलौ' ख.

मर्मज्ञ स्वजन पुसा क्षये जागर्ति नापर ।
शिक्षापक्षिभिराकृष्टा क्षय यान्त्येव पक्षिण ॥ १०८ ॥
सदा दारूणि दह्यन्ते दारुजेन[2] वह्निना ।
क्रिमिणा स्वाङ्गजातेन पात्यन्ते प्रौढपादपा ॥ १०९ ॥
मृज्जातलोहकुद्दालै खन्यते मृण्मयी मही ।
स्वजातैर्निर्झरैर्नीता कषद्भिर्भूधरा क्षयम् ॥ ११० ॥
ज्ञातिप्रहारो नि शैर्ममर्मपाती[3] पराधिक ।
लोहाधिका व्यथामस्थ्न करोत्यस्थिसुख शर ॥ १११ ॥
सहभोग्यामपि ज्ञातेर्नेच्छन्ति ज्ञातय श्रियम् ।
काङ्क्षन्ति भूतिमन्येषा दूरालोकननिष्फलाम् ॥ ११२ ॥
किं कृत सुकृत तावद्वसुदेवेन धीमता ।
बन्धुद्रोहविदग्धेन गोपालौ कुर्वता सुतौ ॥ ११३ ॥
उपेक्षितौ बन्धुधिया तत्सुतौ दयया मया ।
भुजच्छेदप्रवृत्तौ मे प्रयातौ चिन्तनीयताम् ॥ ११४ ॥
कृष्णेन निहतोऽरिष्ट स च केशी सुहृन्मम ।
तद्भ्रात्रा मुष्टिना पिष्ट प्रलम्ब स च धेनुक ॥ ११५ ॥
अधुना कोपविवलद्भूलता नीतिमेतयो ।
करोम्यह यथा बालौ पुनर्नैव करिष्यत ॥ ११६ ॥
इति कंसेन सावज्ञमन्तर्गम्भीरमंयुना ।
उक्ते तमुद्धव प्राह षाड्गुण्यविनयेद्धधी ॥ ११७ ॥
राजन्न स्वजने कोप कुपित कर्तुमर्हसि ।
स्वीकार्या सर्वथा क्रुद्धलुब्धमीतावमानिता ॥ ११८ ॥
क्रुद्धान्प्रसादनैर्लुब्धा धनैर्भीताश्च सान्त्वनै ।
माननैरवमानार्तान्नयेद्भिन्नानभिन्नताम् ॥ ११९ ॥
विभिन्नस्वीकार शमयति नृपाणा रिपुभय
निजैर्जीवोच्छित्तिर्भवति कुपितैर्धातुभिरिव ।

---

१ 'समन्यु' ख २ 'एव' ख ३ 'चर्म' घ

न वैर वैरेण प्रशममुपयाति क्वचिदपि
प्रदीप्तोऽग्नि शान्ति व्रजति जलपुञ्जैर्न शिखिना ॥ १२० ॥
बान्धवौ पुत्रसदृशौ रामकृष्णौ न ते परौ ।
लक्ष्मीरक्षा क्षितीशाना राजपुत्राभिरक्षणम् ॥ १२१ ॥
समीपे सर्पाभ परमुपसरन्मेषहनन
खलग्रामे मूर्ख (मुख्य) परपुरगत शत्रुबलकृत् ।
हते तस्मिन्पाप किमपि कुलबीजाङ्कुरहति-
र्न दूरे नादूरे भवति सुखरक्ष्य क्षितिपज ॥ १२२ ॥
निरस्त क्ष्माभुजा बन्धु क्षीणवृत्तिर्विपद्गत ।
तन्नामविक्रयोत्क्षेपैर्लक्षितो दिक्षु भिक्षते ॥ १२३ ॥
परम श्रीमतामेतन्माननामविनाशनम् ।
यद्यात्मपूरितो बन्धु परस्योत्तानपाणिताम् ॥ १२४ ॥
[1]त्वद्बन्धुसुतयोर्नैव युक्ता गोपकुले स्थिति ।
न यावद्विप्रकिर्णौ तौ तावत्स्वीकरणक्षमौ ॥ १२५ ॥
इत्युद्धवेनाभिहिते हिते सुविहिते श्रिय ।
अच्छिन्नदानव्रतवानक्रूर कसमभ्यधात् ॥ १२६ ॥
एकपात्रोचिता यस्य श्रिय नाश्नन्ति बान्धवा ।
तस्यात्मपोषतोषस्थकोषक्लेशाय सपद ॥ १२७ ॥
त्यागभोगभरोद्भृष्टा मानोन्मृष्टा महात्मनाम् ।
भान्ति भृत्यगृहोत्सृष्टा बन्धूच्छिष्टा विभूतय ॥ १२८ ॥
भूतिमालोक्य विमुखा यस्य नि श्वस्य बान्धवा ।
गच्छन्ति न विशेषोऽस्ति श्मशानस्य च तस्य च ॥ १२९ ॥
रत्नाकरसमृद्धश्रीर्बन्धुर्यस्य त्वमीदृश ।
स कृष्ण कानने शष्पशय्यापरिचिताकृति ॥ १३० ॥

---

१ त्वद्बन्धु क ख ग

स्वकर्मभागिन सर्वे निष्फल स्वजनोऽर्थवान्।
नातरङ्गस्य शङ्खस्य हृता सुषिरताम्बिना ॥ १३१ ॥
ज्ञातिर्नदीन कृष्णस्तु दयया सविभज्यते।
हेलोर्मिनिर्मित मन्ये तेनैश्वर्यं दिवौकसाम् ॥ १३२ ॥
धेनुत्राणे शिखरिपतिना कृष्णदोष्णि स्थितेन
श्रान्ते शक्रे विफलजलदे लज्जिते शैलशत्रौ।
लब्धाकाशप्रसभगतिना निर्झरोद्घातघोषै-
र्हर्षस्पर्शं प्रकटित इव स्फीतफेनाट्टहास ॥ १३३ ॥
मददलनविधाने कालियस्याहिभर्तु-
र्दमनशमितशक्तेर्देहसंदेहभाज।
शरणगमनदैन्यम्लानमानस्य कृष्ण
शिरसि चरणमुद्रा तार्क्ष्यरक्षा चकार ॥ १३४ ॥
नाम्ना मानमहोन्नतिं प्रतनुते बध्नाति शोभा गुणै
पुष्णात्याजिषु जिष्णुना शशिसित भ्राजिष्णु दोष्णा यश।
हर्षं वर्षति निश्चलेन सहजप्रेम्णा च चित्तस्य य
स श्लाघ्य सुकृतेन बान्धवमणिर्भाग्योद्भवैर्लभ्यते ॥ १३५ ॥
अबन्ध्यसगतिर्बन्धु कृष्णतुल्योऽस्ति कस्तव।
येन शक्रोऽपि गोपाना गौरवावनत कृत ॥ १३६ ॥
उक्त नि शल्यकल्याणमस्माभिर्यदि मन्यसे।
तत्त्वद्विराह गच्छामि कृष्णाह्वानकृतार्थताम् ॥ १३७ ॥
विपुल प्रस्थितश्चाय धनुर्यागमहोत्सव।
करोम्यह तमुद्दिश्य केशवस्य निमन्त्रणम् ॥ १३८ ॥
इत्यक्रूरवच श्रुत्वा कस कुटिलचेष्टित।
व्रजेति नि श्वसन्नुष्णमभ्यधात्तमधोमुख ॥ १३९ ॥

---

१ 'तद्विरा तव' ख

अथ सञ्जरथे हन्तुमक्रूरे व्रजमुद्यते ।
अभूच्च द्रोदयोद्भूत इव वृष्णिकुलाम्बुधि ॥ १४० ॥
अतिक्रम्याथ मथुरामक्रूर प्रेषितो रथी ।
अवापाग्रसरत्सैन्य पर्यन्तग्राममेखलाम् ॥ १४१ ॥
प्रत्यग्रपाकविनमत्कलमक्षेत्रपङ्क्तिभि ।
हरितालरज पुञ्जरञ्जिताभिरिवाचिताम् ॥ १४२ ॥
कदलीश्यामलारामवटवाटलतावृताम् ।
लम्बमानघनालाबुतुम्बकूष्माण्डमण्डलाम् ॥ १४३ ॥
वलत्कुटिलकल्लोलकुल्याकलकलाकुलाम् ।
द्राक्षासुशीतलतलस्थलीशय्याश्रयाध्वगाम् ॥ १४४ ॥
अध्वन्यजग्धपूर्वेक्षुशरकशुक्लीकृतस्थलाम् ।
पाकपिङ्गलनारङ्गीवनै सध्यान्वितामिव ॥ १४५ ॥
ययौ स पश्यन्नि शङ्कशुकाशननिवारणे ।
उदञ्चद्भुजलक्ष्योच्चकुचाग्रा शालिपालिका ॥ १४६ ॥
स व्रजन्गोकुलोपान्तवनमाला व्यलोकयत् ।
उत्सरन्निर्झरासारस्निग्धश्यामलशाद्वलाम् ॥ १४७ ॥
गोरक्षादक्षशबरै कृतक्षुद्रर्क्षसंक्षयाम् ।
घोरव्याघ्रपथावद्धयन्त्रकूटघँटावटाम् ॥ १४८ ॥
तालीतालतमालसालकदलीपथ्यामलीश्यामल
खर्जूरार्जुनसर्जबिल्वबकुलप्लक्षाक्षलक्षाकुलम् ।
पर्यन्ते स ददर्श हर्षजनन स्फीतोपदेश गवा
नि श्वभ्रस्खलपुष्पशष्पशबल नि सेङ्कुल गोकुलम् ॥ १४९ ॥
अच्छिन्नोदितमन्थमन्थररव निर्घोषमेघभ्रम-
भ्राम्यन्मत्तमयूरनृत्तरुचिर गोपाङ्गनागीतिभि ।

—१ 'पचि तां' ख २-'श्रेणी' क— ३- 'सर्वेक्षु' क ४ 'घटापटाम्' ग- ५. 'नि सङ्गलो' ख-ग

नि स्यन्दस्थितमुक्तशष्पकवलक्लीबाङ्गसारङ्गक
प्रीतिं प्राप स वीक्ष्य यामुनवलद्वीचित्रज गोकुलम् ॥ १५० ॥
ततस्तत्सैनिकै कृष्ण प्रथमाप्तैर्निवेदितम् ।
पित पितृव्यमक्रूर शुश्रावाभ्यर्च्यमागतम् ॥ १५१ ॥
घृतकुम्भदधिस्थालिसहस्रोपायनै पुर ।
प्रणम्यमान गोपाग्र्यैर्ददर्शाक्रूरमच्युत ॥ १५२ ॥
रथाग्रादवरुह्याथ लोलकुण्डलकङ्कण (णम्) ।
दृष्ट्वा दामोदर दूरादक्रूर समचिन्तयत् ॥ १५३ ॥
अय स भगवान्विष्णुरवतीर्ण सनातन ।
भुवो भारावताराय मा जगादेति नारद ॥ १५४ ॥
एष पद्मपलाशाक्ष श्रीमान्मरकतद्युति ।
स्निग्धलावण्यपीयूषैर्लिम्पतीव मनो मम ॥ १५५ ॥
वृष्णियादववशस्य कियती स्पृहणीयता ।
अवतीर्ण स्वय यस्मिन्भगवानेषु केशव ॥ १५६ ॥
इति ध्यायन्प्रहर्षाश्रुसंरुद्धनयन स्खलन् ।
अकुण्ठोत्कण्ठया शौरेरक्रूरोऽन्तिकमाययौ ॥ १५७ ॥
पपात पादयोस्तस्य साम्रज प्रणतोऽच्युत[1] ।
गाढालिङ्गनसंगत्या हृदय प्रविशन्निव ॥ १५८ ॥
प्राप्तपूजासन कृष्ण सोऽवदत्तन्मुखे दिशन् ।
प्रमोदविस्मयस्नेहबहुमानमयीं दृशम् ॥ १५९ ॥
कृष्ण त्वद्दर्शनानन्दसुधासंपूरिते हृदि ।
त्वत्संभाषणहर्षस्य कावकाशो विधीयताम् ॥ १६० ॥
वसुदेवस्य पुण्याना पूर्णता किं दरिद्रता ।
यस्त्वा तनयमासाद्य स्वदृशाद्यापि नेक्षते ॥ १६१ ॥

---

१ 'क्लेवाङ्ग' क-ख-ग

भवतस्त्रिजगज्जन्मस्थितिसंहृतिकारिण ।
गूढजन्मकथा केन कथ्यते सर्ववेदिन ॥ १६२ ॥
सतत सहते तीव्रा त्वत्कृते कसवाच्यताम् ।
वसुदेवश्चलत्येषा नून न भवितव्यता ॥ १६३ ॥
जगद्धरणधीरेय धन्या देवी वसुधरा ।
भारावतारसनद्धश्चित्ते वहसि या सदा ॥ १६४ ॥
विस्मृता देवकी किं ते त्वन्नाम्नापि स्तुतस्तनी ।
त्वा विना या सुत राम कौसल्येवावसीदति ॥ १६५ ॥
धनुर्यागे विसृष्टोऽह कसेन त्वन्निमन्त्रणे ।
त्वदागमनमानेन धन्या नन्दन्तु यादवा ॥ १६६ ॥
तत्सर्वं करमादाय प्रात कसस्य शासनात् ।
आयान्तु नन्दगोपाद्या सर्वे समयवर्तिन ॥ १६७ ॥
इत्यक्रूरवच श्रुत्वा तमाभाषत केशव ।
प्रातरेवाहमागन्ता त्वदाज्ञा केन लङ्घ्यते ॥ १६८ ॥
तत प्रभाते संनद्ध रथमारुह्य सानुगा ।
मथुरा ययुरक्रूरसकर्षणजनार्दना ॥ १६९ ॥
कथ राधामनाम्न्यागतोऽहमिति माधव ।
अरतिं म्लानता चिन्ता व्रजन्मेजे विनि श्वसन् ॥ १७० ॥
यच्छन्गोकुलगूढकुञ्जगहनान्यालोकयन्केशव
सोत्कण्ठ वलिताननो वनभुवा सख्येव रुद्धाञ्चल ।
राधाया न न नेति नीविहरणे वैक्लव्यलक्ष्याक्षरा
सस्मार स्मरसाध्वसाद्धुततनो रावोक्ति(१)रिक्ता गिर ॥ १७१ ॥
गोविन्दस्य गतस्य कसनगरीं व्याप्ता वियोगाग्निना
स्निग्धश्यामलकूललीनहरिणे गोदावरीगह्वरे (१) ।

---

१ 'संहार' ख २ 'मन्ये' क ख ३ 'कुञ्जगूढ' ख ४ 'हरिणी' ग घ

रोमन्थस्थितगोगणै परिचयादुत्कर्णमाकर्णित
गुप्त गोकुलपल्लवे गुणगण गोप्य सरागा जगु ॥ १७२ ॥
ललितविलासकलासुखखेलनललनालोभनशोभनयौवनमानितनवमदने
अलिकुलकोकिलकुवलयकज्जलकालकलिन्दसुताविवलज्जलकालियकुलदमने ।
केशिकिशोरमहासुरमारणदारुणगोकुलदुरितविदारणगोवर्धनधरणे
कस्य न नयनयुग रतिसज्जे मज्जति मनसिजतरलतरङ्गे वररमणीरमणे १७३
उद्गीयमाने गुणसागरस्य गुणे गुणे रागरसेन शौरे ।
गोपाङ्गना गूढरसानुरागा मुहुर्मुहुर्मोहहता बभूवु ॥ १७४ ॥
गोविन्दे गुरुसनिधौ परवशावेशादनुक्त्वा गते
सुप्ताना बकुलस्य शीतलतले खैर कुरङ्गीदृशाम् ।
स्वप्नालिङ्गनसगतेऽङ्गलतिकाविक्षेपलक्ष्या मुहु-
र्मुग्धा वञ्चक मुञ्च मुञ्च कितवेत्युच्चैरुरुच्चैर्गिर ॥ १७५ ॥
राधा माधवविप्रयोगविगलज्जीवोपमानैर्मुहु-
र्बाष्पै पीनपयोधराग्रगलितै फुल्लत्कदम्बाकुला ।
अच्छिन्नश्वसनेन वेगगतिना व्याकीर्यमाणै पुर
सर्वाशाप्रतिबद्धमोहमलिना प्रावृण्नवेवाभवत् ॥ १७६ ॥
ज्ञात्वा कस समायान्तौ कुमारौ रामकेशवौ ।
चाणूरमुष्टिकौ मल्लौ विदधे तद्वधोद्यतौ ॥ १७७ ॥
अथ राजपथ प्राप्तौ बलात्सकर्षणाच्युतौ ।
राजार्हं चक्रतुश्चारुमाल्याम्बरविलेपनम् ॥ १७८ ॥
तौ विचित्राम्बरधरौ स्रग्विणौ चन्दनाचितौ ।
जनतानन्दजननौ राजद्वारमवापतु ॥ १७९ ॥
हर्म्यस्था देवकी दृष्ट्वा कृष्ण कमललोचनम् ।
बाष्पसरुद्धनयना सुमोह प्रस्रुतस्तनी ॥ १८० ॥
अथ राजाज्ञयोत्सृष्ट महामात्राङ्कुशेरितम् ।
गज कुवलयापीड ददर्शायान्तमच्युत ॥ १८१ ॥

क्रोधान्ध ममदोषदु सहतरं भूभारभूताकृतिं
कुर्वाण करदण्डकृष्टजनताजीवापहार मुहु ।
मातङ्ग कुनृपोपम मुररिपुर्दृष्ट्वा प्रहारोद्यत
हस्तोत्पाटितया जघान निजया निर्दारित दृष्ट्या ॥ १८२ ॥
अथ राजाज्ञया मल्लनागौ चाणूरमुष्टिकौ ।
कुमारयोरभिमुखौ चक्रतुर्जनसक्षयम् ॥ १८३ ॥
जानुबन्धभुजाकर्षतलाघातघने रणे ।
कृष्णश्चाणूरमवधीन्मुष्टिक च हलायुध ॥ १८४ ॥
भुजयोरिव कसस्य मल्लयोश्च्युतयोस्तयो ।
भ्रूभङ्गभीषणस्योच्चैरुच्चचारोत्कट वच ॥ १८५ ॥
वध्यता वसुदेवोऽय क्रियतां तत्क्षुतक्षय ।
विधीयता च गोपानामुचित राजशासनम् ॥ १८६ ॥
कसस्येति ब्रुवाणस्य मदोद्दामस्य गर्जत ।
दुष्टद्विपस्येव हरिर्वेगेनान्तिकमाद्रवत् ॥ १८७ ॥
संत्रस्ते वेत्रिसघे नवभयसमयोद्भ्रान्तसामन्तचक्रे
हस्तस्तस्ते तरुण्या शशिकरधवले चामरे विह्वलाया ।
कृष्ण कस चकर्ष प्रविलुलितसितोष्णीषविश्लेषकेशै
क्रोधाग्नेर्धूममालामिव कुसुमचलद्भृङ्गमाला दधानम् ॥ १८८ ॥
आकृष्टस्य सुरारिणारुणमणिव्याकीर्णदीर्घद्युति-
मौलिर्वक्षसि मौक्तिकाशुशबल कसासुरस्य च्युत ।
व्यक्तोऽभून्नरसिंहशुभ्रनखरव्यापारविश्र क्षण
दीर्णस्येव पुनर्हिरण्यकशिपो स्फीत स्रुतासृग्भर ॥ १८९ ॥
हत्वा दूरतराकृष्ट[1]मदान्ध कसकुञ्जरम् ।
उग्रसेन प्रैविदधे राज्ये तज्जनक हरि ॥ १९० ॥

---

१. 'मौष्टिकं' क-ख २ 'पुरो' क-ख ३ 'च विदधे' क-ख

पादयोर्वसुदेवस्य देवक्याश्चाच्युत पतन्।
बभूवानन्दनिस्पन्दनिबिडालिङ्गनातिथि ॥ १९१ ॥
आविर्भूता स्वय विद्या कलाश्च सकलास्तत ।
निनाय स्पृहणीयत्वमवधानेन माधव ॥ १९२ ॥
दक्षिणापथनाथस्य भीष्मकस्यात्मजा हरि ।
जहार रुक्मिणीं कन्या लक्ष्मीं जन्मान्तरागताम् ॥ १९३ ॥
रुक्मिण्यामथ कृष्णस्य प्रद्युम्न प्रथम सुत ।
जाम्बवत्यामभूत्साम्ब प्रतिबिम्बनिभौ पितु ॥ १९४ ॥
सुन्दरीणा सहस्राणि षोडशान्त पुरे हरे ।
बभूवुस्तासु पुत्राणा लक्षसख्योऽभवद्गण ॥ १९५ ॥
नाडायनीं चन्द्रसेना प्रद्युम्न प्राप वल्लभाम्।
यस्यामजीजनत्पुत्रमनिरुद्ध मनोभवम् ॥ १९६ ॥
तत शक्रगिरारुह्य गरुड गरुडध्वज ।
गगने दैत्यचक्राणा चक्रे चक्रायुध क्षयम् ॥ १९७ ॥
मुरसुन्दहयग्रीवनरकाद्या महासुरा ।
प्रययुश्चक्रिचक्राग्नौ क्षिप्रासङ्गपतङ्गताम् ॥ १९८ ॥
जरासधेन सरुद्धां मागधेन प्रमाथिना।
मथुरामथ सतज्य सानुग प्रययौ हरि ॥ १९९ ॥
द्वारकामथ कसारि पश्चिमाब्धितटे व्यधात्।
जितलङ्कालकानाकनागेन्द्रनगरी पुरीम् ॥ २०० ॥
बलात्क्षीरोदजन्मान पारिजात जनार्दन ।
हृत्वा शक्रपुरोद्यानाद्वारकाया न्यवेशयत् ॥ २०१ ॥
अत्रान्तरे कससुहृत्कराल कालविग्रह ।
प्रतिज्ञा कालयवनश्चक्रे वृष्णिकुलक्षये ॥ २०२ ॥
कृष्णस्त दुर्जय मत्वा नि सहायो भुजायुध ।
बुद्धियुद्धे धिय धृत्वा ययौ यवनमण्डलम् ॥ २०३ ॥

हेमरत्नमय तस्य प्रविश्य भवन हरि ।
भयप्रद यमस्यापि ददर्श यवनेश्वरम् ॥ २०४ ॥
सोऽपि कृष्ण विलोक्यैव पतित भुजगोचरे ।
मनोरथशतावाप्त जिघृक्षुस्त समाद्रवत् ॥ २०५ ॥
तस्मिन्नभिद्रुते रौद्रे जवेन प्रययौ हरि ।
न च पश्चाच्चचालास्य यवन पूर्वकर्मवत् ॥ २०६ ॥
चतु समुद्ररशना विगाह्यापि महीं हरि ।
दृष्ट्वा तमचल पश्चाद्विवेश हिमवद्गुहाम् ॥ २०७ ॥
तत्रेन्द्रार्थे हताशेषदैत्यस्य युगविस्तर ।
यात काल प्रसुप्तस्य मुचकुन्दस्य भूपते ॥ २०८ ॥
अर्धनिद्रादरिद्र मा शयान य करिष्यति ।
स भस्मसाद्यास्यतीति राजर्षि समय व्यधात् ॥ २०९ ॥
तस्य शय्याङ्कपर्यङ्कवक्त्रपादतलान्तरे ।
तस्यावलक्षित शौरि शङ्कासकोचिताकृति ॥ २१० ॥
प्रविश्य कालयवन शयान वीक्ष्य भूपतिम् ।
कृष्णोऽयमिति निश्चित्य निर्निद्रमकरोत्पदा ॥ २११ ॥
प्रबुद्ध कालयवन पादस्पृष्टवपुर्नृप ।
दृशा ददाह नि शेष निद्राशेषकषायया ॥ २१२ ॥
निर्दग्धे कालयवने पर्यङ्कचरणाञ्चले ।
कायसकलनालीन दृष्ट्वा कृष्णमभाषत ॥ २१३ ॥
कस्त्व परिमिताकार का ताकर्णोत्पलद्युति ।
बिभर्षि गुणगम्भीरमहो माहात्म्यमुन्नतम् ॥ २१४ ॥
इयत्तां ह्रस्वता याता सृष्टि कालनिमीलिता ।
मद्वल्फपरिमाण यद्वपु स्वल्पतर तव ॥ २१५ ॥
इत्युक्तो मुचकुन्देन प्रश्रयप्रणयी हरि ।
स्ववृत्त लोकवृत्त च सर्वं तस्मै न्यवेदयत् ॥ २१६ ॥

---

१ 'उत्तमम् क

काल विशाल विज्ञाय क्ष्मापाल क्षणवद्गतम् ।
दीर्घशय्यामिवोत्सृज्य भोगाशा समचि॰तयत् ॥ २१७ ॥
अहो कालगलत्सर्वभावभोगाभिमानभू ।
स्वप्नप्रकार ससार पर्यन्तासत्यविभ्रम ॥ २१८ ॥
भूमि सकुचिता ग्रीष्मातप॰यस्तार्द्रचर्मवत् ।
वैराग्य जनयत्येव जराजीर्णेव कामिनी ॥ २१९ ॥
तानि मिश्राण्यतीतानि ते भृत्यास्ते च बा॰धवा ।
परेषु रमते नात्मा यूथभ्रष्ट इव द्विप ॥ २२० ॥
यस्मिन्नित्यमधूपम[1] तदखिल कालेन लीढ सुख
यात हन्त पुरातन विरसता क्षुण्णेक्षुशल्कोपमम् ।
आमाम्रप्रतिमस्य नास्त्यभिनवस्यास्वादने स्वादता
नेदानीं मम कृत्यमस्ति महता राज्येन भोगेन वा ॥ २२१ ॥
मलिनाक्षमता[2](?) भूति सा भूति शोभतेऽधुना ।
मुक्तिकान्ताधवलता करोत्युद्धूलनेन या ॥ २२२ ॥
इति सचिन्त्य राजर्षि कैलास तपसे ययौ ।
गत्वा कृष्णश्च वृष्णिभ्य स्ववृत्ता॰त न्यवेदयत् ॥ २२३ ॥
बलेर्बाणासुर सूनुरासीद्बाहुसहस्रवान् ।
यस्यास्थानसभासभ्यो भगवानभवद्भव ॥ २२४ ॥
दीप्तरत्नगृहालोकै सृजन्सध्यामिवानिशम् ।
बभूवाकाशग यस्य नगर शोणिताभिधम् ॥ २२५ ॥
उषा नामाभवत्तस्य कन्या लावण्यवाहिनी ।
आललम्बे स्तनतटीं यस्या मज्जन्निव स्मर ॥ २२६ ॥
युद्ध विना मे मिथ्यैव भाराय॰भुजकाननम् ।
इति तेनार्थित शर्व प्राप्स्यसीति तमभ्यधात् ॥ २२७ ॥

---

१ 'मनूपम' ख-ग २ 'मलिन क्षमता' घ

हर कदाचिदुद्याने देव्या सह विहारिणम् ।
दृष्ट्वोषा स्वविवाहाय स्पृहा चक्रे घनस्तनी ॥ २२८ ॥
य करिष्यति ते स्वप्ने कन्याभावव्यतिक्रमम् ।
भविष्यति स ते भर्ता तामुवाचेति पार्वती ॥ २२९ ॥
अथाययौ यौवनकुड्मलीना कुसुमाकर ।
कुर्वाण सरसा प्रीतिलता जनमनोवने ॥ २३० ॥
चञ्चच्चूतरज पुञ्जपीताम्बरमनोहर ।
अतसीकुसुमश्याम शुशुभे नवमाधव ॥ २३१ ॥
नम्रानना नवोद्भूतरजसा स्तबकस्तनी ।
मालती यौवनवती कन्येवोच्छ्वासिनी बभौ ॥ २३२ ॥
ववुर्मलयनि श्वासा इव चन्दनचुम्बिन ।
पवना पन्नगीदशशङ्कयेव शनै शनै ॥ २३३ ॥
कूजत्कोकिलकण्ठरशविरुतै स्फायिन्यवासे पर
चूतामोदमदाकुलालिपटलीवीणास्वनस्वादुताम् ।
शिक्षाचक्षणदक्षदक्षिणमरुद्दत्तोपदेशक्रमै-
र्मञ्जर्यो ननृतुर्मधूत्सवलसत्पुष्पायुधाराधने ॥ २३४ ॥
हेमहर्म्यप्रसुप्ताथ नीता स्वप्ने मनोमुषा ।
उषा केनापि कान्तेन शीलाशुकदरिद्रताम् ॥ २३५ ॥
तस्या धीधृतिचौरेण विज्ञाय हृदय हृतम् ।
हेलाहरणभीत्येव हारस्तरलता ययौ ॥ २३६ ॥
लज्जामज्जनविह्वला ननननेत्यल्पप्रलापोद्भृति-
र्नीवीमुक्तिनिरोधनिर्धृतिविधौ पाणि क्वणत्कङ्कण ।
शीतेनेव विकूजिता जर्वजुष श्वासस्य शीत्कारिता
तस्या त्रशभयोच्चलत्कलकला काञ्ची सकम्पाभवत् ॥ २३७ ॥

---

१ 'घटस्तनी' ख २ 'दक्षिण ख ग ३ 'धीवृत्ति' क ४ 'शूत्कारिता' ग

प्रबुद्धा वृत्तकर्तव्या सा मुग्धा स्वप्नसत्यताम् ।
मन्यमाना मुहुर्मोह कुललज्जाकुला ययौ ॥ २३८ ॥
शयन विप्लवस्थान भयेनेव विहाय सा ।
हर्म्यस्था प्रददौ प्रातर्दिक्षु चक्षुर्विलज्जिता[1] ॥ २३९ ॥
सा सोत्कम्पकुचन्यस्तहस्तानभ्यस्तमन्मथा ।
मुमूर्च्छाच्छादयन्तीव प्रविष्ट हृदये प्रियम् ॥ २४० ॥
सा निशश्वास बाष्पाम्बुबिन्दुभिर्मौक्तिकैरिव ।
छिन्नस्य शीलहारस्य कुर्वाणा ग्रथन पुन ॥ २४१ ॥
प्रदध्यौ नवविध्वससाध्वसायासिता चिरम् ।
क्षितौ सा चिन्तयानेव च्युत चित्तमधोमुखी ॥ २४२ ॥
किं कस्य कथयाम्येतत्क पृच्छामि करोमि किम् ।
का गति केन दृष्टाह कुतस्तत्सगम पुन ॥ २४३ ॥
इति सदेहनि स्प दा चिन्ताविक्रीतचेतनाम् ।
विलोक्य चित्रलेखाख्या सखी प्राणसमावदत् ॥ २४४ ॥
तन्वि क खेदभारोऽय भीरु किं भयकारणम् ।
पुत्री त्रैलोक्यभर्तुस्त्व वध्य कस्तेऽपराध्यति ॥ २४५ ॥
किं शय्यावलनाविमर्दगलितै कर्णोत्पलस्य च्छदै-
र्लीनै कामकृपाणलेशसदृशैर्व्यासा तवेय तनु ।
अश्यन्मौक्तिकयोर्बिभर्षि कुचयोर्भिन्नेभकुम्भभ्रम
स्पष्टोऽय रतिसगमव्यतिकर कैस्येति[2] मे सशय ॥ २४६ ॥
इत्युक्ते सस्मित सख्या सनि श्वासाश्रुवर्षिणी ।
उषा शनैरवोचत्ता लिखन्ती क्ष्मामधोमुखी ॥ २४७ ॥
दृष्ट स्वप्ने मया कोऽपि रमणस्तनुकम्पन ।
पीयूषवर्षी सस्पर्शे स्मरणे मरणोपम ॥ २४८ ॥
जाने कम्पतरङ्गिताङ्गलतिका स्वप्नेऽहमालिङ्गिता
संस्पर्शे कुचयोर्निरर्गलतया हारोऽपि पार्श्वे कृत ।

---

१ 'न लज्जिता' क ख घ २ 'कन्येति' ख

एतावत्तु सखि स्मरामि यदतो वृत्त परं तत्पर
धैर्यस्योद्दलन शरीरशमन ध्यात्वापि नो वेद्मि किम् ॥ २४९ ॥
मूर्च्छोच्छादितमीक्षते न नयन तापे तनु पच्यते
कम्प सूचयतीव जीवगमन मोहे मनो मज्जति ।
प्राग्जन्मार्जितकर्मणा बलवता कामेन कालेन वा
नो जानामि स केन मे धृतिहर कण्ठे भुजगोऽर्पित ॥२५०॥
त्यज्यते सहजा लज्जा सह्यते गुरुवाच्यता ।
गण्यते न घना कीर्तिर्यत्कृते सोऽपि दुर्लभ ॥ २५१ ॥
इय शीलविलुप्तिर्मे मानम्लानिर्महीयसी ।
दुर्लभे वल्लभे प्रीतिस्तनुत्यागेन शाम्यति ॥ २५२ ॥
इति ब्रुवाणा तामश्रुकणाकीर्णकुचस्थलीम् ।
सतापपिशुनोच्छ्वासा[1] चित्रलेखावदत्सखीम् ॥ २५३ ॥
किं न स्मरसि मुग्धे त्वमहो विरहकातरा ।
देव्यादिष्ट स ते स्वप्नदृष्ट एव वरो वर ॥ २५४ ॥
समाश्वसिहि हे तन्वि तनुस्तापक्षमा न ते ।
करोमि योगशक्त्याहमुपाय त्वत्समीहिते ॥ २५५ ॥
उल्लिख्य निखिल चित्रपटे त्रिभुवन तव ।
सदृश दर्शयाम्येव तत्रालोकय वल्लभम् ॥ २५६ ॥
इत्युक्त्वा चित्रलेखाया गताया व्योमवर्त्मना ।
उषा जीवमिवापेदे प्रियसदर्शनाशया ॥ २५७ ॥
साभ्येत्य तस्यास्त्रैलोक्यचित्र पटमदर्शयत् ।
किं दुष्करमदृश्य वा योगिना ज्ञानचक्षुषाम् ॥ २५८ ॥
उषा चित्रपटे दृष्ट्वा सुरासुरनरोरगान् ।
ददर्श दयित स्वप्नदृष्ट जितशशिस्मरम् ॥ २५९ ॥
अय स सखि मे धैर्यहारी हृदयतस्कर ।
इत्युषावचन श्रुत्वा चित्रलेखा जगाद ताम् ॥ २६० ॥

---

१ अश्रा तविपुलोच्छ्वासां' ख

दिष्ट्या धन्यासि सुभगे यस्यास्ते नवमन्मथ ।
लक्ष्मीवल्लभपौत्रोऽयमनिरुद्धाभिध प्रिय ॥ २६१ ॥
प्रद्युम्नतनयस्यास्य लावण्यामृतदीधिते ।
कान्त्या क्षैब्यमिवायान्ति सुरविद्याधराङ्गना ॥ २६२ ॥
रूपेणाप्रतिमेन नेत्रसुखद कदर्पदर्पच्छिदा
शौर्ये वज्रधरोपमा न सहते धीर सुमेरोरयम् ।
अस्यामर्त्यमृगेक्षणाभिरनिश सोत्कण्ठमाकर्णित
चन्द्रोत्सङ्गमृगापह गुणगण गायन्ति खे खेचरा ॥ २६३ ॥
पश्चिमाब्धौ हरिपुरी द्वारका वृष्णियादवै ।
सिंहैरिव महोत्साहैर्गुप्ता हैमवती गुहा ॥ २६४ ॥
तस्यामन्त पुरे श्रीमान्वसत्येष प्रियासख ।
आनीयते कथ तावदिति दोलायते मन ॥ २६५ ॥
त्वद्भाग्यानि पुरस्कृत्य गच्छामि गगनेन ताम् ।
हेलार्पिताद्भुतनिधिर्विधि सिद्धिं विधास्यति ॥ २६६ ॥
इत्युक्त्वाकाशमाविश्य सा ययौ द्वारका क्षणात् ।
कुर्वाणा रशनारत्नै शक्रचापचिता दिश ॥ २६७ ॥
सा गूढमायया हृत्वा रत्नपर्यङ्कशायिनम् ।
आनिनाय मुहूर्तेन व्योम्ना प्रद्युम्ननन्दनम् ॥ २६८ ॥
स्वप्नवृत्तान्तमावेद्य स कन्यान्त पुरान्तरम् ।
प्रवेशितस्तयापश्यदुषा रतिमिव स्मर ॥ २६९ ॥
स ता दृष्ट्वा नवोन्मेषनिर्माणातिशय विधे ।
अचिन्तयत्सुधापूरैरिव पूरितलोचन ॥ २७० ॥
इन्दो सक्षयरक्षणाक्षतसुधा किं वेधसा निर्मिता
किं धैर्यापहरा हरस्य विहिता कामेन कान्ता तनु ।
किं तारुण्यवसन्तकान्तिललिता शृङ्गारसिक्ता लता
किं लावण्यतरङ्गिणी पुनरिय जन्मान्तराप्ता रति ॥ २७१ ॥

---

१ 'प्रधास्यति' क

कटाक्ष संधत्ते कुवलयकुलक्लैव्यकलना
मुखे दृश्यश्चन्द्रद्युतिहरणहेलापरिचय ।
असरुद्धा बाधाधरदलरुचिर्विद्रुमतरो-
रहो सारङ्गाक्ष्या प्रसभविजयी रूपविभव ॥ २७२ ॥
इति सर्वाङ्गनिर्मग्नलोचनस्ता विलोकयन् ।
अनिरुद्धोऽधरे तस्या बभूवाशापथातिथि ॥ २७३ ॥
सापि साङ्गमिवानङ्ग तमभ्यस्त मनोरथै ।
विलोक्य प्रत्ययासत्ये पुन स्वप्नमशङ्कत ॥ २७४ ॥
सोत्कम्पा कररोधेन राविणीं मणिमेखलाम् ।
मुहुर्मौनवतीं चक्रे पैशुन्यचकितेव सा ॥ २७५ ॥
नवे मौनवति प्रेम्णि तयो प्राह सखी पुर ।
दन्ताशुसूत्रै कुर्वाणा ग्रथन चित्तयोरिव ॥ २७६ ॥
यस्त्वया प्रेमकुसुमैर्देवश्चित्रपटेऽर्चित ।
अहो भक्त्या स ते तुष्ट सखि प्रत्यक्षता गत ॥ २७७ ॥
स्वप्नसपादितप्रीतिर्योऽर्थितस्तैर्मनोरथै ।
प्राक्पूजा कीदृशी तस्य ब्रूहि त्वमुपपद्यते ॥ २७८ ॥
मौनमालम्बसे पृष्टा दृष्टा क्षोणीं निरीक्षसे ।
लतेव कम्पसे कम्पात्कोऽय ते चित्तविभ्रम ॥ २७९ ॥
मानस्तत्क्षणशासनागतजने सुभ्रु क्व सभाव्यते
स्वप्नाभ्यस्तसमागमेऽपि नववर्त्मि लज्जया लीयसे ।
का तस्मिन्परता सदा वसति यश्चित्ते निबद्धो गुणै
प्रारब्धा सखि कस्य तावदियती प्रेम्णि त्वयापह्नुति ॥ २८० ॥
इति सख्या ब्रुवाणायामनिरुद्ध प्रगल्भताम् ।
निनाय दयिता प्रौढ प्रणयै प्रेमपेशलै ॥ २८१ ॥
तदा प्रीतेर्यदायत्त चिन्तित यन्मनोरथै ।
मन्मथेन यदादिष्ट स्वैरं तत्तदभूत्तयो ॥ २८२ ॥

---

१ 'धव' ख-ग

दिनेष्वथ प्रयातेषु प्रच्छन्नधृतवल्लभा ।
उषामूदभिमानाक्तव्यक्तसभोगलक्षणा ॥ २८३ ॥
व्याकीर्णा कबरी मुख वितिलक ताम्बूललिप्तेऽक्षिणी[2]
कण्ठे कङ्कणलक्ष्म हारविरतिर्दशोऽधरे निर्व्रण ।
प्रात प्रच्युतचन्दना स्तनतटी साय स्ववेषक्रिया
सभोगाभरणा तनुर्वरतनो शङ्कास्पदत्व ययौ ॥ २८४ ॥
किंचिन्मुकुलिते लोके कन्याया कामलक्षणे ।
फुल्ले शनै कर्णपथ बाणस्यापि कथा ययौ ॥ २८५ ॥
ततस्तद्भ्रूभ्रमादिष्टा किंकरा क्रूरकारिण ।
आययुर्युद्धसनद्धा कन्यकान्त पुराङ्गणम् ॥ २८६ ॥
निरुद्ध प्रियया यत्नादनिरुद्धोऽर्थं[3] सस्मित ।
घोरकिंकरसघाताञ्जघान परिघायुध ॥ २८७ ॥
हतेऽयुते किंकराणा स्वय बाण समाययौ ।
रथी बाहुसहस्रात्तसमस्तायुधमण्डल ॥ २८८ ॥
शस्त्रवृष्टिं तदुत्सृष्टा प्राद्युम्नि खेड्गचर्मभृत्[4] ।
छित्त्वा धैर्यनिधिश्चक्रे रणे बाणस्य विस्मयम् ॥ २८९ ॥
उषा सत्रासतरला पितु पत्युश्च संगरे ।
प्राणेशपक्षपातेन भेजे सदेहसाध्वसम् ॥ २९० ॥
बाणेन प्रहिता शक्तिं मृत्युदष्ट्रामिवोत्कटाम् ।
आदाय तस्मै प्राद्युम्निस्तामेव प्राहिणोद्बली ॥ २९१ ॥
परहस्तगता शक्ति प्रविष्टान्त कृतव्यथा ।
निजा सुतेव बाणस्य हृदये शल्यता ययौ ॥ २९२ ॥
वीर विज्ञाय त बाण स्पष्टयुद्धेन दुर्जयम् ।
आदाय तामसीं मायामदृष्ट प्रविवेश खम् ॥ २९३ ॥

---

१ 'मानात्तु' ख, मानार्थं घ २ अत्र सधिरनुचित ३ 'अपि' ख ४ 'चर्मखड्ग' ख

परिग्रहण सं० ////9
ग्रन्थालय, के ब लि शि सस्थान
सारनाथ, वाराणसी

निरन्तैरसदुत्सृष्टैर्वेष्टिताङ्ग भुजगमै ।
दृष्ट्वानिरुद्ध सरुद्धमुषाभू मोहमीलिता ॥ २९४ ॥
बद्धेऽनिरुद्धे तनया बाण स्वैरापचारिणीम् ।
आकृष्ट स्नेहकोपाभ्या न तत्याज न चाग्रहीत् ॥ २९५ ॥
असस्पृष्ट याच्ञावचनघनदैन्येन वदन
न कृच्छ्रेऽप्यारूढा गुणसणिततिर्विक्रयतुलाम् ।
असेवासताप वपुरननुभूतप्रभुभय
कुल कन्याहीन नहि नयति मान मलिनताम् ॥ २९६ ॥
अत्रान्तरे द्वारकायामनिरुद्धापहारज ।
वृष्णीनामभवत्क्षोभ शोकचिन्तानुबन्धवान् ॥ २९७ ॥
बाणस्य नगरे रुद्धमनिरुद्ध सहोषया ।
विज्ञाय नारदगिरा सस्मार गरुड हरि ॥ २९८ ॥
हलायुधेन सहित प्रद्युम्नेन च सूनुना ।
प्रययौ शोणितपुर तार्क्ष्यमारुह्य माधव ॥ २९९ ॥
खे योजनसहस्राणि विलङ्घ्य गरुडध्वज ।
दीप्त बाणपुर दूराद्ददर्शार्कशतोपमम् ॥ ३०० ॥
अग्निमाहवनीयाख्य तार्क्ष्य प्राकाररक्षिणम् ।
प्रीतोद्वान्तखगङ्गाम्बुनिर्झरेण न्यवारयत् ॥ ३०१ ॥
पुरद्वारमथोन्मथ्य प्रविष्ट शार्ङ्गिण बलात् ।
नि संख्या सख्यसनद्धा दितिजा पर्यवारयन् ॥ ३०२ ॥
चक्रिचक्रनिकृत्ताना शरीराणि सुरद्विषाम् ।
चक्रु पक्षक्षयक्षिप्तनिपतत्क्षितिभृद्भ्रमम् ॥ ३०३ ॥
अत्रान्तरे नागपाशप्रज्वरे सिंहविक्रम ।
बद्धोऽनिरुद्ध सस्मार दुर्गा स्तुतिपदार्चिताम् ॥ ३०४ ॥
निष्पिष्टमत्तमहिषासुरमस्तकाग्र-
प्रत्यग्रनिर्गतघनस्रुतिशोणितार्द्रम् ।

पादाम्बुज पुनरलक्तकभक्तिचित्र
वन्दे भवप्रभवतापहर भवान्या ॥ ३०५ ॥
शूलप्रहारसृतरक्तभरैकबिन्दु-
संजातघोररुरुलक्षगुरुप्रमाथे ।
पातालमूलगगनान्तविकासितास्य-
ग्रस्तोग्रदानवतनु प्रणमामि कालीम् ॥ ३०६ ॥
भीमोद्भवद्विभवशुम्भनिशुम्भकाय-
निष्पेषदु सहतराशनिघातघोराम् ।
कात्यायनीं[1] स्वकरकृत्तशिर शरीर-
वीरोपहार[2]परितोषवतीं नमामि ॥ ३०७ ॥
क्षुभ्यत्ससप्तार्णवघनरव पद्मगर्भाण्डखण्डा-
काण्डभ्रशप्रभ[3]सरभस सप्तपातालभेदी ।
धैर्योन्माथी जयति चकिताशेषलोकेश्वराणा
चण्डश्चण्ड्या प्रलयसमयोत्साहलीलाट्टहास[4] ॥ ३०८ ॥
इति स्तुता भगवती दुर्गा दुर्गापहारिणी ।
स्वकरस्फोटितोग्राहिपञ्जर तममोचयत् ॥ ३०९ ॥
भुजगपाशनिर्मुक्त प्राद्युम्नि समराङ्गणम् ।
प्रययौ युध्यमानस्य समीप कालियद्विष ॥ ३१० ॥
अथ कल्पान्तपर्जन्यगर्जितोर्जितविभ्रम ।
बाणासुररणारम्भदुन्दुभिध्वनिरुद्ययौ ॥ ३११ ॥
दैत्येन्द्रायुधवृष्टिनष्टगगने सेनारज स्फूर्जित-
ग्रस्ताग्रे(कें) प्रसरत्पिनाकिविशिखव्रातावकीर्णे रणे ।
कल्पान्तागमशङ्किते त्रिभुवने चेरु शरीरच्छिद
शूराणामनिरुद्धरामसुरजित्प्रद्युम्नमुक्ता शरा ॥ ३१२ ॥

---

१ 'खवर' ख, खशर' ग २ 'वीरोपहारनमिता प्रणमामि कालीम्' ख
३ 'प्रसर' ख ४ 'हेला' ख

गरुडादवरुह्याथ बलेन[1] बलिना रणे।
हलेन हलिना कृष्टा दैत्यदेहा द्विधा ययु ॥ ३१३ ॥
ततस्त्रिनेत्रानुचर प्रदीप्तस्त्रिशिखज्वर[2]।
क्षिप्तेन भस्मना राम भ्रममूर्च्छाकुल व्यधात् ॥ ३१४ ॥
सतापमूर्च्छित कृष्णस्त परिष्वज्य विद्रुतम्।
कृत्वा जटाभिराकृष्य जग्राह ज्वरमञ्जसा ॥ ३१५ ॥
कृष्णोऽप्यथ ज्वराविष्ट श्वसन्रोमाञ्चकर्कश[3]।
असृजद्वैष्णव घोर ज्वरं रौद्रं[4]ज्वरापहम् ॥ ३१६ ॥
ज्वरयो सप्रवृत्तेऽथ भुवनाकम्पने रणे।
वैष्णव प्रलयार्काभ शार्वं ज्वरमपातयत् ॥ ३१७ ॥
कण्ठे निपीड्य निष्पिष्टस्तेन रुद्रज्वर क्षितौ।
प्रयात शरण कृष्णमवदद्बाष्पगद्गद ॥ ३१८ ॥
देवेन त्रिपुरारिणा त्रिजगतीजीवापहारक्षम
सृष्ट स्पष्टविनष्टधैर्यसरणिर्देव त्वयाह कृत।
त्वा यात शरण शरीरधृतये त्वन्नाममन्त्राक्षर-
क्षिप्तास्मृतिजापिना न भविता मत्स्पर्शताप क्वचित् ॥३१९॥
इति भीत्या ब्रुवाण त ररक्ष गरुडध्वज।
शरणाप्ते विरुद्धेऽपि वैरक्रूरा न साधव ॥ ३२० ॥
तत श्रीकण्ठवैकुण्ठौ व्याप्तदेहौ बभूवतु।
पिनाकशार्ङ्गनिर्गच्छद्बाणजालैर्निरन्तरै ॥ ३२१ ॥
क्षण तुल्ये तयोर्युद्धे जगत्संक्षयकारिणि।
घनै शौरिशरासारैर्ययौ विमुखता हर ॥ ३२२ ॥
अस्तशक्ते कुमारस्य जितस्य हरिणा रणे।
रक्षायै शम्भुना सृष्टा तस्थौ नम्राङ्गना पुर ॥ ३२३ ॥
अथ बाण स्वय योद्धु मधुसूदनमाययौ।
क्षिपन्बाहुसहस्रेण दीप्तायुधपरम्पराम् ॥ ३२४ ॥

१ 'बलिना' ख ग २ 'त्रिशिरा ख ३ 'कबुक' क घ ४ 'रुद्र' ख.

सहस्राश्व रथ तस्य मनोरथमिवायतम् ।
ससूत शरवर्षेण प्रममाथ मुरान्तक ॥ ३२५ ॥
उपनीत गणैस्तूर्ण शासनात्त्रिपुरद्विष ।
मयूरमारुरोहाथ बाण षण्मुखवाहनम् ॥ ३२६ ॥
यत्नेन युध्यमानस्य च्छिन्नास्त्रस्य मुरारिणा ।
मुक्तकेशी विवस्त्रा स्त्री बाणस्याग्रे व्यदृश्यत ॥ ३२७ ॥
रक्षायै कोटवीं सृष्टा तस्य देवेन शूलिना ।
वञ्चयित्वाच्युतश्चक्र पार्श्वाञ्चितमथासृजत् ॥ ३२८ ॥
चक्र क्रमेण पतित स्कन्धयो कीर्णपावकम् ।
चकर्त क्रकचक्रूर बाणस्य भुजकाननम् ॥ ३२९ ॥
चक्रोत्कृत्तभुजद्रुमव्रणमुखोद्भूतैर्घनासृग्भरै
प्रोद्यद्विद्रुमपादपानुकृतिभिस्तुल्यप्रमाणै क्षणम् ।
अप्राप्तोद्धतयुद्धतृप्तिरधिकश्रद्ध स वीरोऽभव-
द्व्याप्त संततरक्तचन्दनचितैर्जातैरिवान्यैर्भुजै ॥ ३३० ॥
बाणश्छिन्नभुजोऽभ्येत्य शभोर्भगवतश्चिरम् ।
ननर्त प्रियनृत्तस्य तोषाय प्रणयी पुर ॥ ३३१ ॥
भक्त्याभवद्भगवत स भवस्यातिवल्लभ ।
वरान्नन्दिसम श्रीमा महाकालश्चतुर्भुज ॥ ३३२ ॥
कल्याण तनुते यश परिचिता लक्ष्मी ददात्यक्षया-
माक्रान्तिं विदधाति सप्तभुवनन्यस्तेप्सिताज्ञाक्षराम् ।
ससार कुरुते विकारिनिकर[1] नि शेषमेव क्षणा-
द्भक्ति कल्पलता चराचरागुरो किं किं न सूते फलम् ॥३३३॥
उषासहितमादाय प्रद्युम्नतनय तत ।
द्वारका विजितारातिर्जगाम गरुडध्वज ॥ ३३४ ॥
कदाचिदथ देवर्षिर्द्वारकामेत्य नारद ।
अवाप्य पूजामुचिता कथान्ते कृष्णमभ्यधात्[2] ॥ ३३५ ॥

---

१ 'निकरा' ख ग, 'निरत' घ २ 'अब्रवीत्' क घ

गङ्गाभिलाषी नृपतिर्ब्रह्मशापान्महाभिष ।
भरतस्य कुले जात शतनु प्रतिपात्मज ॥ ३३६ ॥
गङ्गापि धातु शापेन पतन्ती वसुभि पथि ।
वसिष्ठशापपतितैर्होमधेनुनिकारत ॥ ३३७ ॥
स्वजन्मनेऽर्थिता जाता वधाय च महीं गता ।
स्वतीरोपवनोपान्ते विचचार सुलोचना ॥ ३३८ ॥
तत्र शतनुना गङ्गा संगम गजगामिनी ।
भेजे यथेष्टकरणप्रत्याख्यानघृतावधिम् ॥ ३३९ ॥
सा जातानवधीत्सप्त वसून्स्वेच्छाविधायिनी ।
जातेऽष्टमे सुते राज्ञा निरुद्धा प्रययौ दिवम् ॥ ३४० ॥
देवव्रताख्य स शिशुर्दिवि देवै कृतव्रत ।
सर्वविद्यापगाम्भोधिर्ववृधे वसुरष्टम ॥ ३४१ ॥
दृष्ट्वा कदाचित्कालिन्दीकूले कुवलयेक्षणाम् ।
शतनुर्दाशतनया तत्पितुर्याचकोऽभवत् ॥ ३४२ ॥
गाङ्गेयस्त्वत्सुत क्ष्माभृद्दौहित्रो मे न राज्यभाक् ।
इत्युक्त्वा न ददौ दाशस्तस्मै सत्यवतीं सुताम् ॥ ३४३ ॥
देवव्रत पितुर्ज्ञात्वा तीव्रस्मरशरव्यथाम् ।
गत्वा ययाचे दाशेश तनया विनयोन्नत ॥ ३४४ ॥
दौहित्रवशराज्यार्थी स सुता न ददौ यदा ।
तदा राज्ये विवाहे च गाङ्गेय समय व्यधात् ॥ ३४५ ॥
भीषणीयप्रतिज्ञात्वाद्भीष्मोऽयमिति खे चिरम् ।
विचचारोदिताश्चर्यं खेचरोच्चारित वच ॥ ३४६ ॥
आनीतामथ भीष्मेण कन्यामासाद्य शतनु ।
परितोषाद्ददौ तस्मै स्वच्छन्दनिधनं वरम् ॥ ३४७ ॥
कालेन जनयित्वाथ पुत्र चित्राङ्गदाभिधम् ।
तस्या विचित्रवीर्यं च शतनुस्तनुमत्यजत् ॥ ३४८ ॥

ततश्चित्राङ्गदो राजा गन्धर्वेण प्रमाथिना ।
चित्राङ्गदेन समरे नामद्वेषान्निपातित ॥ ३४९ ॥
शिशोर्विचित्रवीर्यस्य प्राप्तराज्यश्रिय कृते ।
जहार काशिराजस्य भीष्म कन्या स्वयवरे ॥ ३५० ॥
भ्रात्रे विचित्रवीर्याय हस्तिनापुरमेत्य स ।
त्यक्त्वा साल्वोत्सुकामम्बामम्बिकाम्बालिके ददौ ॥ ३५१ ॥
राजचूततरौ तस्मिन्नवयौवनमाधवे ।
कान्तालतावलयिते पातिते कालदन्तिना ॥ ३५२ ॥
विच्छिन्ने शतनोर्वंशे तत्पुत्रक्षेत्रजार्थिना ।
भीष्मेण प्रेरिता साध्वी प्राह सत्यवती शनै ॥ ३५३ ॥
कानीनस्तनयो मेऽस्ति तत्तु कामात्पराशरात् ।
संजातो यमुनाद्वीपे कृष्णद्वैपायनो मुनि ॥ ३५४ ॥
त स्मरामि सुतक्षेत्रपुत्रोत्पत्त्यै तपोनिधिम् ।
उक्त्वेति सा भीष्ममते त सस्मार स चाययौ ॥ ३५५ ॥
अम्बाश्वश्वा विसृष्टाथ तेजोराशिं विलोक्य तम् ।
निमीलिताक्षी तद्दृष्टिस्पृष्टा गर्भं समाददे ॥ ३५६ ॥
अन्धोऽक्षिमीलनात्सूनुर्भावीत्युक्ते महर्षिणा ।
द्वितीय जनयापत्यमिति माता जगाद तम् ॥ ३५७ ॥
भयपाण्डुरवक्त्राया लेभे गर्भं मुनेर्दृशा ।
अप्रसूति सुत पाण्डुर्भवितेत्यभ्यधान्मुनि ॥ ३५८ ॥
तस्या भयाद्विसृष्टाया शूद्राया गर्भसंभवे ।
धर्मावतारमुक्त्वास्या पुत्र प्रायान्महामुनि ॥ ३५९ ॥
जातेऽन्धे धृतराष्ट्रेऽथ पाण्डौ च भुजशालिनि ।
माण्डव्यशापभूर्धर्म शूद्राया विदुरोऽभवत् ॥ ३६० ॥

---

१ 'कान्त' ख २ हस्तिना' ख ग ३ माता' क घ ४ 'उक्ता' ख-
५ 'जात्यन्धे' ख-ग

धृतराष्ट्राय गा[1]धारीं सुबलस्तनया ददौ ।
कुन्तिभोज[2]सुता कुन्तीं पाण्डुर्माद्रीमवाप च ॥ ३६१ ॥
युवा दिग्विजयी पाण्डुर्मृगयाव्यसनी वने ।
मृगरूपरतासक्तमवधीत्किं[3]न्दम मुनिम् ॥ ३६२ ॥
भविष्यसि त्व दयितारतिपर्यन्तजीवित ।
तेनेति शप्तस्त्यक्तश्रीर्ययौ पाण्डुस्तपोवनम् ॥ ३६३ ॥
तत पुत्रशत लेभे गान्धारी तुल्यगर्भजम् ।
ज्येष्ठो दुर्योधनस्तेषा तस्य दु शासनोऽनुज ॥ ३६४ ॥
कुन्ती मुनिवरावाप्तमन्त्रा भर्तुरनुज्ञया ।
धर्मानिलेन्द्रानाहूय वने पुत्रानजीजनत् ॥ ३६५ ॥
युधिष्ठिर भीमसेनमर्जुन च सुरोचितान् ।
सपत्न्या दत्तमन्त्रा च माद्री प्रापाश्विनौ यमौ ॥ ३६६ ॥
स्नाता पुष्पोच्चये माद्रीं विलोक्य कुसुमागमे ।
आलिङ्ग्यानङ्गसङ्गेऽभूत्पाण्डु शापादजीवित ॥ ३६७ ॥
प्रयाते त्रिदिव पाण्डौ पाण्डुपुत्रा पितृव्यजै ।
वृद्धिं गता धार्तराष्ट्रै सह दुर्योधनादिभि ॥ ३६८ ॥
भीष्म पितामह[4]स्तेषा चापाचार्यं कृप व्यधात् ।
द्रोण च सर्वशिष्यस्य शिष्य रामस्य धन्विन ॥ ३६९ ॥
अश्वत्थामा प्रिय सूनुर्द्रोणस्य तनयोऽभवत् ।
यथार्जुन समस्तास्त्रविद्याविमलदर्पण ॥ ३७० ॥
कन्याया गूढजन्मा य कर्ण कुन्त्या विवस्वत ।
प्रयात सूतपुत्रत्वमस्त्राणि प्राप भार्गवात् ॥ ३७१ ॥
संस्पर्धयार्जुनरणाह्वानधीरोऽस्त्रदर्शने ।
नीतस्तत्प्रतिमल्लत्वात्कौरवेणाङ्गराजताम् ॥ ३७२ ॥
तत कर्णेन समद्य भ्रात्रा दु शासनेन च ।
दुर्योधन पाण्डवाना धिय गूढवधे व्यधात् ॥ ३७३ ॥

---

१ 'सुभद्र' क ख ग २ राज' ख ग ३ किन्दिर क ख ग ४ 'तत्र' ख-ग

वय तत्रैव गच्छाम सर्वराजसमागमे।
प्राप्तु प्रतिग्रहाभ्यर्चामित्युक्त्वा प्रययुर्द्विजा ॥ ३८७ ॥
तत पाञ्चालनगर व्रजन्त पाण्डवा निशि।
गन्धर्वराज ददृशुर्गङ्गाम्भसि विहारिणम् ॥ ३८८ ॥
विवस्वान्त पुरवधूदर्शनक्रुद्धमर्जुन ।
व्यधाद्दग्धरथ युद्धे तमाग्नेयास्त्रतेजसा ॥ ३८९ ॥
युधिष्ठिरेण कृपया रणे रक्षितजीवित ।
सख्य करीटिना कृत्वा जितश्चित्ररथो ययौ ॥ ३९० ॥
तत प्रभाते प्रच्छन्ना पाण्डवा विप्ररूपिण ।
प्रविश्य पाञ्चालपुर कुम्भकारगृहे स्थिता ॥ ३९१ ॥
इत्युक्त्वा नारदे याते सकर्षणजनार्दनौ ।
जग्मतुर्लक्ष्यभेदाङ्क द्रष्टु कृष्णास्वयवरम् ॥ ३९२ ॥
तौ पाञ्चालपुर प्राप्य सर्वराजसमागमे ।
पूज्यमानौ विविशतु स्वयवरसभागृहम् ॥ ३९३ ॥
हेमासनोपविष्टेषु द्रौपदी सर्वराजसु ।
जगज्जयपताकेव कदर्पस्य समाययौ ॥ ३९४ ॥
राधावेधपणे तस्मिन्भुजलभ्ये स्वयवरे ।
अशक्ता पार्थिवा सर्वे ययुर्लज्जानिलीनताम्[1] ॥ ३९५ ॥
विलक्षेषु क्षितीशेषु द्विजमध्यादथोत्थित ।
विद्धा धनजयो लक्ष्य क्षितौ क्षिप्रमपातयत् ॥ ३९६ ॥
हार कण्ठे विनिक्षिप्य द्रौपद्या फाल्गुने वृते ।
युद्धोद्धता समुत्तस्थु क्रुद्धा सर्वे क्षितीश्वरा ॥ ३९७ ॥
जित्वाथ शल्यकर्णादीन्वीरान्भीमधनजयौ ।
पुर कृष्णा समादाय ययतुर्भ्रातृभि सह ॥ ३९८ ॥
भिक्षेवोपनता कृष्णा सहेय भुज्यतामिति ।
चक्रुस्ते शासनान्मातु सह भोगाय संविदम् ॥ ३९९ ॥

---

१ 'विलीचलाम्' क.ग.

रामकृष्णौ निशि स्वैर कुम्भकारगृहे स्थितान् ।
पाण्डवानेत्य सानन्दौ प्रेम्णा संभाष्य जग्मतु ॥ ४०० ॥
अन्विष्य द्रुपदस्तेषा विज्ञायाधर्मनिश्चयम् ।
कृष्णाया बहुपत्नीत्व विरुद्ध नाभ्यमन्यत ॥ ४०१ ॥
ततस्त भगवान्व्यासः समभ्येत्यावदन्मुनि ।
पञ्चेन्द्रा समदा पूर्वं क्रुद्धा बद्धा पिनाकिना ॥ ४०२ ॥
तं एव पाण्डवा जाता स्वर्गश्रीस्तव चात्मजा ।
तेषामेकैव सा पत्नी नैवाय धर्मसंकर ॥ ४०३ ॥
इत्युक्त्वा मुनिना दत्तदिव्यदृष्टिर्नरेश्वर ।
सत्य विज्ञाय तत्सर्वं तद्विवाहममन्यत ॥ ४०४ ॥
ज्ञात्वा जतुगृहान्मुक्तान्पाण्डवान्प्राप्तसश्रयान् ।
हस्तिनापुरमानाय्य धृतराष्ट्रोऽभ्यपूजयत् ॥ ४०५ ॥
इन्द्रप्रस्थेऽभिषिक्तोऽथ तेन राजा युधिष्ठिर ।
गुणै श्रिय श्रिया धर्मं धर्मेण प्राप्तवान्यश ॥ ४०६ ॥
निर्दिष्टा नारदेनाथ मुनिमा भेदभीरुणा ।
भूतये पाण्डवाश्चक्रुर्मर्यादा दृढनिश्चया ॥ ४०७ ॥
अन्त पुरे भ्रातर य. पश्येत्कृष्णासख रह ।
अविश्रान्त स तीर्थानि व्रजेद्वादशवत्सरीम् ॥ ४०८ ॥
चौरात्त गोगण विप्राक्रन्दाकृष्टस्ततोऽर्जुन ।
आजहार समादाय धर्मजान्त पुराद्धनु ॥ ४०९ ॥
स्मृत्वाथ सविद पार्थस्तीर्थार्थी जाह्नवीजले ।
मज्जन्नुलूपीं पाताले नागकन्यामवाप्तवान् ॥ ४१० ॥
जनयित्वा सुत तस्यामिरावन्त जगाम स ।
नगर मणिपूराख्य चित्रवाहनभूपते ॥ ४११ ॥
प्राप्य तस्य सुता कन्या पार्थ पृथुललोचनाम् ।
चित्राङ्गदा सुत तस्या बभ्रुवाहनमाप्तवान् ॥ ४१२ ॥

---

१ 'त एव पाण्डवा नाथ' क, 'उवाच पाण्डवा नाथ' घ २ 'लोचन' क ख ग

सर्वतीर्थाद्भुत प्राप्य प्रभास श्वेतवाहन ।
रैवताचलयात्राया प्राप वृष्णिसमागमम् ॥ ४१३ ॥
अर्जुनोऽथ धृतोत्कण्ठ शैलारोहसमुत्सवे ।
उत्साहोच्छलित चेत सानुगस्य हरेर्व्यधात् ॥ ४१४ ॥
तत्र कृष्णानुजा दृष्ट्वा सुभद्रा कामकौमुदीम् ।
कन्यामनुमते शौरेर्जहार श्वेतवाहन ॥ ४१५ ॥
युद्धोद्धता वृष्णिवीरान्परिसान्त्व्य[1] जनार्दन ।
नि संख्य द्रविण दातुमर्जुनाय ययौ स्वयम् ॥ ४१६ ॥
इन्द्रप्रस्थमथासाद्य सुभद्रासहितोऽर्जुन ।
प्रणम्य धर्मज भेजे कृष्णेन सहित सुखम् ॥ ४१७ ॥
अभिमन्यु सुभद्राया पार्थ पुत्रमजीजनत् ।
द्रौपदी प्रतिविन्ध्याद्यान्पतिभ्य पञ्च चात्मजान् ॥ ४१८ ॥
तत कदाचिद्यमुनाजलकेलिविहारिणम् ।
सकृष्णमर्जुन विप्ररूप प्राह हुताशन ॥ ४१९ ॥
उचित दीयता मह्य भवद्भ्या भोजन हितम् ।
अर्थिनामर्थनावन्ध्या न भवन्ति भवद्विधा ॥ ४२० ॥
श्वेतकेर्नृपते पूर्वं यज्ञे द्वादशवार्षिके ।
अच्छिन्नाज्यभरेणाहमनलो जडता गत ॥ ४२१ ॥
वन खास्थ्याय सत्त्वाढ्य दग्धुमिच्छामि खाण्डवम् ।
रक्षतीन्द्र सुहृन्मेघैस्तक्षकस्यास्पद हि[3] तत् ॥ ४२२ ॥
व्यस्तमेघौघविघ्नोऽह भवत्सायकसचयै ।
अखण्ड खाण्डववन ज्वलाम्येतन्ममाशनम् ॥ ४२३ ॥
इति वह्निर्वदन्नर्थी ताभ्यामङ्गीकृतेप्सित ।
धनु पार्थाय गाण्डीव ददौ चक्र च चक्रिणे ॥ ४२४ ॥
तद्दत्त रथमारुह्य तदीयाक्षयसायक ।
हरिणा सह सनद्ध किरीटी खाण्डव ययौ ॥ ४२५ ॥

---

१ 'दयान्द' क घ २ परिमल्य' क ३ 'महत्' ख

अग्नौ प्रज्वलिते वराहमहिषव्याघ्रद्विपद्वीपिना
निष्पीतायुषि गाढलीढगगने दैत्याहिदेहद्रुहि ।
रुद्धे मेघजलेऽर्जुनास्त्रपटलैर्युद्धोद्धत वज्रिण
वि(जि)ष्णु सायकवर्षिण विमुखता बाणैर्निनायाक्षयै ॥४२६॥
सुतमथ भयलोल तक्षकस्याश्वसेन
जठरमपि जनन्या सप्रविश्य द्रवन्तम् ।
अकृत दिवि किरीटी पत्रिणा खण्डपुच्छ
मयमपि शरणाप्त चैक्रिभीत ररक्ष ॥ ४२७ ॥
तत कृष्णाज्ञया दिव्या सभा मणिमयीं मय ।
विदधे धर्मपुत्रस्य प्राणरक्षाप्रतिक्रियाम् ॥ ४२८ ॥
तस्या सभायामाश्चर्यनलिनीं निर्ममे मय ।
नीलरत्नोत्पलवतीं हेमाब्जा स्फटिकोदकाम् ॥ ४२९ ॥
सभासीनमथाभ्येत्य धर्मज नारदोऽवदत् ।
राजन्न लोकपालाना त्वत्सभासदृशी सभा ॥ ४३० ॥
यजस्व राजसूयेन कुरुष्व सफला श्रियम् ।
इति त्वामवदत्पाण्डु पिता शक्रसमास्थित ॥ ४३१ ॥
इत्युक्त्वा नारदे याते राजसूयमनोरथम् ।
अकुण्ठोत्कण्ठया राजा वैकुण्ठाय न्यवेदयत् ॥ ४३२ ॥
कृष्णस्तमूचे श्लाघ्यैषा धर्मधी किं तु मागधे ।
न जीवति जरासधे क्रतु कर्तुं स शक्यते ॥ ४३३ ॥
रुद्रयागोपहाराय तेन रुद्धा गिरिव्रजे ।
षडशीतिर्नृपतयस्तस्य शेषाश्चतुर्दश ॥ ४३४ ॥
शरीरार्धद्वय जात जरा निशि निशाचरी ।
संधाय विदधे बाल जरासध तत्सुत्कटम् ॥ ४३५ ॥
तत्संनिरोधविध्वस्ता सत्यज्य मथुरा वयम् ।
विधाय द्वारका दुर्गां पश्चिमाब्धितटे स्थिता ॥ ४३६ ॥

---

१ 'चक्र' ख ग

इति स्वैर ब्रुवाणेन नृप संमन्त्र्य शौरिणा।
व्यादिशन्मागधवधे भीमपार्थौ भुजाविव ॥ ४३७ ॥
तत स्नातकवेषेण प्रच्छन्नक्षत्रवृत्तय।
जरासधपुरीं जग्मु कृष्णभीमधनजया ॥ ४३८ ॥
तत्र त्रयोदशाहानि युयुधाते भुजायुधौ।
वीरौ भीमजरासंधौ श्रान्तोऽभून्मगधस्तत ॥ ४३९ ॥
तत सधिं द्विधा कृत्वा हते भीमेन मागधे।
मुमोच कृष्ण क्षितिपान्यज्ञागमनसविदा ॥ ४४० ॥
भीम किरीटी नकुल सहदेवश्च दिग्जये।
आजह्रुर्विपुल वित्त राज्ञे यज्ञभरक्षमम् ॥ ४४१ ॥
कृतेषु शैलतुल्येषु रत्नकाञ्चनराशिषु।
राजसूयसमारम्भ प्रावर्तत महीपते ॥ ४४२ ॥
प्राप्ता निमन्त्रितास्तस्मिन्भीष्मद्रोणादय क्रतौ।
धृतराष्ट्र सविदुर सामात्यश्च सुयोधन ॥ ४४३ ॥
अशेषदेवर्षिभृते[2] सर्वराजमये मखे।
अर्घ्यार्चित हरिं सेहे शिशुपालो न भूपति ॥ ४४४ ॥
तस्याधिक्षेपदक्षस्य क्ष्मापते क्षयलक्ष्मणा।
न्यपातयत्क्षितौ क्षिप्र चक्रेणाधोक्षज शिर ॥ ४४५ ॥
क्रतौ समाप्ते यातेषु महर्षिषु नृपेषु च।
तस्थौ दुर्योधनस्तत्र शकुनिश्चास्य मातुल ॥ ४४६ ॥
पद्मिन्या विहरन्वारिशङ्कया स्फाटिके जले।
चरन्नुत्क्षिप्तवसन सत्याम्भसि ममज्ज स ॥ ४४७ ॥
तस्य स्खलितमालोक्य हर्म्यस्था राजवल्लभा।
जहसुर्भीमसेनश्च बभूवाङ्गुरितस्मित ॥ ४४८ ॥
लज्जावमानमलिनः कौरव स्वपुर व्रजन्।
पृष्ट शकुनिना प्राह ग्लानिवैवर्ण्यकारणम् ॥ ४४९ ॥

---

१ 'शान्तो' ख ग २ 'धृते' ख ग

धर्मसूनोर्मखे सा श्रीस्ते भूपाला करप्रदा ।
सख्यातीत च तद्दान मर्मशल्यायते मम ॥ ४५० ॥
पद्मिन्यामुपहासो मे पद्मस्येव हिमाशनि ।
पतित क्षीयते जाने न शरीरक्षय विना ॥ ४५१ ॥
इति प्रलापी शोकोष्ण[1] द्वेषावेशात्सुयोधन ।
वार्यमाण शकुनिना न्यवर्तत न दुर्मति ॥ ४५२ ॥
परोत्कर्षद्वेष खरखदिरचूर्णानलनिभ-
श्युतश्चित्ते दाह दिशति निशितक्लेशमसताम् ।
परोत्साहे चन्द्रप्रचयसचिव किं च महता
मनन्त सतोषश्चरति हृदये चन्दनरस ॥ ४५३ ॥
तत स धृतराष्ट्राय विवर्ण पाण्डुर कृश ।
निवेदित शकुनिना त द्यूताज्ञामयाचत ॥ ४५४ ॥
कृच्छ्रात्कृताभ्युपगम स पित्रा द्यूतकैतवे[2] ।
अकारयन्मणिमयै कुशलै शिल्पिभि सभाम् ॥ ४५५ ॥
स धर्मज राजसूयसमयादे[3]निवर्तिनम् ।
आहूय विदधे छद्मद्यूत शकुनिमायया ॥ ४५६ ॥
कूटाक्षक्षपिताशेषकोषसैन्यपरिच्छद ।
पण भ्रातृनथात्मान कृष्णां च विदधे नृप ॥ ४५७ ॥
दु शासनकराकृष्टकेशीमथ रजस्वलाम् ।
कृष्णा द्यूतजिता दासीमानिनाय सुयोधन ॥ ४५८ ॥
तत्कोपादकरोद्भीम प्रतिज्ञामूरुभञ्जने ।
युधि दुर्योधनस्यासृक्पाने दु शासनस्य च ॥ ४५९ ॥
वने द्वादशवर्षाणि निवासाय पणे कृते ।
त्रयोदशे तथाऽज्ञाते विजिता पाण्डवा ययु ॥ ४६० ॥
हारार्हे तनुचीनपट्टपवनत्वङ्नैरङ्गोद्भवे[3]
धृत्वाङ्गे हरिचदनेन्दुमृगजाभ्यङ्गे कुरङ्गत्वचम् ।

---

१. 'कूट' क ख २ 'अतिवतनम्' ग घ ३ तुरङ्गोद्भवे' ख ग

कृत्वा रत्नकिरीटघाँ[1]न्नि च जटा जग्मुर्वन पाण्डवा
नि सत्या भ्रमयन्ति पण्यवनिताप्रेमोपमा सपद ॥ ४६१ ॥
स्खलद्विद्युल्लेखाङ्कुरसुखमयूखोपमसुखा
श्रियश्चापाकर्षोच्चलितहरिणीवेगगमना ।
विवाहोत्साहाप्ता क्षणमिव सुहृद्बान्धवजना
न संसारे स्वप्नभ्रमपरिचये किंचिदचलम् ॥ ४६२ ॥
तत स्तुतिप्रसन्नार्कनिर्दिष्टाक्षयभोजनै[2] ।
द्विजपूजाजुषस्तस्थु कैाम्यके[3] पाण्डवा वने ॥ ४६३ ॥
धृतराष्ट्र परित्यज्य भ्रातृजच्छद्मखेदवान् ।
विदुर काम्यक यात प्रार्थित पुनरायय[4]ौ ॥ ४६४ ॥
सोऽवदद्भ्रातर राजन्पुत्रस्नेहवता त्वया ।
कुललक्ष्मीलतामूले कुठार कठिनोऽर्पित ॥ ४६५ ॥
यत्प्राह भगवान्व्यास पथ्य तन्न कृत हितम् ।
श्वभ्रसुप्ता प्रबुध्यन्ते न निपातव्यथा विना ॥ ४६६ ॥
बन्धुसख्यर्थनाभङ्गकोपशाप क्षयक्षम ।
मैत्रेयमुनिना दत्त कष्ट न गणितस्त्वया ॥ ४६७ ॥
भीमाद्भीम भय शङ्के येन रावणसंनिभ ।
स क्रूरकर्मा किर्मीर कानने राक्षसो हत ॥ ४६८ ॥
विदुरेणेत्यभिहित नामन्यत महीपति ।
दैवादिष्टनिपाताना मिथ्यैवालम्बनक्रिया ॥ ४६९ ॥
वने पाण्डुसुता दृष्ट्वा क्रुद्ध कौरवदुर्नयात् ।
अभिमन्यु सुभद्रा च समादाय हरि[5]र्ययौ ॥ ४७० ॥
भीष्मद्रोणास्त्रमाहात्म्यचिन्ताकुलनृपाज्ञया ।
अथास्त्रार्थी ययौ पार्थस्तपसे तुहिनाचलम् ॥ ४७१ ॥

---

१ धामनि जटा' ख २ भोजना' ख ३ 'पाण्डवा काम्यके' ख ४ 'ययौ हरि' ख

तीव्र तपस्यतस्तस्य सत्त्वसारपरीक्षक ।
देव किरातरूपेण त्रिपुरारि समाययौ ॥ ४७२ ॥
एकसूकरनिर्भेदस्पर्धाबन्धविरुद्धयो ।
युद्धमभ्युद्धत कूटकिरातार्जुनयोरभूत् ॥ ४७३ ॥
स्मरारिशबरेणाथ अस्तशस्त्र प्रमाथिना ।
युयुधे बाहुयुद्धेन धैर्यराशिर्धनजय ॥ ४७४ ॥
निपीड्य चण्डीपतिना निश्चेष्ट पातित क्षितौ ।
गाण्डीवधन्वा प्रत्यक्ष निरीक्ष्य त्र्यक्षमब्रवीत् ॥ ४७५ ॥
दर्पोद्धतत्रिपुरकाननपावकाय
भक्तार्तितापतुहिनद्युतिमण्डलाय ।
संसारघोरतिमिरोत्कटभास्कराय
तुभ्य त्रिधामशबलाय नम शिवाय ॥ ४७६ ॥
इति स्तुतिकृतानन्दसुधासपूर्णमानसात् ।
अस्त्र पाशुपत तुष्टात्किरीटी प्राप धूर्जटे ॥ ४७७ ॥
संप्राप्तलोकपालास्त्र सहस्रतुरग रथम् ।
शक्रप्रेषितमारुह्य विजयस्त्रिदिव ययौ ॥ ४७८ ॥
प्रणम्य तत्र वृत्रारिं तद्गाढालिङ्गनातिथि ।
तदासनार्ध तत्प्रीतिनिर्दिष्ट प्राप पाण्डव ॥ ४७९ ॥
पार्थमिन्द्रासनार्धस्थ दृष्ट्वा शक्रगिरा मुनि ।
तद्वृत्तान्त ययौ वक्तु लोमश पाण्डवान्वनम् ॥ ४८० ॥
प्राप्तपूजासनस्तेभ्य स निवेद्यार्जुनोदयम् ।
तीर्थयात्राधृतोत्साह विदधे धर्मनन्दनम् ॥ ४८१ ॥
नैमिषाद्येष्वथ स्नाता, सर्वतीर्थेषु पाण्डवा ।
गन्धमादनशैलाङ्क बदर्याश्रममाययु ॥ ४८२ ॥
पवनप्रेरित तत्र दिव्यपद्म पुरश्च्युतम् ।
आदाय द्रौपदी भीम कटाक्षेण निरैक्षत ॥ ४८३ ॥

---

१ 'अत्यद्भुत' ख-ग २ 'मानस' क घ

अन्यपद्मार्थिता तस्य धीमान्विज्ञाय मारुति ।
ययौ सौरभमार्गेण धनदाध्युषिता दिशम् ॥ ४८४ ॥
स व्रजन्काञ्चनलतानिचयाचितवर्त्मना ।
दिदेश मददारिभ्र सिंहनादेन दन्तिनाम् ॥ ४८५ ॥
पादन्यासाद्भुतगिरेस्तस्य शब्देन विस्मित ।
हनुमा मार्गमाश्रित्य तस्थौ स्वल्पवपु पुर ॥ ४८६ ॥
सोऽल्परूप कपिं दृष्ट्वा जानुसधिकृताननम् ।
चकारोत्सारणरव घन घट्टितदिक्तट ॥ ४८७ ॥
शनैरुन्मील्य नयने त जगाद प्लवगम ।
किमय मदसरम्भस्तव मिथ्यैव निर्जने ॥ ४८८ ॥
नादेन मा खेदयता विश्रान्त रोगदुर्बलम् ।
दर्शित कृशशूरेण भवता बत पौरुषम् ॥ ४८९ ॥
इत पर न गन्तव्य देशोऽय सिद्धसेवित ।
सर्वथा यदि गतासि पुच्छमुत्सार्य गम्यताम् ॥ ४९० ॥
इत्युक्ते कपिना भीमस्तत्पुच्छोत्सारणाक्षम ।
श्रान्त पतन्मुखेनाधस्तमभाषत विस्मित ॥ ४९१ ॥
को भवान्किमनन्तात्मा किं मेरु किं हिमाचल ।
मार्ग देहि न लङ्घ्यो हि देही देहितनुस्थित ॥ ४९२ ॥
यदि न स्यात्तवान्त स्थ परमात्मा सनातन ।
साचल लङ्घयेय त्वां हनुमानिव सागरम् ॥ ४९३ ॥
श्रुत्वैतत्कपिना पृष्ट क एष हनुमानिति ।
भीमोऽसौ हनुमद्भ्रातृत्व च व्यवेदयत् ॥ ४९४ ॥
अह स हनुमान्भीम तेनेत्युक्ते तदर्थित ।
कपि सूर्यपथावाप्त द्वीप्त वपुरदर्शयत् ॥ ४९५ ॥
सनिधान करिष्यामि धनजयरथध्वजे ।
इत्युक्त्वालिङ्गितस्तेन भीम मायात्स विस्मय ॥ ४९६ ॥

---

१ 'आतृत्य' ख ग २ 'जनार्दन' ख ग. ३ 'भ्रातृव्य' क घ

कुबेरनलिनीं प्राप्य भीम कनकपङ्कजम्।
जहार हेमपद्मानि हत्वा गुह्यकिंकरान्॥ ४९७॥
सानुग स्वयमायात जित्वा वैश्रवण रणे।
मणिमन्त च तन्मित्र हत्वा नक्तचरेश्वरम्॥ ४९८॥
द्रौपद्यै कनकाब्जानि दत्त्वा पवननन्दन।
मायाप्रच्छन्नमवधीद्यातुधान जटासुरम्॥ ४९९॥
अथ शक्ररथारूढ पार्थ पूर्णमनोरथ।
आयात पञ्चभिर्वर्षैं प्रणनाम युधिष्ठिरम्॥ ५००॥
हताल्यवेदयत्सोऽस्मै हिरण्यपुरवासिन।
निवातकवचान्दैत्यान्स्वशौर्याख्यानलज्जित॥ ५०१॥
वने महानजगर कदाचिदचलोपम।
बद्ध्वा भुजयुगे भीम चक्रे निश्चेष्टविग्रहम्॥ ५०२॥
सरुद्धभुजनि स्पन्दभ्रातृदर्शनदु खितम्।
उवाचाजगर प्रश्न दारयेति युधिष्ठिरम्॥ ५०३॥
को विप्र किं च वेद्य स्याद्ब्रूहि भीमस्य मुक्तये।
भुजगेनेत्यभिहिते त जगाद युधिष्ठिर॥ ५०४॥
क्षमा सत्य शान्तिस्तरुणकरुण यस्य च मन
स शूद्रो विप्रत्व प्रगुणगुणसङ्गेन भजते।
द्विर्जोऽपि[1] व्यर्थात्मा गुणविरहित शूद्रसदृश
कृतै कण्ठे विप्रस्त्रिगुणगुणसूत्रैर्न भवति॥ ५०५॥
सुखेन दु खेन च वर्जित यत्तदेव वेद्य विदितात्मधाम।
शीतोष्णहीनप्रतिमैव यत्र सतोषविश्राममयी प्रशान्ति॥५०६॥
धर्मजेनेत्यभिहिते मुक्त्वा भीम भुजगम।
अगस्त्यादिष्टशापान्तो नहुषस्त्रिदिव ययौ॥ ५०७॥
अथ पाण्डुसुतान्द्रष्टु सहित सत्यभामया।
मार्कण्डेयादिभि सार्धं मुनिभि शौरिराययौ॥ ५०८॥

---

१ द्विजोऽपि व्यक्तात्मा' ख-ग, द्विजोऽप्यव्यक्तात्मा घ २. 'त्यक्त्वा' क ग.

नानाकथामृताख्यानै स्थिते तत्राच्युते चिरम् ।
सत्यभामावदत्कृष्णामेकान्ते कृष्णवल्लभा ॥ ५०९ ॥
वश्यास्ते पतय कृष्णे केनाराधनकर्मणा ।
कैर्द्रव्यमन्त्रसूत्राज्ञातिलकाञ्जनलेपनै ॥ ५१० ॥
ममोपदिश जानासि यत्किंचित्प्रीतिकारणम् ।
इत्युक्ते कृष्णकामिन्या श्रुत्वा कृष्णा जगाद ताम् ॥ ५११ ॥
अयुक्तमुक्त सुभगे भवत्या धर्मवर्जितम् ।
वश्यदोषक्रिया स्त्रीणा भर्तृद्रोहार्हपातकम् ॥ ५१२ ॥
वश्यप्रयोगैर्योषिद्भि कुष्ठापस्मारिरोगिण ।
मन्मभाग्याश्च पतयो मूकान्धबधिरा कृता ॥ ५१३ ॥
भक्तिश्चित्तग्रह शील सतीना भर्तृभेषजम् ।
इत्युक्ते लज्जया भेजे सत्यभामा निलीनताम् ॥ ५१४ ॥
यातेऽथ द्वारका कृष्णे घोषयात्रापदेशवान् ।
पाण्डवानाययौ द्रष्टु श्रीभ्रष्टान्धृतराष्ट्रज ॥ ५१५ ॥
वने विहारिणस्तस्य तुल्यावरणकारणे ।
रणे बभूव संमर्दो गन्धर्वै सैन्यदारण ॥ ५१६ ॥
भग्नेषु कर्णमुख्येषु सानुज कौरवेश्वरम् ।
बबन्ध गन्धर्वपतिश्चित्रसेन शरार्दितम् ॥ ५१७ ॥
बद्ध सुयोधन बन्धुधिया राजा युधिष्ठिर ।
भीमपार्थौ विसृज्याजौ म्लानमानममोचयत् ॥ ५१८ ॥
अपि विस्मृतवैरेषु प्राणदानोपकारिषु ।
द्वेषदोष न तत्याज पाण्डवेषु सुयोधन ॥ ५१९ ॥
दृष्ट्वा चन्द्रं सकलजनतालोचनानन्दहेतु[1]
सद्यो वक्त्रद्युतिरलसतामेति पद्माकरस्य ।
नान्त स्फीता[2] चलति रिपुता किं च सकोचभाज[3]
प्रायेणैते स्वजनविमुखा श्रीमदान्धा भवन्ति ॥ ५२० ॥

१ 'बन्धु' क-ग २ 'स्फीता' क-घ- ३ चरति' क-ग

तेन तीव्रावमानेन[1] राज्यत्यागनिबद्धधी ।
स समाश्वासितोऽभ्येत्य दैत्यै पातालवासिभि ॥ ५२१ ॥
अत्रान्तरे पाण्डवेषु यातेषु मृगयारसात् ।
आययौ वैनयात्राया[2] सिन्धुराजो जयद्रथ ॥ ५२२ ॥
स कृष्णामाश्रमे दृष्ट्वा सीतामिव दशानन ।
जहार हारितमति करुणाक्रन्दिनीं बलात् ॥ ५२३ ॥
तत प्रत्यागता दृष्ट्वा पाण्डवा शून्यमाश्रमम् ।
ध्वजिनीं च रजोग्रस्तगगना समुपाद्रवन् ॥ ५२४ ॥
शराशनिविनिष्पिष्टसैन्यानालोक्य पाण्डवान् ।
रथाज्जयद्रथ कृष्णा तत्याज ज्वलितामिव ॥ ५२५ ॥
अभिसृत्याथ भीमेन गृहीत वधकम्पितम् ।
ररक्ष सिन्धुनृपतिं शरणाप्त युधिष्ठिर ॥ ५२६ ॥
पादेनालोडित अ(स्र)स्तमुकुट तस्य मारुति ।
क्षुरप्रेण प्रलपतश्चक्रे पञ्चसट शिर ॥ ५२७ ॥
रुद्रमाराध्य तपसा सैन्धव फाल्गुन[3] विना ।
वरमेकदिन प्राप पाण्डवावरण रणे ॥ ५२८ ॥
अत्रान्तरेऽर्जुनस्नेहात्कर्णमेत्य शतक्रतु ।
ययाचे कवच दिव्य कुण्डले च शशिप्रभे ॥ ५२९ ॥
पित्रापि वारितोऽर्केण तस्मै वर्म सकुण्डलम् ।
एकवीरवधायास्मै[4] शक्तिं वैकर्तनो ददौ ॥ ५३० ॥

शूरा भवन्ति विदुषामपि नास्ति संख्या
पूर्णं वन व्रतरतैर्विरलस्तु दाता ।
म्लानिं प्रयाति सितसत्त्वमयस्य यस्य
देहप्रधानसमयेऽपि न चित्तवृत्ति ॥ ५३१ ॥

अरणी हरिणेनाथ ब्राह्मणस्य हृता वने ।
जवेन जग्मुराहर्तुं धन्विन पाण्डुनन्दना ॥ ५३२ ॥

---

१ अपमानामितो' क घ २ 'वर' ख ग ३ 'फाल्गुण' ख ग ४ 'वधायास्त'क घ

निर्जलारण्यतापार्तैरन्वेष्टुमथ तै पथ ।
माद्रीसुत प्रेषितोऽग्रे ददर्श विपुल सर ५३३ ॥
प्रश्नमुक्तिकृता पेयमन्यथा नेति खाद्वच ।
श्रुत्वापि पाण्डव पीत्वा तोय तत्याज जीवितम् ॥ ५३४ ॥
क्रमान्माद्रीसुते पार्थे भीमे च प्रच्युते तटे ।
युधिष्ठिर प्रश्नगिर बभञ्ज गगनेरिताम् ॥ ५३५ ॥
निर्जीव क सजीवोऽपि योऽश्नात्येकोऽर्थिवर्जित ।
खक्ष्माधिकौ कौ पितरौ किं लोलर्मनिलान्मन ॥ ५३६ ॥
किमनन्त नृणा चिन्ता धन किमधिकं श्रुतम् ।
लाभात्किमुत्तम स्वास्थ्य किं सुख चित्तनिर्वृति ॥ ५३७ ॥
सधि स्थिर कै सुजनै किं शोककृदहकृति ।
किमैश्वर्यमलुब्धत्व किं नि शल्यमकोपता ॥ ५३८ ॥
किं विष याचन श्राद्धकाल क श्रोत्रियागम ।
उच्यते पुरुष कश्च भुवनव्यापि यद्यश ॥ ५३९ ॥
इति प्रश्नोत्तरैस्तुष्ट पिता धर्म क्षमापते ।
जीवयित्वानुजान्गुप्तिमज्ञातसमयेऽप्यदात् ॥ ५४० ॥
अथ वनसमयान्ते गूढवासप्रवृत्ता
प्रययुरजिनखिन्ना पाण्डवा मत्स्यदेशम् ।
प्रगुणगुणगणानामापदो दैवदिष्टा
सुरपतिसदृशानामप्यहो दुर्निवारा ॥ ५४१ ॥
अथाभून्मत्स्यराजस्य राजराजशिरोमणे ।
विराटस्य सभास्तार कङ्कनामा युधिष्ठिर ॥ ५४२ ॥
सूदस्तस्याभवद्भीम क्ष्मापतेर्वल्लभाभिध ।
गायत्यलिकुलै कीर्त्ति लोला यस्यालकाङ्गिनी ॥ ५४३ ॥
श्रीकण्ठशबराकुण्ठकण्ठक्रमणकर्मठ ।
शैण्ठाकृतिरभूज्जिष्णुर्नृत्तवृत्तिर्बृहन्नड ॥ ५४४ ॥

---

१ 'सलिलात्', ख ग २ षण्ढाकृति ख ग

मत्स्यपल्या सुदोष्णाया[1] कृष्णा सैरिन्ध्रिकाभवत् ।
अभूतामश्विपुत्रौ च यमौ गोतुरगाधिपौ ॥ ५४५ ॥
इति ते तुरगाधीशसेव्या सेवकता ययु ।
विश्वास श्रीविलासेषु कस्यायस्य भविष्यति ॥ ५४६ ॥
अथायात हूतानेकमल्ल भूमिपते पुर
मल्ल जीमूतनामान मारुति क्रीडयावधीत्[2] ॥ ५४७ ॥
सुदोष्णाया प्रियो भ्राता कदाचिदथ कीचक ।
विलोक्यात पुरे कृष्णामभवत्काममोहित ॥ ५४८ ॥
व्याजेन प्रेषिता स्वस्रा भयसभ्रमविद्रुताम् ।
कीचकस्तामभिद्रुत्य चकर्ष चरणाहताम् ॥ ५४९ ॥
सा सभामेत्य भूभर्तुरग्रे प्राह पराभवम् ।
राजापि कीचकस्नेहाच्चक्रे गजनिमीलितम्[3] ॥ ५५० ॥
आर्ताक्रन्दश्रवणबधिरा सेवकालोकनान्धा
प्रत्यालापप्रणयिनि जने निश्चलोत्सेकमूका ।
भूपा प्राय पिशुनवचनाकर्णने हस्तिकर्णा
नीचप्रीतिप्रसृतनयनाश्चञ्चलानेकवाच ॥ ५५१ ॥
भीम महानसे सुप्त सा प्रबोध्य तमभ्यधात् ।
बाष्पै करतलस्पृष्टे क्षालयन्तीव वाससी ॥ ५५२ ॥
क्रुद्धेन तेन निर्दिष्टा सा समादाय सविदम् ।
कीचकस्याकरोत्प्रात सकेत नाट्यवेश्मनि ॥ ५५३ ॥
रात्रौ पूर्वप्रविष्टोऽथ भीम कीचकमागतम् ।
केसरीव द्विप मत्तमवधीन्मूढकामुकम् ॥ ५५४ ॥
पतयो मम गन्धर्वा कृष्णयेत्युदित पुरा ।
तैरेव निहत मेने प्रभाते कीचक जन ॥ ५५५ ॥

---

१ भारते सुदेष्णेति नामास्ति २ अस्मदीय घ पुस्तक 'क्री इति पर्यन्त वर्तते
३ 'निमीलनम्' ख ग

तस्य भ्रातृशत देहसंस्काराय समुद्यतम् ।
कृष्णा चितानले क्षेप्तुमनयद्दु खदायिनीम् ॥ ५५६ ॥
भीमस्तत्करुणाक्र दमाकर्ण्य क्रूरकोपवान् ।
शत वृक्षप्रहारेण कीचकानामपातयत् ॥ ५५७ ॥
प्रेरित कौरवेन्द्रोऽथ त्रैगर्तेन सुशर्मणा ।
हर्तुं कीचकहीनस्य विराटस्याययौ धनम् ॥ ५५८ ॥
सरुद्धे नगरे मत्स्य पूर्वमेव सुशर्मणा ।
कङ्कवल्लभगोवाजिपत्तिभि सह निर्ययौ ॥ ५५९ ॥
तत प्रवृत्ते समरे मिथ सुभटसक्षये ।
जवाद्विराटमहरत्सुशर्मा शरवर्षिणम् ॥ ५६० ॥
भीमोऽभिसृत्य निष्पिष्टरथस्यास्य सुशर्मण ।
पादेन मौलिमु मथ्य मत्स्यराजममोचयत् ॥ ५६१ ॥
त्रिगर्तकटके भग्ने सामात्य कौरवेश्वर ।
विराटगोधन सर्वं जहारान्येन वर्त्मना ॥ ५६२ ॥
शूरशून्येऽथ नगरे विराटसुतमुत्तरम् ।
अभ्येत्य जगदुर्गोपा कौरवैर्गोधन हृतम् ॥ ५६३ ॥
सोऽब्रवीच्चौरचरित कौरव ह म्यह रणे ।
गुप्त भीष्मकृपद्रोणकर्णमुख्यैर्महारथै ॥ ५६४ ॥
किं तु मे सारथिर्नास्ति रणभारभरक्षम ।
इत्युक्ते राजपुत्रेण द्रौपदी तममाषत ॥ ५६५ ॥
उत्तराया स्वसुर्यस्ते नृत्ताचार्यो बृहन्नड ।
स सारथिरभूत्पूर्वं खाण्डवे सव्यसाचिन ॥ ५६६ ॥
अथोत्तरार्थित पार्थ प्रतिपन्नरथग्रह ।
चकार कवचाबन्धवैपरीत्यैर्जनस्मितम् ॥ ५६७ ॥
अथोत्तरे रथारूढे जवेनाश्वानचोदयत् ।
क्रीडायै कुरु वस्त्राणि जिष्णुरुत्तरयार्थित ॥ ५६८ ॥

दृष्ट्वोत्तर कौरवेन्द्रसैन्य शस्त्रजलार्णवम् ।
निवर्तस्वेति भीभमस्त्राणार्थी पार्थमभ्यधात् ॥ ५६९ ॥
तमर्जुनोऽवदन्निद्य क्षत्रियस्य पलायनम् ।
एकवारक्षये काये मरण न पुन पुन ॥ ५७० ॥
श्रुत्वैतत्कातरतया रथमुत्सृज्य विद्रुतम् ।
आनिनायोत्तर केशै पश्चादाकृष्य फाल्गुन ॥ ५७१ ॥
योत्स्येऽह कुरुभिर्धैर्यं भजस्व भव सारथि ।
अर्जुनोऽह भवद्गेहे कङ्काद्या पाण्डवा स्थिता ॥ ५७२ ॥
श्मशानान्त शमीवृक्षस्कन्धे सन्त्यायुधानि न ।
प्रयच्छ मम गाण्डीवमित्युवाच तमर्जुन ॥ ५७३ ॥
उत्तराहृतमादाय धनुरास्फाल्य पाण्डव ।
तत्प्रेरितरथस्तूर्णं विवेश कुरुवाहिनीम् ॥ ५७४ ॥
एकैकश समस्ताश्च शराशनिघनागम ।
भीष्मकर्णकृपद्रोणमुख्यानजयदर्जुन ॥ ५७५ ॥
प्रस्वापनास्त्रसुप्ताना कुरूणामुत्तराकृते ।
जहार जिष्णुर्वासासि यशासीवाभिमानिनाम् ॥ ५७६ ॥
प्रत्याहृते गोधनेऽथ विजयेन जितारिणा ।
चक्रे विराट पुत्रस्य सभाया विक्रमस्तुतिम् ॥ ५७७ ॥
बृहन्नडप्रभावेण पुत्रस्ते विजयोर्जित ।
वदन्निति विराटेन प्रहतोऽक्षैर्युधिष्ठिर ॥ ५७८ ॥
हेमपात्रे धृते रक्ते द्रौपद्या चक्रवर्तिन. ।
प्रविवेशार्चित पौरैरवाप्तोन्नतिरुत्तर ॥ ५७९ ॥
अक्षाभिघातरक्ताक्ललाट वीक्ष्य धर्मजम् ।
स प्रसाद्य प्रयत्नेन निनिन्द कुकृत पितु ॥ ५८० ॥
अज्ञातवाससमये पूर्णे पाण्डुसुतानथ ।
हृष्ट प्रकटता याताद्विराट समपूजयत् ॥ ५८१ ॥

तेषामभ्युदयं ज्ञात्वा प्राप्तेष्वखिलबन्धुषु ।
विराटस्तनया प्रादादुत्तरामभिम यवे ॥ ५८२ ॥
ते कृष्णसात्यकिहलायुधकुन्तिभोज
पाञ्चालशैव्यमगधेशशिखण्डिमुख्यै ।
सार्धं सभामुवमुपेत्य विराटजुष्टा
प्रापु श्रिय कनकविष्टरसनिविष्टा ॥ ५८३ ॥
अखण्डितान्पाण्डुसुतान्विज्ञाय कुरुभूपति ।
अलङ्घ्यशासन दैव मेने दलितपौरुषम् ॥ ५८४ ॥
तेषामक्षौहिणी सप्त ज्ञात्वाथ समुपागता ।
दुर्योधन प्रविदधे भूपालबलसग्रहम् ॥ ५८५ ॥
पाण्डवार्थे समायात पथि [1]समानभोजनै ।
आराध्य तुष्टमहरत्स शल्य मद्रभूपतिम् ॥ ५८६ ॥
द्वारकाया तत कृष्ण सुयोधनधनजयौ ।
तुल्यमभ्येत्य साहाय्य ययाचाते रणोद्यमे ॥ ५८७ ॥
अक्षौहिण्या परिवृत कृतवर्माणमच्युतः ।
दत्त्वा कुरुपतेर्भागमयोद्धा पाण्डवान्ययौ ॥ ५८८ ॥
वृत सौबलहार्दिक्यभगदत्तजयद्रथै ।
एकादशाक्षौहिणीभि कौरव प्रमद ययौ ॥ ५८९ ॥
अत्रान्तरे रणारम्भसशयाकुलिताशयम् ।
धृतराष्ट्र समभ्येत्य प्रणम्योवाच संजय ॥ ५९० ॥
अराज्यदानसधानदूतोऽह तव शासनात् ।
गत पाण्डुसुता द्रष्टु लोभाभ्यासेन लज्जित ॥ ५९१ ॥
मयोक्त भवतोक्त यत्प्रत्युक्त यत्तु पाण्डवै ।
देव वक्तास्मि तत्सात सभाया भूभुजा पुर ॥ ५९२ ॥
इत्युक्त्वा सजये याते धृतराष्ट्र स्वदुर्नयात् ।
तद्वाक्यशङ्काकुलित प्राप निद्रादरिद्रताम् ॥ ५९३ ॥

---

१ 'समान्य क'।

प्रजागरार्दितस्यास्य द्वा स्थाहूत सुखोज्झितम्।
समेत्य विदुर प्राह सजयोक्तासशयम् ॥ ५९४ ॥
अय ते सुमते कस्मान्निद्राद्रोही महाज्वर ।
तापं नायान्ति निष्कामा निर्लोभा निर्भया अपि ॥ ५९५ ॥
त्यक्ताभिमान सतोषी निर्द्वेषं शीलवान्क्षमी ।
दु खैकसारे ससारे पञ्चैते सुखनिर्वृता ॥ ५९६ ॥
लोभाभ्यासव्यसनमसम चिन्तया हन्ति निद्रा
स्वस्थ शेते प्रसृतचरण किं तु निर्लोभ एव ।
लोभ पुसामसमविषम कृष्णवर्त्मा विधत्ते
तीव्र ताप जनधनघनस्नेहसपूर्यमाण ॥ ५९७ ॥
असेवाप्ता वृत्ति खलपरिभवायासरहिता
वच सत्यस्नात परगुणगणोदीरणपरम् ।
अनुत्तान पाणि परधनकणस्पर्शविमुख
प्रकृत्या निर्वैर हृदयममल यस्य स सुखी ॥ ५९८ ॥
राज्यार्धं भ्रातृपुत्रेभ्य प्रयच्छ त्यज लुब्धताम् ।
बन्धुवैररजोदिग्ध प्रक्षालय धिया मन ॥ ५९९ ॥
त्यजैक कुमतिं पुत्र सरक्ष सकल कुलम् ।
गोनसादष्टमेकाङ्ग त्यज्यते जीविताप्तये ॥ ६०० ॥
विदुरेणेत्यभिहिते धृतराष्ट्रस्तमब्रवीत् ।
युक्तमुक्त त्वया किं तु त्यक्तु शक्नोमि नात्मजम् ॥ ६०१ ॥
हेलास्थलीकृताम्भोधिस्तृणीकृतहिमाचल ।
स्वातन्त्र्यचित्रचरित केन वा लङ्घ्यते विधि ॥ ६०२ ॥
श्रुत न मृत्युरस्तीति मया किल वच पुरा ।
तद्ब्रूहीति क्षितीशेन पृष्टस्त विदुरोऽवदत् ॥ ६०३ ॥
स्वय वक्तु न युक्त मे राजन्नुपनिषत्पदम् ।
सनत्सुजातो योगीन्द्र सर्वं ते कथयिष्यति ॥ ६०४ ॥

---

१ 'गरार्त्तस्य' क. २ 'निदाघ' क ३ च' क ४ तीव्र' क ५ गोनसा' क-ख

अभिधायेति विदुरस्त सस्मार स चाययौ।
प्राप्तपूजासन पृष्ट क्ष्माभुजेति[1] तमभ्यधात् ॥ ६०५ ॥
राजन्देहभृतां मृत्यु क्रोध स्ववेदनोदित[2]।
येनाहतश्च हन्ता च मर्मदाहेन शोचित ॥ ६०६ ॥
रागद्वेषादयो दोषा जनानां जन्मकारणम्।
जन्मैव मृत्यु ससारे नास्ति मृत्युरजन्मनाम् ॥ ६०७ ॥
न मुक्तिर्वेदवादेन देहान्ते स पलायते।
वीणावशेषु भग्नेषु न क्वचित्तिष्ठते ध्वनि ॥ ६०८ ॥
आत्मप्रत्यवमर्शेन पुनर्जन्म न विद्यते।
आत्मप्रकाश पश्यन्ति योगिनस्त सनातनम् ॥ ६०९ ॥
इत्युक्त्वान्तर्हिते तस्मिन्योगीन्द्रे तेजसां निधौ।
राजा राजसभा प्रातर्भेजे भीष्मादिभि सह ॥ ६१० ॥
आहूत सजयस्तत्र पाण्डवोक्तिं न्यवेदयत्।
श्रूयतामविरुद्धैर्वा क्रुद्धैर्वा तैरुदाहृतम् ॥ ६११ ॥
स्व राज्य प्रददाति यद्यवनिपस्तत्किं हतैर्बान्धवै-
र्द्यूते किं तु कृता न विस्मरति ता भीम प्रतिज्ञां निजाम्।
पाणि किं च पितृव्यपादविनतौ चापे च धावत्यय[3]
तुल्य चित्तममन्युमन्युशबल सधौ च युद्धे च न ॥ ६१२।
श्रुत्वैतद्धृतराष्ट्रेण तनयक्षयभीरुणा।
भीष्माद्यैश्चार्थित सधिं बुबुधे न सुयोधन ॥ ६१३ ॥
अत्रान्तरे लोकगुरुर्लोकप्रत्यायनोद्यत।
सध्यर्थी कौरवान्कृष्ण स्वयमेव समाययौ ॥ ६१४ ॥
भक्त्या पुर[4] समायातैर्भीष्मद्रोणकृपादिभि।
सहित स विवेशाथ धृतराष्ट्रस्य मन्दिरम् ॥ ६१५ ॥
हृष्टेन पूजितस्तेन प्रणयेन निमन्त्रित।
स्नेहे विपदि वा भोक्तु युक्तमित्याह केशव ॥ ६१६ ॥

---

१ 'क्ष्माभुजा च' ख ग २ 'वचनो' क ३ 'अल' ख ग ४ 'पुरा' ख.

विदुरस्य गृहे भुक्त्वा नीत्वा तत्कथया क्षपाम् ।
प्रभाते राजभिर्जुष्टा प्रविवेश सभा हरि ॥ ६१७ ॥
हेमासनोपविष्टेऽथ सामात्ये कौरवेश्वरे ।
भेजे रत्नासन शौरि सहायातैर्महर्षिभि ॥ ६१८ ॥
अथ प्रथमजीमूतश्याम[1] सामसुधामयीम् ।
उज्जगार गिर स्निग्धगम्भीरा गरुडध्वज ॥ ६१९ ॥
कौरवेन्द्र स्वपुत्रास्ते भ्रातृपुत्रास्तु[2] पाण्डवा ।
सदृशा किं त्वया तेषा भेदात्कलिरुपेक्षित ॥ ६२० ॥
भवान्विद्यासिन्धुस्तव सुमतिदाता च विदुर
प्रणेता भीष्मोऽय गुरुरपि भरद्वाजतनय ।
अहो तत्राप्येषा प्रभवति मतिर्दुर्नयमयी
न विद्म कस्याय कुकृतपरिपाकस्य विभव ॥ ६२१ ॥
कलङ्क या दत्ते प्रसरदपवादास्पदतया
सुहृद्भिर्नैराश्यात्कृतमुखविकारै परिहृता ।
अभोग्या बन्धूना कृशविवशभृत्यार्थिविफला
सशापा सा सपद्भिपदिव जनोद्वेगजननी ॥ ६२२ ॥
यद्वृत्त खलकेलिकैतवकलिक्लेशेन कालुष्यकृ
च्चित्ते तत्किल संकलय्य सकल लोकक्षयाशङ्किभि ।
सधिर्वैररजोविरामविमलैरभ्यर्थ्यते पाण्डवै-
र्भीमै किं च कुशस्थलप्रभृतिभि प्रीत्यार्पितै पञ्चभि ॥६२३॥
कौस्तुभाभरणेनेति भरतान्वयभूतये ।
सभ्यानां भीष्ममुख्याना भाषितेऽभिमते सताम् ॥ ६२४ ॥
प्रबोधितोऽपि मुनिभि कण्वभार्गवनारदै[3] ।
मदनिद्रालस प्राह संधिद्वेषी सुयोधन ॥ ६२५ ॥
मया सूच्यग्रमात्रापि न त्याज्या पाण्डवेषु भू ।
किं मिथ्यानीतिचिन्ताभिर्दैवाधीना विभूतय ॥ ६२६ ॥

---

१ 'श्याम' क २ भ्रातृ पुत्राश्च क ३ 'नारदभार्गवै' क

भवति भिषगुपायै पथ्यभुङ्नित्यरोगी
धनधरणविनिद्रश्छिद्रगोप्ता दरिद्र ।
अनयचयविधायी निश्चलैश्वर्यधैर्य
स्ववशनियंतशक्ते शासनेनैव धातु ॥ ६२७ ॥
इत्युक्त्वोत्थाय दर्पान्ध कर्णेन सह कौरव ।
सभान्तराद्विनिर्गत्य ब ध शौरेरचिन्तयत् ॥ ६२८ ॥
सह स्थितेन कश्चित कर्णे सात्यकिना हरि ।
ज्ञात्वा तन्मतमापेदे विश्वात्मा विश्वरूपताम् ॥ ६२९ ॥
विश्वाकारव्यतिकरलसद्ब्रह्मरुद्रेन्द्रचन्द्रै-
र्व्याप्त सर्वै सुरमुनिगणै सिद्धगन्धर्वसाध्यै ।
निष्पर्यन्ताकृतिकृतजगद्गौरव कौरवाणा
निद्रामुद्रामदिशदशिवामच्युत प्रच्युतानाम् ॥ ६३० ॥
विना भीष्म सविदुर मोहलीनेषु राजसु ।
सभामुत्सृज्य भगवान्प्रतस्थे गरुडध्वज ॥ ६३१ ॥
पश्चात्कर्णमथायातमारोप्य स्वरथे हरि ।
प्रेम्णा प्राहार्कतनय कौन्तेयस्त्व न सूतज ॥ ६३२ ॥
सहोदरान्पाण्डुसुतान्भजस्व त्यज कौरवान् ।
राज्य तव क्रमायात कुरु मद्वचन हितम् ॥ ६३३ ॥
इत्युक्त शौरिणा श्रुत्वा कर्णस्त प्रत्यभाषत ।
सर्वं वेद्मि न निन्द्य तु मित्रद्रोहमह सहे ॥ ६३४ ॥
देव त्वमेव वद कौरवभूमिभर्तु-
रुत्सङ्गसक्तशिरस कथमर्कजोऽहम् ।
व्यापारयामि सुहृद परिपीय लक्ष्मीं
कण्ठे शठ कठिनधारमकुण्ठशस्त्रम् ॥ ६३५ ॥
साम्राज्य निहतारातिरवाप्स्यति युधिष्ठिर ।
स दृष्ट श्वेतवाहस्य स्वप्ने पायसभुज्यया ॥ ६३६ ॥

---

१ निश्चित' क २ 'शैलस्थ' ख-ग

दृष्टाश्च कौरवा सर्वे तैलाक्ता खरवाहना ।
रक्तमाल्याम्बरोष्णीषा व्रजन्तो दक्षिणा दिशम् ॥ ६३७ ॥
इति वैकर्तनेनोक्तं[1] विचिन्त्योचितमच्युत ।
त विसृज्य समामन्त्र्य प्रययौ पाण्डवान्तिकम् ॥ ६३८ ॥
प्रात कुन्ती समभ्येत्य कर्णं सूर्यार्चनोन्मुखम् ।
मुक्तमौन तदेवाह नामन्यत स चाचल ॥ ६३९ ॥
उवाच च विना जिष्णु नै[2] हन्म्यन्य तवात्मजम् ।
मयि तेन मया तस्मिन्हते त्व पैञ्चपुत्रिका[3] ॥ ६४० ॥
श्रुत्वैतत्प्रययौ कुन्ती भग्नार्थितमनोरथा ।
ससैन्याश्च कुरुक्षेत्रमाजग्मु कुरुपाण्डवा ॥ ६४१ ॥
बलद्वये कुरुक्षेत्रे सनिविष्टे सुयोधन ।
भीष्म सेनापतिं चक्रे धृष्टद्युम्न युधिष्ठिर ॥ ६४२ ॥
रथसख्याक्षणे कर्णं भीष्मोऽधिरथमैभ्यधात्[4] ।
तद्युद्धावधि युद्ध च कोपात्तत्याज सूतज ॥ ६४३ ॥
तत सुयोधन भीष्म प्राहोत्साहाहवोन्मुख ।
योद्धाह त्वद्विपक्षाणामेक मुक्त्वा शिखण्डिनम् ॥ ६४४ ॥
काशिराजसुता पूर्वं बलात्कन्या स्वयवरे ।
अम्बाम्बिकाम्बालिका च भ्रातुरर्थे समाहृता ॥ ६४५ ॥
साल्वाभिलाषिणी नीता त्वयासीत्यार्तवादिनी ।
सत्यक्ताम्बा ययौ साल्व सोऽपि ता नाग्रहीद्भिया ॥ ६४६ ॥
पुन प्राप्ता मया त्यक्ता भग्नमानमनोरथा ।
सा जगामोभयभ्रशखिन्ना मुनितपोवनम् ॥ ६४७ ॥
ततस्तद्गु खकारुण्याद्भुरुर्मामेत्य भार्गव ।
अम्बा गृहाणेत्यवदत्प्रत्याख्यात पुन पुन ॥ ६४८ ॥
आज्ञाभङ्गेन कुपित स मया समरे जित ।
ययौ क्षत्रोपदेशात्तनियम स्व तपोवनम् ॥ ६४९ ॥

---

१ 'उक्तो' ख ग २ 'नाहं हन्मि ख ग ३ पुत्रपक्षका' क ४ 'अब्रवीत् ख ग

मन्मन्युत्यक्तदेहाम्बा जाता मत्क्षयकाङ्क्षिणी ।
कन्या पाञ्चालराजस्य द्रुपदस्य शिखण्डिनी ॥ ६५० ॥
प्रख्यापिता पुत्रतया सा पित्रा पुत्रकाङ्क्षिणा ।
लेभे दशार्णराजस्य विवाहविधिना सुताम् ॥ ६५१ ॥
शय्यारूढा दशार्णेशकन्या कन्या विलोक्य ताम् ।
दूत्या न्यवेदयत्पित्रे स च क्रुद्ध समाययौ ॥ ६५२ ॥
दशार्णरुद्धे नगरे द्रुपदे विद्रवोद्यते ।
खिन्ना शिखण्डिनी रात्रौ प्रययौ शून्यकाननम् ॥ ६५३ ॥
तत्र स्थूणाख्ययक्षेण कृपयैकदिनार्पितम् ।
विधातृशक्तिवैचित्र्यात्सा लेभे लक्ष्म पौरुषम् ॥ ६५४ ॥
दर्शित द्रुपदेनाथ पुरुषव्यञ्जन सुतम् ।
दृष्ट्वा विमन्युर्दाशार्ण स्वा ययौ लज्जित पुरीम् ॥ ६५५ ॥
वन वैश्रवण प्राप्तस्त समीपमनागतम् ।
स्थिरस्त्रीलक्षण यक्ष शापेन विदधे क्रुधा ॥ ६५६ ॥
अगृहीतेऽथ यक्षेण स्वलक्ष्मणि शिखण्डिनी ।
पुरुषत्व गता वर्ज्य स्त्रीपूर्व स मया युधि ॥ ६५७ ॥
न सत्रस्ते न नि शस्ते नान्यविद्धे न विद्रुते ।
न स्त्रीपूर्वे न साक्रन्दे निपतन्ति ममेषव ॥ ६५८ ॥
उक्त्वेति दिव्यतटिनीतनयस्तरस्वी
वृद्धोऽपि शौर्यतरुणस्तरणिप्रताप ।
प्रम्लानता परबले निजकार्मुके ज्या
चित्ते च कौरवपतेर्धृतिमाबबन्ध ॥ ६५९ ॥
दिव्य युद्धेक्षण चक्षु कृष्णद्वैपायनार्पितम् ।
अगृहीतमथ प्राप धृतराष्ट्रेण सजय ॥ ६६० ॥
कुरुपाण्डवसङ्ग्राम कुरुक्षेत्रे विलोक्य स ।
धृतराष्ट्राय निखिल दिव्यचक्षुर्न्यवेदयत् ॥ ६६१ ॥

---

१ 'देहा सा' ख ग २ 'विच्युते' क ३ 'अपि' क

अथ युद्धाय सनद्धे भूमिपालबलद्वये ।
गुरू भीष्मकृपद्रोणमुखान्सबन्धिबान्धवान् ॥ ६६२ ॥
दृष्ट्वा युद्धोद्यतानग्रे श्वेताश्व कृष्णसारथि ।
मुमोह करुणाक्रान्त प्रशान्तसमरोद्यम ॥ ६६३ ॥
त समाश्वास्य शोकार्तं जगाद गरुडध्वज ।
त्रिजगत्सर्गसंहारक्रीडापरिचितोऽच्युत ॥ ६६४ ॥
मनुष्यजन्मजनिता केय ते मोहवासना ।
क्षय यदक्षयस्यापि शङ्कसे परमात्मन ॥ ६६५ ॥
स्फटिकस्येव कुरुते रागयोगाच्चिदात्मन ।
मिथ्याकलङ्ककलना कायाहंकारसकर ॥ ६६६ ॥
मेघव्योमसमागमप्रतिनिधिर्धूमाग्निसङ्गोपम
श्लेष कायचिदात्मनो प्रकुरुते भिन्नोऽप्यभिन्नक्रमम् ।
छिन्नेच्छाघनमूलनिष्फलतया नित्यप्रवृत्तक्रियै
समोह स्वपरावभेदरहितैर्युक्तै स सत्यज्यते ॥ ६६७ ॥
इत्युक्त्वा प्रत्ययोत्पत्त्यै विश्वव्याप्तिनिदर्शनम् ।
अर्जुनस्योर्जित विष्णुर्विश्वरूपमदर्शयत् ॥ ६६८ ॥
तत्सर्वदेवमयमद्भुतमच्युतस्य
रूप सहस्रकरकोटिनिभ बभासे ।
नि शेषभूपतितरङ्गितसैन्यसिन्धु-
ग्रासाभिलाषवडवानलतुल्यवक्त्रम् ॥ ६६९ ॥
वच श्रुत्वा वपुर्दृष्ट्वा दिव्य मोहहर हरे ।
निर्विकल्पमतिर्जिष्णु सङ्ग्रामाभिमुखोऽभवत् ॥ ६७० ॥
रथाग्रादवरुह्याथ रणारम्भे युधिष्ठिर ।
प्रणनाम प्रसादार्द्रान्भीष्मद्रोणमुखान्गुरून् ॥ ६७१ ॥
ते तमूचुर्गुणोदार विधाय विजयाशिषम् ।
पर लज्जामहे राजन्प्रयातास्त्वद्विपक्षताम् ॥ ६७२ ॥

---

१ युद्धोद्धतान्' २ 'प्रवृत्ता क्रिया' ख, प्रवृत्ता ' ग

किं कुर्महे परायत्ता वेतनोत्तानपाणय ।
कौरवस्य पर याता सेवाकार्पण्यपण्यताम् ॥ ६७३ ॥
अग्रे सकुचिताकृतिर्लघुतया यात्यु मुखत्व विभो-
राशापाशनिवेशयन्निततनु सख्याक्षणे लम्बते ।
अल्पेनापि समर्पितेन सुतरा वित्तेन धत्ते रतिं
साकम्प किल कायविक्रयतुलारूढ सदा सेवक ॥ ६७४ ॥
इत्युक्त्वा तैर्विसृष्टेऽथ रथारूढे युधिष्ठिरे ।
चेरुर्वीरा यश पुष्पलुब्धा इव शिलीमुखा ॥ ६७५ ॥
प्रवृत्ते धनसमर्दे नृत्यत्खड्गशिखण्डिनि ।
पेतुर्भूमृत्कुले भीष्मशरधारापरम्परा ॥ ६७६ ॥
द्वन्द्वसक्तेषु शूरेषु विराटसुतमुत्तरम् ।
निनाय समरे शल्य क्षयारम्भोपहारताम् ॥ ६७७ ॥
नवमे युद्धदिवसे नागीतनयमार्जुनिम् ।
इरावन्त जघानाजौ रक्ष पतिरलम्बुस ॥ ६७८ ॥
प्रत्यह युधि भीष्मेण भूभृतामयुते हते ।
दशमेऽह्नि क्षयाशङ्का पाण्डवानामजायत ॥ ६७९ ॥
भीष्माभिमुखमाप्तस्य रणे गाण्डीवधन्वन ।
शिखण्डी पुरतस्तस्थौ मेघस्येव प्रवर्षिण[1] ॥ ६८० ॥
स्त्रीपूर्वदर्शनोद्वेगशिथिलीकृतकार्मुक[2] ।
प्राह दु शासन भीष्म किरीटिशरपूरित ॥ ६८१ ॥
एते ते त्रिपुरारातिकिरातपतनोन्नता ।
शरा' खाण्डवशौण्डस्य चण्डा गाण्डीवधन्वन[3] ॥ ६८२ ॥
एते दु सहदस्यव कुरुपतेर्वक्षग्रहे गोग्रहे
कोपव्याकुलकालखड्गजयिन पौलोमनिर्मूलना ।
जिष्णोर्लक्ष्यमिद स्वयवरमणे (हे) क्षमापालवैलक्ष्यदा
न स्त्रीपूर्वशिखण्डिनस्तनुतृणक्लीबानना सायका ॥ ६८३ ॥

---

१ मेघस्येवेषु वर्षिण ' ख ग २ दशनोद्योग' ख ग ३ 'धन्विन ' ख ग

इति ब्रुवन्कौरवेश शरनिर्विवराकृति ।
स पपात रथादस्तशैलादिव दिवाकर ॥ ६८४ ॥
पितुर्वरेण स्वच्छन्दमृत्युर्योगपरायण ।
उत्तरायणमाकाङ्क्षन्स जीवितमधारयत् ॥ ६८५ ॥
दिव्यास्त्रभिन्नभूजाततोयाप्यायकृदर्जुन ।
शिरस्तस्य निराधारमुच्चिक्षेप शरैस्त्रिभि ॥ ६८६ ॥
कर्णेन प्रणिपातकीर्णचरण पूरेण बाष्पाम्भसा-
माशापाशविमुक्तिनिश्चलसुख संसारविस्तारिणम् ।
ससार स्मरणीयमन्तसमये सतोषविश्रान्तधी
शान्तानन्तविकल्पतल्पविमले चित्तेऽच्युत सोऽच्युतम् ॥६८७॥
अथ भीष्मविहीनस्य धृतिहीनस्य पश्यत ।
सैन्यस्याधिपतिं चक्रे द्रोणाचार्यं सुयोधन ॥ ६८८ ॥
प्राप्ताभिषेक प्रददौ वर दुर्योधनाय स ।
युधिष्ठिर गृहीत्वा ते दास्यामि समरादिति ॥ ६८९ ॥
तत प्रवृत्ते सङ्ग्रामे प्रथमेऽह्नि नृपक्षय ।
इतोऽभूद्द्रोणविशिखैर्धृष्टद्युम्नशरैरितैं ॥ ६९० ॥
द्वितीये युद्धदिवसे स्मारित कुरुभूभृता ।
गतेऽर्जुने धर्मसुत ग्रहीष्यामीति सोऽभ्यधात् ॥ ६९१ ॥
तत सशप्तका शूरा शपथादनिवर्तिन ।
त्रिगर्ता समराद्दूर निन्युराहूय फाल्गुनम् ॥ ६९२ ॥
कौरवै पाण्डवानीके कुरुसैन्ये च पाण्डवै ।
त्रिगर्ताब्धौ च पार्थेन दारितेऽभून्नृपक्षय ॥ ६९३ ॥
सुप्रतीकगजारूढस्तत प्राग्ज्योतिषेश्वर ।
मृद्नन्गजरथानीक पाण्डुसेना व्यलोकयत् ॥ ६९४ ॥

---

१ 'निराधारं स चिक्षेप' ख ग २ 'विस्तारणम्' ख ३ विश्रान्तये' ख
४ 'जल्प' ख ५ 'इति' क ६ 'भूभुजा' क

श्रुत्वास्य सैन्यसमर्दं त्वरित श्वेतवाहन ।
मुरारिप्रेरितरथ कुञ्जरस्याभवत्पुर ॥ ६९५ ॥
घोरे प्रवृत्ते समरे किरीटिभगदत्तयो ।
ऊर्ध्वाध पातिनामासीत्सघर्ष पत्रिणामपि ॥ ६९६ ॥
विश्वक्षयक्षम क्षिप्त भगदत्तेन वैष्णवम् ।
जग्राहार्जुनरक्षायै वक्षसास्त्रमधोक्षज ॥ ६९७ ॥
पार्थास्त्रकृत्ते पतिते भगदत्तेऽथ भूभृति ।
भग्नभूभृत्कुला पृथ्वी चकम्पे कुरुवाहिनी ॥ ६९८ ॥
तृतीये युद्धदिवसे प्रतिज्ञाभङ्गलज्जित ।
चक्रव्यूह व्यधात्क्रुद्ध ससारगहन गुरु ॥ ६९९ ॥
पार्थे सशप्तकान्याते व्यूह धर्मसुताज्ञया ।
सौभद्र केसरिशिशुर्गजयूथमिवाविशत् ॥ ७०० ॥
प्रवेष्टुमुद्यतान्व्यूहमभिमन्युविदारितम् ।
अवारयद्वर्गवरात्पाण्डुपुत्राञ्जयद्रथ ॥ ७०१ ॥
अभिमन्युशरोत्कृत्तशिरसा कङ्कटक्षये ।
भूभृता वज्रभिन्नाना शृङ्गभङ्ग इवाभवत् ॥ ७०२ ॥
नृपान्कर्णकृपद्रौणिशल्यहार्दिक्यसौबलान् ।[1]
एकैकश समस्ताश्च स शरैर्विमुखान्व्यधात् ॥ ७०३ ॥
कृत्तचाप स कर्णेन हताश्च कृतवर्मणा ।
कृपेण हतसूतश्च हत सर्वैर्महारथै ॥ ७०४ ॥
हत्वा त्रिगर्तानायात सव्यसाची दिनक्षये ।
मुमोह तनय श्रुत्वा हतमेक महत्तरै ॥ ७०५ ॥
व्यूहद्वारनिरोद्धार ज्ञात्वा हेतु जयद्रथम् ।
अनस्तगे रवौ जिष्णु. प्रतिज्ञा तद्वधे व्यधात् ॥ ७०६ ॥
तत्प्रतिज्ञाभयाद्वन्तु रात्रौ सैन्धवमुद्यतम् ।
गोप्ता तवाहमित्युक्त्वा दर्पाद्द्रुरवारयत् ॥ ७०७ ॥

---

१ 'लुब्ध' क, 'नृपकर्ण' ख ग

स्वप्ने स कृष्ण श्वेताश्व स्तुत्वा देव पिनाकिनम् ।
विधिं पाशुपतास्त्रस्य तदादिष्टमवाप्तवान् ॥ ७०८ ॥
प्रभाते शकटव्यूहे सूचीपाशे जयद्रथम् ।
निवेश्य यत्नादाचार्यश्चक्रे दैवजयोद्यमम् ॥ ७०९ ॥
व्यूहद्वारस्थित द्रोण प्रणम्याथ धनजय ।
कम्पलोल विवेशाशु सैन्य वनमिवानल ॥ ७१० ॥
मनोजवस्य विशत शरैर्गाण्डीवधन्वन ।
शिर समूह[1] आच्छिन्न पपात भुवि भूभृताम् ॥ ७११ ॥
दूर प्रविष्टे श्वेताश्वे शङ्खशब्दमशृण्वता ।
विवेश सात्यकिर्व्यूह विसृष्टो धर्मसूनुना ॥ ७१२ ॥
तस्य निर्दारितारातेर्विशिखाशनिवर्षिण ।
भूरिश्रवा धैर्यनिधिर्वेग गिरिरिवाग्रहीत् ॥ ७१३ ॥
तौ कृत्तकार्मुकरथौ खड्गचर्मधरौ मिथ ।
युध्यमानौ ददृशतुर्नान्तर चित्रचारिणौ ॥ ७१४ ॥
सात्यके पातितस्याथ शिरश्छेत्तु समुद्यतम् ।
जिष्णोरदर्शयद्दूराद्भूरिश्रवसमच्युत ॥ ७१५ ॥
पार्थस्तस्यार्धचन्द्रेण सखड्ग भुजमुद्यतम् ।
कङ्कणारावसाक्रोशमिव च्छित्त्वा न्यपातयत् ॥ ७१६ ॥
स कृत्तबाहुर्धिक्कृत्य निन्दन्कृष्णकिरीटिनौ ।
तालुरन्ध्रोद्गतज्योतिर्योगेनात्मानमत्यजत् ॥ ७१७ ॥
अवाप्य सज्ञामज्ञातवृत्त सात्यकिराकुल ।
धिक्कृत सर्वभूपालैश्चकर्तास्यासिना शिर ॥ ७१८ ॥
युधिष्ठिराज्ञया व्यूह प्रविशन्नथ मारुति ।
द्रोण सरथमुत्क्षिप्य चिक्षेपाद्भुतविक्रम ॥ ७१९ ॥
स निष्पिष्टगजानीक प्रविष्ट कर्णमग्रत ।
कृतायुधाश्च षट्[2]कृत्वश्चकाराहतकौरव ॥ ७२० ॥

---

१ 'प्रकर' क, समूह' ख २ षट्कला' ख ग

तत कर्ण समुत्कृत्तकवचायुधवाहनम्।
तुद भीम धनुष्कोट्या नावधीज्जननीं सरन्॥ ७२१॥
दिनस्य शिरसीवार्के लम्बमाने क्षणक्षये।
दृष्ट्वा जयद्रथ दूरात्सदर्घेऽस्त्र धनजय॥ ७२२॥
क्षितौ तस्य शिर क्षेप्तु शिर पूर्वं पतेदिति।
पित्रा दत्त वर कृष्ण फाल्गुनाय न्यवेदयत्॥ ७२३॥
कुरुक्षेत्राद्बहिर्जिष्णु संध्यासीनस्य तत्पितु।
चिक्षेपाङ्के शरोत्कृत्त शिरस्तस्मात्क्षितिं ययौ॥ ७२४॥
अक्षौहिणी सप्त हत्वा जिष्णुना सैन्धवे हते।
दैवमेव जनो मेने सर्वथा निष्प्रतिक्रियम्॥ ७२५॥
उक्त्वापि गुरुणा रक्षा रक्षिते न जयद्रथे।
लज्जितेन समादिष्ट रात्रियुद्धमवर्तत॥ ७२६॥
समुद्धततम केशी रणे तरलतारका।
ननर्तासिभुजा वीररक्तक्षीबेव सा क्षपा॥ ७२७॥
अर्धरात्रेऽथ निष्पिष्टकौरवानीकनायक।
शैलानलशिखावर्षी ख विवेश घटोत्कच॥ ७२८॥
तस्याट्टहासविस्पष्टदष्ट्रांशुपटलैर्मुहु।
पाट्यमानमिवाकृष्ट रुरावाघट्टित तम॥ ७२९॥
कुरुसैन्ये रणे भग्ने हैडिम्बस्य प्रमाथिन।
कर्ण एव पुरस्तस्थौ पौलस्त्यस्येव राघव॥ ७३०॥
एकवीरवधव्यक्त्या शक्त्या वैकर्तनोऽथ तम्।
जघान घनसमर्दं कुमार इव तारकम्॥ ७३१॥
पञ्चमे युद्धदिवसे मातर्दिव्यास्त्रदु सह।
प्रजागरगरक्षीबान्क्षितीशानवधीद्गुरु॥ ७३२॥

---

१ 'दत्तवरं' क २ जिला' क ३ अज्ञाननशरावर्षी' ख, 'अज्ञानलग्निलावर्षी' ग, ४ 'रुरावाघटित' ख ग ५ 'क्षपाप्रजागरक्षीबान्' क

हत्वा विराट द्रुपद पाञ्चाल च ससृञ्जयम्।
ब्रह्मास्त्रेणाकरोद्द्रोण कल्पन्ताविर्भवभ्रमम्[1] ॥ ७३३ ॥
अश्वत्थामा हत सख्ये स्पष्टमुक्त्वेति धर्मज।
हस्तीत्यसत्यचकित पश्चात्स्वैरमभाषत ॥ ७३४ ॥
श्रुतपुत्रवधस्याथ त्यक्तशस्त्रधृतेर्गुरो।
उत्क्रान्तधाम्न खड्गेन धृष्टद्युम्न शिरोऽहरत् ॥ ७३५ ॥
हते द्रोणे प्रकुपित कृतान्त इव तत्सुत।
नारायणास्त्रमसृजज्ज्वालालीढजगत्त्रयम् ॥ ७३६ ॥
अस्त्रानले प्रज्वलिते वीरा सर्वे हरेर्गिरा।
रथेभ्योऽवातरन्व्यस्तशस्त्रा पवनज विना ॥ ७३७ ॥
एकीभूतास्त्रदहनव्याप्त भीममथाच्युत।
हृतायुध समाकृष्य रथाप्रादनयद्ध्रुवम् ॥ ७३८ ॥
शान्तेऽस्त्रे द्रौणिनाग्नेय घोरमस्त्रमुदीरितम्।
ब्रह्मास्त्रेणार्जुन शान्तिं निनाय प्रलयोद्यतम् ॥ ७३९ ॥
अथ मोहविषावेशसमनीलमणिप्रभम्।
प्राप्त दृष्ट्वा मुनिं द्रौणि प्रणम्य व्यासमभ्यधात् ॥ ७४० ॥
कस्मान्मे भगवन्नस्त्रवैकल्यम्लानमानता।
मदस्त्रदहनान्मुक्तौ[3] कस्मात्कृष्णधनञ्जयौ ॥ ७४१ ॥
तमब्रवी मुनिर्द्रौणे[4] त्वमशस्त्रिपुरद्विष।
नरनारायणौ देवौ जातौ कृष्णधनञ्जयौ ॥ ७४२ ॥
मूर्तौ त्वयार्चित शम्भुराभ्या लिङ्गे सुपूजित[5]।
एतौ तेनाधिकौ त्वत्तस्त्यजैता कोपविक्रियाम् ॥ ७४३ ॥
मुनिमाश्वासितद्रौणिं व्रजन्त फाल्गुन पुर।
दृष्ट्वा रथादवप्लुत्य प्रणम्य तमभाषत ॥ ७४४ ॥

---

१ 'कल्पान्तविभव' ख ग २ वैक्लव्य' क ३ 'दहनोन्मुक्तौ' क ४ 'द्रौणिं' ख
५ 'स पूजित' ख

भगवन्कौरवव्यूह प्रविष्टेन मया पुर ।
अस्पृष्टभूमि पुरुषो दृष्ट शूलकर स क ॥ ७४५ ॥
मुनि प्राहार्जुन देव स स्वय शशिशेखर ।
त्र्यम्बकस्त्रिपुरारातिरुग्रक्षस्त्रिपथगाधर ॥ ७४६ ॥
स्मर स्मरारिं तमुमासहाय शिव जगद्भासविलाससक्तम् ।
भयापह भीममनेकरूपमुक्त्वेति पार्थं प्रययौ मुनीन्द्र ॥ ७४७ ॥
हते द्रोणे प्रिय मित्र कौरवश्चिरचिन्तितम् ।
कर्णं सेनापतिं कृत्वा जगज्जितममन्यत ॥ ७४८ ॥
अभ्यर्थ्य सारथिं शल्य चक्रे तस्य सुयोधन ।
रुद्रस्य त्रिपुराराते सनद्धस्येव वेधसम् ॥ ७४९ ॥
कीर्णास्त्रकिरण कर्णस्तत पाण्डववाहिनीम् ।
शरत्तीव्र इवोष्णांशुर्निनायाल्पावशेषताम् ॥ ७५० ॥
भीम कुरुचमूमध्ये क्षपयन्धृतराष्ट्रजान् ।
कृष्णाकेशाम्बराकर्षकुशल प्राप कौरवम् ॥ ७५१ ॥
असिकृत्तोरसस्तस्य भीम शोणितमापपौ ।
प्रकोपराक्षसावेशविवश कुरुते न किम् ॥ ७५२ ॥
कर्णास्त्रपीडनक्रुद्धयुधिष्ठिरगिरार्दित ।
राधेयनिधनाधानसनद्धोऽभूद्धनजय ॥ ७५३ ॥
प्रवृत्ते सभृतामर्षे रणे कर्णकिरीटिनो ।
मृगस्त्व जिष्णुर्सिहाग्रे कर्णमित्याह मद्रप ॥ ७५४ ॥
खण्डपुच्छामिध नागमथ सधाय सचितम् ।
प्राहिणोत्पाण्डुपुत्राय कर्ण खाण्डवखण्डितम् ॥ ७५५ ॥
हरिगौरवनम्रश्च(स्य) विनतस्य स पन्नग ।
जहाराप्राप्तकण्ठाग्र किरीटाश किरीटिन ॥ ७५६ ॥
भूम्रस्तचक्रमुद्धर्तुमथ स्वरथमुद्यत ।
क्षणक्षमार्थे राधेय पार्थस्यातिथिता ययौ ॥ ७५७ ॥

---

१ 'पर' ख ग २ वेधसा ख ग ३ गिरार्पित' ख ग ४ कण्ठांश' ख ग ५ क्षमार्थी' क

कृष्णस्तमब्रवीद्व्रीडाकरशल्योक्तिपीडितम् ।
धर्म स्मृतोऽद्य राधेय नाभिमन्युवधे त्वया ॥ ७५८ ॥
यथा तप्तस्यान्ते भवति मृदुता सनतिमयी
तथा सा स्यात्पूर्वं यदि जनमता वृत्तिरथ स (१) ।
घनाघातोत्कर्षापरपुरुषहुंकारविहिता
न तस्यासीत्पीडा निबिडजडतावासविकृते ॥ ७५९ ॥
इत्युक्ते शौरिणा कर्णं समारुह्य रथं पुन ।
संदधे भार्गवादिष्टं महास्त्रं शिथिलस्मृति ॥ ७६० ॥
बाणेन कृत्तगलमञ्जलिकाभिधेन
तस्यार्जुनस्तरलकुण्डलदीप्तगण्डम् ।
वक्त्रं जहार पृथुहारविलम्बिशोण-
रत्नप्रभानिभनभःप्रसृतप्रकाशम् ॥ ७६१ ॥
हते कर्णे वहन्नन्तः शोकशल्यं सुयोधनः ।
शल्यं सेनापतिं कृत्वा युयुधे निघनोत्सुकः ॥ ७६२ ॥
शल्येन पीडितं दृष्ट्वा निजसैन्यं युधिष्ठिरः ।
भ्रूभङ्गकङ्कवक्त्राङ्कस्तं समुद्धर्तुमाद्रवत् ॥ ७६३ ॥
तस्यैषुवर्षिणश्छित्त्वा रथसारथिकार्मुकान् ।
प्राहार्षीत्पाण्डवः शक्तिं कालदंष्ट्रामिवोत्कटाम् ॥ ७६४ ॥
प्रविश्य शल्यहृदयं शक्तिर्बिलमिवोरगी ।
वेगशूत्कारिनिश्वासा साविशद्वसुधातलम् ॥ ७६५ ॥
स्वयं राज्ञा हते शल्ये सहदेवेन सौबले ।
सैन्ये शेषे च भीमेन निःसैन्योऽभूत्सुयोधनः ॥ ७६६ ॥
कृतवर्मकृपद्रौणिशेषः कुरुपतिस्ततः ।
विरथस्तान्समामन्त्र्य विवेशालक्षितो ह्रदम् ॥ ७६७ ॥
ह्रदस्यान्तर्नृपे तस्मिन्प्रविष्टे शत्रुशङ्किते ।
भीमः भीमभयेनेव पयश्चिरमकम्पत ॥ ७६८ ॥

---

१ 'प्राहैषीत्' क २ 'तले' ख ग

यस्याशेषनरेशरत्नमुकुटै पीडाभवत्पादयो-
स्तस्यारातिनिपातशङ्कितमतेरेकाकिनोऽन्तर्जले ।
क्रोधव्याधुतनक्रचक्रमकरक्रूरान्तदन्ताहति-
क्लेशक्लान्तिरभूद्विगस्थिरपदा शोकप्रदा संपद ॥ ७६९ ॥
ऋणशेषमिव ध्यायन्धार्तराष्ट्र युधिष्ठिर ।
लुब्धकाना गिरा ज्ञात्वा ससैन्यस्तूर्णमाययौ ॥ ७७० ॥
स्तिमित सलिलस्थ त जगाद च तटस्थित ।
राजन्नुत्तिष्ठ लज्जेय युक्त नान्ते पलायनम् ॥ ७७१ ॥
कृत्वा क्षत्रक्षय शेषा रक्षसि क्षत्रियस्तनुम् ।
एकेन सह युध्यस्व जिते तस्मिञ्जिता वयम् ॥ ७७२ ॥
श्रुत्वैतत्सहसोत्थाय तमभाषत कौरव ।
एष क्षपाक्षपणधी प्रविष्टोऽह जलातरम्[2] ॥ ७७३ ॥
न मे राज्ये शरीरे वा तृणे वापि स्पृहा क्वचित् ।
इत्युक्त्वा सहित सर्वै स कुरुक्षेत्रमाययौ ॥ ७७४ ॥
अत्रान्तरे हलधर श्रुत्वा कुरुकुलक्षयम् ।
सारस्वतेषु तीर्थेषु स्नात्वा त देशमाययौ ॥ ७७५ ॥
प्रधानक्षेत्रके तस्मिन्नुपविष्टे सहामरै ।
भीमकौरवयोश्चित्र गदायुद्धमवर्तत ॥ ७७६ ॥
वर्ज्यमानेऽथ भीमेन प्रहारे कौरवेण च ।
तदाघातच्युते भीमे भीमाघातेन चापरे ॥ ७७७ ॥
सुचिर सशयतुलारूढे स्वभटमण्डले ।
न तयोरन्तर कश्चिद्दृदर्शाश्चर्ययोधिनो ॥ ७७८ ॥
अथ भीमगदाघातभिन्नोरु कौरवेश्वर ।
पपात कीर्णहाराश्रुधारा कुर्वन्निव क्षितिम् ॥ ७७९ ॥
पदा भीमेन तन्मौलौ स्पृष्टे क्रुद्ध हलायुधम् ।
शमयामास कसारिर्वदन्कौरवदुर्नयम् ॥ ७८० ॥

---

१ 'क्लेशाक्रान्ति' ख-ग २ 'जला तरे' ख ग

प्रयातेष्वथ सर्वेषु द्रौणिहार्दिक्यगौतमा ।
निशि देश तमभ्येत्य ददृशु पतित नृपम् ॥ ७८१ ॥
भिन्नोरुमध्यव्यथया[1] दन्तदष्टमहीतलम् ।
वारयन्त गदाग्रेण गृध्रगोमायुवायसान्[2] ॥ ७८२ ॥
त दृष्ट्वा द्रौणिरवदत्तीव्रहृन्मर्मवेदेन[3] ।
किं त्वया नि सहायेन शत्रुवह्नौ हुता तनु ॥ ७८३ ॥
अकृष्णपाण्डव लोक करोमि तव शासनात् ।
इत्युक्त्वा तद्गिरा गत्वा प्रविवेश महद्वनम् ॥ ७८४ ॥
कूपभोजसखस्तत्र रात्रौ काकान्निपातितान् ।
उल्लूकैर्वृक्षमूलस्थ स दृष्ट्वाचिन्तयच्चिरम् ॥ ७८५ ॥
काकान्कालबलेनैते घ्नन्त्येषारिवधे स्थिति ।
हन्तु पाण्डुसुतान्रात्रौ सुप्तानेव व्रजाम्यहम् ॥ ७८६ ॥
ध्यायन्निवार्यमाणोऽपि कृपेण कृतवर्मणा ।
क्रोधादगणयन्पाप स ताभ्या प्रययौ सह ॥ ७८७ ॥
पाण्डवेषु गिरा शौरे सुप्तेष्वन्यत्र शङ्कया ।
पाञ्चालसेनाशिबिरद्वार द्रौणिरवाप्तवान् ॥ ७८८ ॥
तत्र[4] दृष्ट्वा महद्भूत सर्पकेयूरकङ्कणम् ।
प्रादुर्भूत शिरश्छित्त्वा वह्नौ क्षेप्तु समुद्यत ॥ ७८९ ॥
प्रीत्या भगवता तेन रुद्रेण स्वयमर्पितम् ।
द्रौणिर्निर्खिशमादाय विवेशारिक्षयोत्सुक ॥ ७९० ॥
पञ्चामशस्त्रनिधन धृष्टद्युम्न विधाय स ।
शिखण्डिन द्विधा कृत्वा जघानाक्षौहिणीं क्षणात् ॥ ७९१ ॥
स सुप्तवधपापेन प्रलिप्त शोणितेन च ।
कृतान्तक्रूरचरित प्रययौ कौरवान्तिकम् ॥ ७९२ ॥
नि शेषशत्रुनिर्धेन श्रुत्वा द्रौणिनिवेदितम् ।
स्वर्गेऽस्तु सङ्ग इत्युक्त्वा नृपस्तत्याज जीवितम् ॥ ७९३ ॥

---

१ 'छिन्नोरु' क २ व्याघ्र' ख-ग ३ वेदनम्' ख ग ४ 'मथन' क

प्रातर्बन्धुवियोगार्तौ कृष्णाशोकाग्नितापितौ ।
भीमार्जुनौ प्रधयतु क्रुद्धौ द्रौणिजिघासया ॥ ७९४ ॥
द्रौणि सरस्वतीतीरे चरन्त्रणधृताद्भुत ।
दृष्ट्वा भीमार्जुनावस्त्र ब्रह्मशीर्षमवासृजत् ॥ ७९५ ॥
अर्जुनो ब्राह्ममस्त्र च सघर्षेणास्त्रयोस्तयो ।
अकालप्रलयारम्भसरम्भोऽभूद्दिवौकसाम् ॥ ७९६ ॥
तद्द्रौणिमुक्तमपतन्महास्त्र व्यासशासनात् ।
अभिमन्युवधूगर्भे द्रौणिचूडामणौ परम् ॥ ७९७ ॥
पाण्डवा पुत्रशोकार्तं धृतराष्ट्र प्रलापिनम् ।
गान्धारीसहित गत्वा प्रणेमुर्लज्जिता शनै ॥ ७९८ ॥
क्रमादालिङ्गने भीम शौरिबुद्ध्यायस कृत ।
चूर्णतामगमद्गाढ धृतराष्ट्रेण पीडित ॥ ७९९ ॥
युधिष्ठिरस्य गान्धारीं सतीं प्रणमत पुरः ।
तद्दृष्टि सानलज्वाला पादाङ्गुष्ठयुगेऽपतत् ॥ ८०० ॥
क्षमस्व सह गान्धारी स्वय गत्वा रणावनिम् ।
दृष्ट्वा हतान्सुतान्कृष्ण शशाप क्षयकारिणम् ॥ ८०१ ॥
षट्त्रिंशवत्सरे कृष्ण तवाप्येव कुलक्षय ।
भविष्यतीति तद्वाक्य श्रुत्वा तामच्युतोऽवदत् ॥ ८०२ ॥
पुनरुक्तस्त्वयाय मे दत्त शाप पतिव्रते ।
अवश्यमेव भविता तस्मिन्वर्षे यदुक्षय ॥ ८०३ ॥
तत कृतोदकविधिर्बान्धवक्षयदु खित ।
राज्य न लेभे मुनिभिर्बोधितोऽपि युधिष्ठिर ॥ ८०४ ॥
कर्णं कुन्तीगिरा ज्ञात्वा भ्रातर निहत रणे ।
स शुशोच शुचाक्रान्तस्ततस्त्र नारदोऽवदत् ॥ ८०५ ॥
क्षत्रियाचार्यकं भीष्मनिकारात्कृतसयमम् ।
अस्त्रार्थी भार्गव कर्ण प्रययौ विप्रवेषवान् ॥ ८०६ ॥

---

१ 'द्रौणे' क २ 'आलिङ्गनात्' क ३ 'प्रययौ' ख ग

रामस्तदङ्कसुप्तोऽर्धनिद्रासक्षयभीरुणा ।
क्रूरक्रिमिक्षतेनापि कर्णेन न विबोधित ॥ ८०७ ॥
तद्रक्ताक्त' प्रबुद्धोऽथ दृष्ट्वा क्लेशेऽपि निश्चलम् ।
राम कर्णं न विप्रोऽसीत्युक्त्वास्त्र विफल व्यधात् ॥ ८०८ ॥
गुरुशप्त स शक्रेण हृतसंनाहकुण्डल ।
घटोत्कचे नष्टशक्ति शल्याधिक्षेपशल्यवान् ॥ ८०९ ॥
द्विजवत्सापराधेन भूम्रस्तरथनिष्फल ।
हत कर्ण कुरुपते कुमन्त्रकृतसक्षय ॥ ८१० ॥
नारदेनेत्यभिहिते व्यासमुख्यैर्महर्षिभि ।
कृष्णेन भ्रातृभि सर्वै प्रयत्नेन विबोधित ॥ ८११ ॥
राज्य कथञ्चिज्जग्राह शल्यतुल्य युधिष्ठिर ।
कस्य बन्धुवियोगार्तिनि श्वासोष्णा श्रिय प्रिया ॥ ८१२ ॥
अभिषेकार्द्रमुकुट समेत्याथ युधिष्ठिरम् ।
उवाच ब्राह्मणाकारश्चार्वाको नाम राक्षस ॥ ८१३ ॥
छत्र त्रपाकरमहो व्यजन जनाग्रे
दु खप्रद प्रविसृताश्रुकणानुकार ।
*हार पर स्वजनमित्रवियोगशोक-
पीडावता बत विडम्बनमेव लक्ष्मी ॥ ८१४ ॥
चार्वाकस्येति वचसा राज्यत्यागोद्यते नृपे ।
राक्षस कौरवसुहृद्विप्रकोपात्क्षय ययौ ॥ ८१५ ॥
ज्ञात्वोत्तरायण प्राप्त शरशय्याश्रयस्तत ।
मुनिमध्येऽस्मरद्विष्णु भीष्म पर्यन्तबान्धवम् ॥ ८१६ ॥
दोषाश्रयाखिलतम शमसूर्यधाम-
संसारसर्पविषवारणसिद्धमन्त्र ।
शुद्धात्मना भवति पुण्यपणोपपन्न
पाथेयमन्तसमये स्मरण मुरारे ॥ ८१७ ॥

---

१ 'स्मरन्' क

स्तुतिप्रवृत्त विज्ञाय भगवान्भीष्ममच्युत ।
सहित पाण्डवैर्द्रष्टु ययौ प्रीत्या ससात्यकि ॥ ८१८ ॥
प्रणत भीष्ममभ्यर्च्य हरि सुरमुनिस्तुत ।
शरशल्यव्यथाहीन स्निग्धदृक्सुधया व्यधात् ॥ ८१९ ॥
देहसंन्याससनद्ध राजा लज्जानत शनै ।
शासनेन हरेर्भीष्म श्रेय पप्रच्छ धर्मज ॥ ८२० ॥
सोऽब्रवीद्भूभुजा राजन्भूषण जनरञ्जनम् ।
धर्म प्रजापरित्राण कोष सद्भृत्यसग्रह ॥ ८२१ ॥
प्रजाकार्ये सक्ति श्रवणमभिभूतार्तवचसा
स्पृहा कामक्रोधप्रमदमदमानव्युपरमे ।
क्षिते[1] कायस्थेभ्य कृपणपरिरक्षा प्रतिपद्
गुणासङ्ग श्रेयानयमुदयलक्ष्म्या क्षितिभृताम् ॥ ८२२ ॥
विरक्तस्वीकार कृतकविरति कोषभरण
बलाधिक्ये शत्रो शरणगमन[2] पादपतनम् ।
प्रहारश्छिद्रासौ निहतरिपुमिथ्याश्रुपतन[3]
धिया दैवादिष्ट शरणमिदमापन्निपतने ॥ ८२३ ॥
आशापाशविमुक्तनिश्चलसुखा स्वायत्तचित्तस्थिति
स्नेहद्वेषविषादलोभविरति सतोषतृप्त मन ।
चिन्ता नित्यमनित्यतापरिचये सङ्गेऽपि नि सङ्गता
सवित्सेकविवेकपूतमनसामित्येष मोक्षक्रम ॥ ८२४ ॥
कारुण्याद्गलित प्रदानसमये चित्त प्रसन्न सदा
क्षीण पुत्रकलत्रदु खकृपण पात्र पवित्र परम् ।
सश्रद्ध परवित्तशल्यरहित वित्त स्वधर्मार्जित
तद्दान दयित फलप्रियतया वाणिज्यसज्ज न यत् ॥ ८२५ ॥
इत्युक्त्वा विविध भीष्म सर्वधर्मार्थसग्रहम् ।
विष्णोर्नामसहस्राख्य मन्त्रराजमुदीर्य[4] तम् ॥ ८२६ ॥

---

१ 'क्षिति' ख ग २ 'गमने' ख ग ३ 'नृप' ख ग ४ 'उदीर्यत' क; 'उदीर्यते' ख

अथैकपार्श्वे कनकद्युतिभृन्नकुलोऽद्भुत ।
विप्रकोटिशतोच्छिष्टभुव भेजे लुठत्तनु ॥ ८३९ ॥
सोऽब्रवीद्भूभुजा पृष्ट शिलोञ्छस्वच्छवृत्तिना ।
सुचिरावाप्तमशन प्राप्तायातिथयेऽर्पितम् ॥ ८४० ॥
तदुच्छिष्टजलस्पृष्ट पार्श्वं मे हेमता गतम् ।
द्वितीयपार्श्ववर्णास्यै प्राप्तोऽहं त्वत्कतुक्षितिम् ॥ ८४१ ॥
नि सख्यब्राह्मणोच्छिष्टस्पृष्टस्यापि न मे द्युति ।
जाता सत्त्वोज्ज्वल याति दानमल्पमनल्पताम् ॥ ८४२ ॥
इत्युक्त्वा नकुले याते दानमानमहोन्नति ।
सर्वस्वदक्षिणे यज्ञे राजा(ज्ञ) शिथिलता ययौ ॥ ८४३ ॥
अथ दैवतवन्नित्य पूज्यमानोऽपि भूभुजा ।
भीमोग्रवचनोद्वेगी धृतराष्ट्र शनैरभूत् ॥ ८४४ ॥
स सदा पुत्रशोकेन भूमिशायी फलाशन ।
मिथ्याराज्योपभोगार्तिं धर्मजाय न्यवेदयत् ॥ ८४५ ॥
स जातगाढवैराग्य पत्न्या सह वन ययौ ।
व्यासाज्ञया सजयेन कुन्त्या च विदुरेण च ॥ ८४६ ॥
दयितजनवियोगोद्वेगरोगातुराणा
विभवविरहदैन्यम्लानमाननानानाम् ।
शमयति शितशल्य हन्त नैराश्यनश्य-
द्भवपरिभवतान्ति शान्तिरन्ते वनान्ते ॥ ८४७ ।
यातस्तप स्थित द्रष्टु धृतराष्ट्र युधिष्ठिर ।
ददर्श विदुर ज्ञानयुक्तित्यक्तकलेवरम् ॥ ८४८ ॥
प्राप्तः स्वनगर राजा शुश्राव कुरुपुगवम् ।
सानुग दावदहने प्रविष्ट सजय विना ॥ ८४९ ॥
षट्त्रिंशेऽब्दे सुखक्षीबा वृष्णय कृष्णनन्दनम् ।
साम्ब स्त्रीवेषमादाय पप्रच्छु सस्मिता मुनीन् ॥ ८५० ॥

---

१ वैराग्य' ख ग २ षट्त्रिंशाब्दे' क

भावी सुत सुता वा स्यात्किमिति श्रीविशृङ्खला ।
क्रुद्धास्तान्मुनय प्राहुर्भविष्यति कुलान्तक ॥ ८५१ ॥
कालेन लोहमुसल जात साम्बस्य वृष्णय ।
घृष्ट्वा घृष्ट्वाम्बुधेस्तीरे तत्यजु क्षयशङ्किता ॥ ८५२ ॥
तच्चूर्णजातवल्लीभि क्षीबा स्पर्धाकथाकुधा ।
निर्बन्धाद्युध्यमानास्ते क्षणेन क्षयमाययु ॥ ८५३ ॥
कृष्ण कुलक्षयोद्विग्नस्तेजं[1] स्व धाम्नि वैष्णवे ।
हेम हेम्नीव निक्षिप्य प्रययौ कायशेषताम् ॥ ८५४ ॥
याते प्रविश्य पातालमनन्तत्व हलायुधे ।
लुब्धकेन हरि सुप्त कृष्णसारधिया हत ॥ ८५५ ॥
अनल्प[2] कल्पा तस्थिरमिव जन कल्पयति य-
न्न यस्मिन्नाशङ्का सुरगिरिगरिम्णि प्रचलने[3] ।
तदेवाक्ष्ण पक्ष्माञ्चलतरलविक्षेपतुलया
क्षयक्षीव काल किल गिलति नैवाभवदिति ॥ ८५६ ॥
अथ वृष्णिक्षय ज्ञात्वा द्वारकामेत्य फाल्गुन ।
शोकार्तस्तद्वधूवृन्द स्वपुर नेतुमुद्ययौ ॥ ८५७ ॥
व्रजतस्तस्य गोपाला बृहल्लगुडपाणय[4] ।
जह्रुराकृष्टजापस्य स्रैणमाकीर्णपत्रिण ॥ ८५८ ॥
ते द्विषत्खण्डना[5] प्रापु शरा गाण्डीवधन्वन ।
निष्फलत्व विलक्षस्य याचकस्य गुणा इव ॥ ८५९ ॥
नहि हीनमनाक्रान्त्या फाल्गुनस्य गलद्गुणम् ।
कलत्र निर्धनस्येव[6] विधेय नाभवद्धनु ॥ ८६० ॥
रुद्राभिद्रवमुद्रिताद्रिशिखरा शक्रोन्मुखा खाण्डवे
खेलोत्तालल्लतायुधोद्यतकृताटोपेषु गोपेष्वहो ।

---

१ तेजसां' ख ग २ अनन्त' ख ग ३ 'प्रदलने' ख ४ 'लडलगुड' क
५ 'खण्डना ' ख ग ६ 'निर्गुणस्येव' ख ग

जग्मुर्जिष्णुशरा मुरारितरुणीत्राणे तृणक्कीबता
यस्यायन्नविचित्रपाककलया कालाय तस्मै नम ॥ ८६१ ॥
युधिष्ठिरोऽथ विभव ज्ञात्वा पर्यन्ततादृशम् ।
भ्रातृभि सह पत्न्या च महाप्रस्थानमाविशत् ॥ ८६२ ॥
कृष्णाया पतने प्राह राजा विजयरक्तताम् ।
प्रियस्य दोषाकलन वियोगे दु खभेषजम् ॥ ८६३ ॥
सोऽवदत्प्रच्युतस्याथ सहदेवस्य धीमदम् ।
नकुलस्यादर रूपे जिष्णोर्विजयदृप्तताम् ॥ ८६४ ॥
भीमस्य बह्वशनता व्रजन्नेव शुना सह ।
पर्यन्तेऽचिन्तयन्नन्त ससारविशरारुताम् ॥ ८६५ ॥
अथ व्योमपथायात विमान सुकृतोज्ज्वलम् ।
देवदूतार्पित राजा नारुरोह शुना विना ॥ ८६६ ॥
तत्तस्याश्रितवात्सल्य धर्मस्त्यक्त्वविग्रह ।
तुष्ट स्व रूपमास्थाय[2] प्रशशस पुन पुन ॥ ८६७ ॥
अथ राजा समारुह्य विमान त्रिदिव व्रजन् ।
ददर्श नरक घोर देवदूतप्रदर्शितम् ॥ ८६८ ॥
ततस्तद्दर्शनोद्विग्न देवदूतस्तमब्रवीत् ।
राजन्द्रोणवधामत्यान्मिथ्यैतत्तव दर्शितम् ॥ ८६९ ॥
प्रजापीडाक्रीडार्जितधनभरैर्भोगसुखिना-
मकर्णाना क्लाम्यत्कृपणकरुणाक्रन्दसमये ।
अवश्य भूपाना भवति विभवोन्मादकुधिया
दुरन्ता पर्यन्ते नरककलुषक्लेशकुगति ॥ ८७० ॥
इत्युक्ते देवदूतेन शक्रलोक युधिष्ठिर ।
धर्मधाम निज भेजे स्व स्व चान्ये सुराशजा ॥ ८७१ ॥
लक्ष्मीश्चामरतारहारहसिता मत्तेभकुम्भस्तनी
त्रैलोक्याक्रमण पराक्रमभर सभोगयोग्य वय ।

---

१ 'विहेय च' ख ग २ आदाय' ख ग

पूर्वं सर्वमखर्वगर्वसुखद संचर्व्यमाण पुन
पर्यन्ते परिणाममीलदखिलास्वाद विषादास्पदम् ॥ ८७२ ॥
इति स भुवनभूत्यै भूतभर्ता विधाय
प्रसभविभवशक्त्या भूमिभारावतारम् ।
अगमदमरसंघै[1] कीर्त्यमानप्रभाव
सह नरमुनिना स्व धाम नारायणाश ॥ ८७३ ॥

इति श्रीव्यासदासापराख्यक्षेमेन्द्रविरचिते दशावतारचरिते श्रीकृष्णावतारोऽष्टम ।

बुद्धावतारो नवम ।

काले प्रयाते कलिविप्लवेन रागग्रहोग्रे[2] भगवान्भवाब्धौ ।
मज्जत्सु समोहजले जनेषु जगन्निवास करुणान्वितोऽभूत् ॥ १ ॥
स सर्वसत्त्वोपकृतिप्रयत्न कृपाकुल शाक्यकुले विशाले ।
शुद्धोदनाख्यस्य नराधिपेन्दोर्धन्यस्य गर्भेऽवततार पत्न्या ॥ २ ॥
मायाभिधाना नरनाथपत्नी गर्भे हरिं विश्वगुरु वहन्ती ।
आसन्नचन्द्रेव सुधाब्धिवेला निधानघन्येव वसुधराभूत् ॥ ३ ॥
कुक्षिं ततस्तत्क्षणमक्षताया विभिद्य मातुर्भगवान्प्रजात ।
गर्भोदकास्पृष्टविशुद्धमूर्तिर्जाम्बूनदेनेव विनिर्मिताङ्ग ॥ ४ ॥
स जातमात्रस्त्रिदशप्रमुक्तनभोनदीवारिभराभिषिक्त ।
पदत्रयीं कम्पितसर्वलोका दत्त्वा दिशन्दिक्षु भृश जगाम ॥ ५ ॥
पूर्वा स्थितेय मम निर्वृतिर्मे धी सर्वसत्त्वोद्धृतिदक्षिणेयम् ।
जन्मस्थिति सम्प्रति पश्चिमेय ससारबन्धादियमुत्तरा च ॥ ६ ॥
इति ब्रुवाण नृपतिस्तमेत्य दृष्ट्वा त्रिलोकीपतिलक्ष्मणाङ्कम्[3] ।
स जातदिव्यानुभवाभिमान[4] कुलस्य भूत्यै धृतिमाबबन्ध ॥ ७ ॥
त लक्षणज्ञा जगदु सहर्षमय शिशुर्लक्षणलक्ष्यमाण ।
प्रभुर्भविष्यत्यवनीश्वराणामनुत्तरज्ञाननिधिर्मुनिर्वा[5] ॥ ८ ॥

---

१ 'सङ्घै' क, 'सख्यै' ख ग २ 'रागोरगोग्रे क ३ 'लक्ष्मणाङ्कम्' ख-ग
४ 'भिमान' क ५ 'स' ख ग

स सर्वविद्याविदितार्थसत्त्व सप्राप्तशस्त्रास्त्रगजाश्वशिक्ष ।
सर्वार्थसिद्ध्या पितुराप्तकीर्ति सर्वार्थसिद्धाभिधता जगाम ॥ ९ ॥
सर्वस्वदानाभिमुखोऽर्थिसार्थे स देहदाने तृणवत्कृतेच्छ ।
लीलाविहारी विचरन्रथेन ददर्श वृद्ध पथि जीर्णकायम् ॥ १० ॥
त वीक्ष्य विच्छायमशक्तिलुप्तमवाप्तपर्याप्तविरक्तभाव ।
सोऽचिन्तयन्निश्चितमन्तसक्ता कायस्य निर्वेदमयी दशेयम् ॥ ११ ॥
अहो बताय जरयाभिभूत कुरूपता क्लेशमयीं प्रयात ।
तारुण्यमाकुञ्चितकृष्णकेश शौचन्निवान्त श्वसिति प्रकामम् ॥ १२ ॥
महीनिविष्टाकृतिरल्पदृष्टि किं कष्टचारी नगरे करोति ।
संतोषशीत श्रयति प्रशान्त्यै किमाश्रम श्रान्ततनुर्न वृद्ध ॥ १३ ॥
श्रम कासश्वास कफभररव कण्ठकुहरे
श्रुतौ नेत्रे घ्राणे त्वचि सरसनाया विफलता ।
अहो वृद्धस्यासिन्सकलविरहक्लेशसमये
प्रमोहस्तृष्णा यत्त्यजति दयिता नैव तरुणीम् ॥ १४ ॥
क्षण विचिन्त्येति नरेन्द्रसूनुर्व्रजन्पुरप्रातविलोकनाय ।
शोकाश्रय हर्षविषादधाम श्मशानमाकीर्णशव ददर्श ॥ १५ ॥
स सारथिं प्राह विलोक्य लीन शरीरिणा कायमपायभूमौ ।
अनित्यताचिन्तनजातखेद ससारवैरस्यविचारसक्त ॥ १६ ॥
क्लेदामोदविविभवायसशुन कुत्सापदस्याशुचे-
रन्ते यस्य दशेदृशी क्षयमयी कायस्य भूशायिन ।
मूढास्तस्य कृते परार्थहरणोद्योग परस्त्रीरति-
व्यासक्तिं परदेहदारणघनद्रोह नरा कुर्वते ॥ १७ ॥
नासत्य न परापवादपिशुन नो मर्मभिद्भाषते
नैराश्येन विशेषशीतलतनु सेवाप्रवासोज्झित ।

---

१ 'निश्चय' ख ग २ 'प्रकाशम्' ख-ग ३ 'आश्रय' ख-ग ४ 'अस्य' ख-ग ५ 'प्रवासोज्झित' क

पापोपार्जनवार्जित परगृहे द्वा स्थैरसंतर्जित
कामद्वेषविषादमोहरहित पश्यैष शेते शव ॥ १८ ॥
क्षितिप्रतिष्ठस्य कलेवरस्य पर्यन्तभूमावियमेव निष्ठा ।
यत्काष्ठपाषाणसमानचेष्ट प्रयाति मृद्वसशकृत्किमित्वम् ॥ १९ ॥
उक्त्वेति वैराग्यमयीं प्रशान्ति श्रयन्विचित्यान्तविनाशि सर्वम् ।
अन्त पुराभ्यन्तरमेत्य सोऽभूद्विभूतिभोगे शिथिलाभिलाष ॥ २० ॥
अन्त पुरे तस्य नृपात्मजाना सहस्रषष्ठ्या हरिणेक्षणानाम् ।
चित्रार्पितानामिव संगमोऽभून्न शान्तिसक्तस्य सुखानुभाव ॥ २१ ॥
तत क्षितीश समुपेत्य सर्वे मौहूर्तिका ससदि तत्त्वमूचु ।
राजन्सुतस्ते भविता त्रिलोकीपति प्रभावे भगवाञ्जिनो वा ॥ २२ ॥
श्रुत्वेति राजा भुवनाधिपत्य पुत्रस्य यत्नेन समीहमान ।
वनाभिकामस्य तपो निरोद्धुं चक्रे पुरद्वारविशेषगुप्तिम् ॥ २३ ॥
अत्रान्तरे शान्तिपथ प्रवेष्टुमाशापरित्यागधृतावधान ।
अस्ताद्रिशृङ्गाश्रमधाम्नि सूर्य संध्याकषायाम्बरमाललम्बे ॥ २४ ॥
रवौ प्रयाते ककुभा बभूव घनोऽनुराग क्षणमात्रलक्ष्य ।
प्रेमाणि चित्तानि च जीवलोके विद्युद्विलोलानि न कस्य नाम ॥ २५ ॥
रवेर्वियोगे गुणिवल्लभस्य शोकानुकारेण तमोभरेण ।
स्नेहेन साधोरिव बन्धुवर्ग पद्माकर क्लेशनिमीलितोऽभूत् ॥ २६ ॥
दिक्केशपाशप्रतिम तमस्तद्दीपावलीचम्पकमालिकाङ्कम् ।
लेभे वियोगाच्च(त्ति)वधूसराग्निस्थानस्फुलिङ्गाकुलधूमलीलाम् ॥ २७ ॥
अथोदयौ सत्त्वसितप्रकाश सुधा दधान करुणामिवान्त ।
निवारयन्मोहघनान्धकार विश्वोपकाराय शशीप्रवृत्त ॥ २८ ॥
चन्द्रोदयेऽन्त पुरसुन्दरीणा प्रसाधनव्यग्रपरिग्रहाणाम् ।
शृङ्गारलीलासमय विलोक्य क्षण प्रदध्यौ नरनाथसूनु ॥ २९ ॥

---

१ 'दोष' क २ विम' ख ग इत प्रभृति एकोनचत्वारिंशश्लोकस्य प्रथमपादप र्यन्त ख ग पुस्तकयोर्लुप्तितमस्ति

इमा समोहाश्रप्रसरतडितश्चारुनयना
यदक्षिक्षेपोऽन्तर्विशति हृदय सूचिसचिव ।
सुखादिग्ध मुग्ध विषमिव समुत्सृज्य विषय
श्रयेऽह पर्यन्तस्थितिपरिचिता शान्तितरुणीम् ॥ ३० ॥
सचिन्तयन्नित्यवनीशसूनुर्द्वारेषु रुद्धेषु निशातपालै ।
दिव्यप्रभावाप्तगतिर्विचार्य विनिर्ययौ हर्म्यपथेन तूर्णम् ॥ ३१ ॥
स्वच्छन्दकाख्य प्रविबोध्य सूत हय समारुह्य च कन्थकाख्यम् ।
व्योम्ना जवाद्द्वादशयोजनानि गत्वा वन निर्जनमाससाद ॥ ३२ ॥
तत्रावरुह्याश्ववरात्प्रभाते केयूरहाराङ्गदकुण्डलानि ।
मुक्त्वा किरीट च वितीर्य सर्वं सूताय सत्त्वाभरणस्तमूचे ॥ ३३ ॥
हहो निवर्तस्व हय गृहीत्वा गृहाण सर्वाणि विभूषणानि ।
एतैर्न किंचिन्मम कृत्यमस्ति भूभृत्कुले श्लिष्टविनष्टशिष्टै ॥ ३४ ॥
एको वनेऽस्मिन्निति नैव कार्यस्त्वया मयि स्नेहमयोऽनुताप ।[1]
सजायते जन्मनि जन्तुरेक प्रयाति चान्ते परलोकमेक ॥ ३५ ॥
द्रुमश्छत्र मित्र सरलहृदयोऽय मम मृग
स्थली लीलाशय्या तनुतरतरुत्वड्विवसनम् ।
स्वकोष सतोष कृपणकरुणैव प्रियतमा
न ससार कश्चिद्भवति विभवेऽस्मिन्परिभव ॥ ३६ ॥
उक्त्वेति सूत क्षितिपालसूनु स्वय कृपाणेन निकृत्तजूट ।
तमश्रुधारार्द्रपट विसृज्य शृङ्ग गिरेरुन्नतमारुरोह ॥ ३७ ॥
पर्यङ्कबन्धेन सुखोपविष्टे समाधिसनद्धविरुद्धचित्ते ।
तस्मिन्क्षणे विश्वगुरौ गिरीन्द्र स भग्नशृङ्ग शकलीबभूव ॥ ३८ ॥
गिरीन्द्रभङ्गेन विविग्नवक्त्र दृष्ट्वामरा व्योमचरास्तमूचु ।
जगद्गुरु त्व गिरिरेष धर्तुं प्रभो प्रसीदात्र शुभ न शक्त ॥ ३९ ॥
तत स निष्कम्पमवाप्य देश वज्रासनाख्य विकसद्विवेक ।
अनुत्तरज्ञाननिधानमाप्तु धीर स्थिरध्यानधुरधरोऽभूत् ॥ ४० ॥

---

१ प्रसीद कुशल' क

जात्यैव मार शमनिश्चलाना वैराग्यवैरेण विकारकारी।
तस्येन्दुकान्त्येव कृता समाधिमङ्गाय कान्ता स समादिदेश ॥ ४१ ॥
कटाक्षै कुर्वाणा कुवलयकुल कान्तिविकल
सृजन्त्य पादाब्जै स्थलकमलमालामलिनताम्।
दिशन्त्य शीताशोर्मुखरुचिभिरायासमसम
ययुस्तास्तस्याग्रे धृतदृढसमाधेर्विफलताम् ॥ ४२ ॥
अथागतैर्दु सहमारसैन्यै शस्त्राश्मवह्निद्रुमपासुवर्षै।
क्षिप्तैरनल्पप्रकरै कुमार पुष्पैरिवाकीर्णतनुर्बभूव ॥ ४३ ॥
स्वय समुत्सृष्टशरे स्मरेऽपि याते विलक्षे घनदैन्यसैन्ये।
वज्रासनध्यानधृति स सम्यक्सबुद्धता सर्वविदासासाद ॥ ४४ ॥
ब्रह्मप्रधानैस्त्रिदशै प्रदत्त पात्र समादाय स चीवर च।
ससारमुक्त्यै सुरमर्त्यनागसघस्य सद्धर्ममथादिदेश ॥ ४५ ॥
हय समादाय चिरेण सूते शून्यासन शाक्यपुर प्रविष्टे।
जनस्य सान्त पुरमण्डलस्य समुद्ययौ तीव्रविषादनाद ॥ ४६ ॥
महीपति पुत्रवियोगतप्त प्रसुप्तजीव क्षणमोहनिद्राम्।
निद्रामिवासाद्य घनानुबन्धा नि स्पन्दवृत्तिर्न विवेद किंचित् ॥ ४७ ॥
अवाप्तसंज्ञ सुचिरात्तमूचुर्नभश्चरा मुञ्च विचार्य मोहम्।
राजन्सुतस्ते सुगतत्वमाप्त सुरासुरैर्वन्दितपादपद्म ॥ ४८ ॥
तत क्षितीशस्त्रिजगत्प्रसिद्ध ज्ञात्वापि त जैनवने जिनेन्द्रम्।
द्रष्टु ययौ हर्षसुधानिधान सामात्यमित्रस्वजन ससैन्य ॥ ४९ ॥
तदाश्रमोपान्तमहीमवाप्य वन विलोक्य प्रशमाभिरामम्।
शुद्धोदन स्यन्दनपार्श्वसस्थमुदायिन बान्धवमित्युवाच ॥ ५० ॥
क्रव्यादोऽपि न भुञ्जते परतनुद्रोहेण हिंसाशन
क्रूराणामपि वैरवह्निविरहान्न क्रोधदिग्ध मन।
व्यालुम्पन्ति न तु स्वय निपतितादन्यत्फल वानरा
निर्दोषावरण वन भगवत शमो प्रसादादिदम् ॥ ५१ ॥

---

१ 'विकास' क २ शस्त्रास्त्र' स्व ३ 'पुरी' क

अक्षोभनिर्भरजला सरितो वहन्ति
निर्विघ्नवा विरजस सुखयन्ति वाता ।
सध्यानमौनमुनिता दधतीव वृक्षा
निश्चेतनेष्वपि बत प्रसृता प्रशान्ति ॥ ५२ ॥
उक्त्वेति भूपरिवृढ शमसनिधान
प्राप्याश्रमाग्र(ग्र्य)मवरुह्य रथात्प्रहृष्ट ।
दूराद्ददर्श सुरसिद्धनरोरगाणा[2]
रागादिदोषशमने सुगत प्रवृत्तम् ॥ ५३ ॥
भूनिर्गतप्रततकाञ्चनपद्मपृष्ठ-
पद्मासनस्थमविसस्थुलधामधीरम् ।
मेरु सदेहमिव चन्द्रसहस्रकान्ति-
पूरैर्नवामृतचितै कृतरूपकायम् ॥ ५४ ॥
सद्धर्मकायमुपदेशदिशा दिशन्त[3]
ज्ञानार्करश्मिहृतमोहमहान्धकारम् ।
सिंहोन्नतासयुगमुन्नतबाहुनेत्र
बालप्रवालतरुपल्लवलोहितौष्ठम्[4] ॥ ५५ ॥
लावण्यराशिवदन सरलोरुनास
निर्भूषणश्रवणपाशविशेषशोभम् ।
त निर्जितस्मरमुदारगुण प्रणम्य
लेभे प्रतिप्रणतिमानघनप्रमोदम् ॥ ५६ ॥
शक्रादिभि सुरवरैरपि बिम्बसार-
मुख्यैश्च भूमिपतिभिर्गुरुगौरवेण ।
नागैश्च[5] नम्रवदनैरभिनन्द्यमान
शुद्धोदन कनकविष्टरमाससाद[6] ॥ ५७ ॥

---

१ निझर' ख-ग २ 'महोरगाणां' क ३ 'दिगन्त' ख ४ 'लोहिताग्रम्' ख ५ 'गिरि' ख ६ 'नम्रश्च' ख-ग

आनन्दबन्धुमवलोक्य तथागतेन्दु
चित्तप्रसादमसम समवाप्य भूप ।
त प्राप्य हर्षसहजाश्रुनिरुद्धदृष्टि-
स्तद्दर्शनामृतरसे सुतरामतृप्त ॥ ५८ ॥
देव प्रकामकरुणार्द्रदृशा सहर्ष-
नि शेषदोषरहिता विहितौ त्रिलोकी ।
कस्मादहो निजजनस्य कृतस्त्वयाय
समोहकृद्विरहशोकदशोपदेश ॥ ५९ ॥
नीत्वा क्षपा स्फटिकहर्म्यतले सुखेन
शय्यासु चीनवसनद्युतिसस्मितासु ।
शेषे कथ हरिणसंहतिदन्तदष्ट
शिष्टार्धशष्पपरुषासु वनस्थलीषु ॥ ६० ॥
तच्चन्द्रकान्ति मणिशुक्तिषु सैक्तशैत्य
पीत्वा पय कथमहो पिबसि त्वमद्य ।
ग्रीष्मोष्ममूढमहिषद्विरदावगाह-
क्षिप्तत्करीषकलुषोदरतिक्तमम्भ ॥ ६१ ॥
कस्मादेष विहारतामुपगत कण्ठ कठोरेण किं
सवीत मृगचर्मणानिलचलच्चीनांशुकार्हं वपु ।
किं ते रत्नकिरीटधाम्नि च जटाजूटो निबद्धादर
क्रूरक्लेशसखी सुखेषु विमुखी केनोपदिष्टा स्थिति ॥ ६२ ॥
इत्यार्जवाज्जनपतौ जनकाभिमाना-
त्पुत्रोचित सदसि रागमय ब्रुवाणे ।
स्नेहोपलिप्तरजसा मलिनस्वभाव
त तापसभवभिषग्भगवान्बभाषे ॥ ६३ ॥

---

१ 'देव' ख ग २ 'सकला' क ३ 'स्वच्छशीत' ख-ग ४ 'चीनांशुक ते वपु' ख-ग ५ 'जटाजूटेन बद्धो भर' क ६ 'जनकाभिधानत्' ख-ग ७ 'तद्दो षसभव' ख ग

किं जीवावधिबन्धनैर्गुणगणैनाराधितैर्बन्धुभि-
र्ये यान्त्यन्त्यदिने क्षणाश्रुपतनप्रत्यायनापात्रताम् ।
सद्धर्माधिगम क्रियाव्युपरम सत्सगम सयम
पर्यन्तेऽप्यचला विरक्तमनसामेते सता बान्धवा ॥ ६४ ॥
आकृष्याटविकै परैरपहृता सामन्तसीमान्तभू-
रीर्ष्यार्ता मरणोद्यता प्रियतमा मुख्यस्तुरङ्गो मृत ।
मन्त्री द्रोहसमुद्यतोऽतिबलवानित्यात्तचिन्ताशतै-
र्भूपाल किल कोमलेऽपि शयने निद्रादरिद्र सदा ॥ ६५ ॥
आशापाशनिवेशबन्धनपृथुग्रन्थिव्यथावर्जित
स्तृष्णातापनिवृत्तिशीतलतनुर्मानावमानोज्झित ।
रागद्वेषविषप्रशान्तिसुखितश्चिन्ताविहीने वने
पाषाणे घनदर्भसूचिनिचिते शेते सुख निर्वृत ॥ ६६ ॥
भोगी नित्यमजीर्णभोजनरुजा जिह्वा सदा दर्शय-
न्वैद्य पृच्छति तद्भयादभिमत नाश्नाति तृष्णातुर ।
भुक्त्वा स्वल्पकर्मप्रयत्नपतित मूल फल वा जल
पीत्वा जातु रुज जनेश भजते काचिन्न निष्किञ्चन ॥ ६७ ॥
शय्यास्तानतुलूपेशलतला सा हेमहर्म्यस्थिति-
स्ता केयूरकिरीटहारररचनास्ते कुञ्जरास्ते हया ।
भोगास्तेऽभिमता न कस्य सुखदा किं त्वक्षिपक्ष्माञ्चल
च्छेदे सर्वमनन्त्य(गण्य)मन्यवशग दृश्य न किंचित्कचित् ॥६८॥
ग्रीष्मे हारतुषारचन्दनचयश्चीनाशुक चन्द्रिका
शीते राङ्कवकुङ्कुमाङ्कतरुणीपीनस्तनालिङ्गनम् ।
रात्रौ वेणुरवोग्रवाररमणीगीत दिने सत्सभा
यस्यैतत्क्रियते स कस्य नृपते काय कृतघ्न स्थिर ॥ ६९ ॥

---

१ गणै' ख ग २ 'आकृष्याटविकै परैरपहृता सा सा न' क ३ 'अल्पयत्नप तित' क ४ 'जातु रुज जनो न भजते किंचिन्न' ख ग ५ 'भार' ख ग ६ 'सर्व-गमन्यगण्यवशग' ग ७ 'तेऽमी' ख-ग ८ रवाग्ररावरमणी' क

नैराश्ये शमशीतचित्तसुखिना नान्दन चन्दन
कारुण्याभरणाभिरामहृदये हारेण भारेण किम् ।
रत्नालकरणादिक गुरुगिरामाकर्णन कर्णयो-
र्नेष्ट शीलदुकूलशीलनवता चित्राम्बराडम्बरम् ॥ ७० ॥
राजन्सत्यज मोहदुर्ग्रहमिम स्नेहव्यथा मा कृथा
ससारस्य विचारय प्रचलता मा मज्ज जन्माम्बुधौ ।
नित्यापूर्वजनोद्भवे भवपथे प्रस्थानपान्थश्रम-
क्षिप्रालापसमागमप्रणयिना को बान्धव क पर ॥ ७१ ॥
इत्युक्त्वा भगवान्नृपस्य विदधे प्रावोधिनी बोधना
दीप्तज्ञाननिशातवज्रशिखया कायाभिमानाभिधम् ।
भित्त्वा विंशतितुङ्गशृङ्गगहन स्थूलाचल याकरो
त्ससारावरणप्रहाणकलनावैमल्यलीन मन ॥ ७२ ॥
शाक्यानामथ तत्र मैत्रमनसा सप्ताधिका कोटय
सप्त प्राप्तविवेकपूर्वकुशलाश्चित्तप्रसादात्परम् ।
स्रोत प्राप्तसकृत्समागमफलान्यौगामिकार्हत्पदा-
न्यापु सर्वजनाशयक्षयधिया सर्वज्ञसदर्शनात् ॥ ७३ ॥
अथ स भगवान्कृत्वा सर्वं जगज्जिनभास्कर-
स्तिमिररहित ज्ञानालोकै क्रमाद्गुणिबान्धव ।
जनकरुणया सद्धर्माख्य निधाय पर वपु-
स्तरणशरण ससाराब्धावभूत्पुनरच्युत ॥ ७४ ॥

इति श्रीव्यासदासापराख्यक्षेमेन्द्रविरचिते दशावतारचरिते बुद्धावतारो नवम ।

---

७ कर्क्यवतारो दशम ।

अथ स्व वैष्णव धाम गते सुगतभास्वति ।
कलौ प्रबलता याते तमसीव सुदु सहे ॥ १ ॥

---

१ नीलदुगूल ख ग २ जनूद्भवे' क ३ 'प्रावेविकीं ख ग ४ काया मिधाना' ख ग ५ 'न्यागामिका तत्पदा' ख ग ६ 'जनाश्रम' क ७ 'विधाय ख-ग

मर्त्यभूमिं परित्यज्य सदाचारविवर्जिताम् ।
जग्मु कलापिग्रामाख्य दिव्यदेश महर्षय ॥ २ ॥
अवदन्मुनयस्तत्र मार्कण्डेय चिरायुषम् ।
भगवन्कलिकालोऽय कलुष प्रत्युपस्थित ॥ ३ ॥
अतोऽपि कीदृक्पर्यन्ते मलिनत्व प्रयास्यति ।
जानीमहि(हे) नहि मही भारार्ता किं करिष्यति ॥ ४ ॥
विप्रा मद्यघृतक्षीरलाक्षालवणविक्रयै ।
जीवन्ति प्रेष्यनिरता निराचारा निरम्रय ॥ ५ ॥
अश्रोत्रिया क्रियाहीना श्रुतिस्मृतिविवर्जिता ।
विप्रा सुखेन मोक्षास्यै याता पाषण्डिशिष्यताम् ॥ ६ ॥
वृषलीपतय प्राप्ता क्रीडाहासकता द्विजा ।
नृत्तगीतकलाजालशिल्पिचारणवृत्तय ॥ ७ ॥
क्रोधलोभपरा क्रूरास्तमोमूढा द्विजातय ।
त्यजन्ति जीवित रज्जुविषशस्त्रानलाश्मभि ॥ ८ ॥
अक्षत्रिया क्षिति सर्वा क्षत्रसज्ञा क्षितीश्वरा ।
ये रक्षितार पौराणा ते प्राणधनहारिण ॥ ९ ॥
प्रजोपतापशापोष्णै पापाप्तैर्भूभुजा धनै ।
जलै सलवणै पीतैरिव तृष्णा प्रवर्धते ॥ १० ॥
कृपणाक्रन्दबधिरा मदान्धा न्यायमौनिनै ।
भूपाला कुब्जहृदया लोकपीडारता सदा ॥ ११ ॥
अलक्ष्य भक्षयन्त्येव क्षितीशानां दिवानिशम् ।
समुद्र कोषमखिल कायस्था वडवाग्नय ॥ १२ ॥
गायनक्षपिता लक्ष्मीर्दस्युनिर्दलिता दिश ।
कायस्थदु स्था पृथिवी राज्ञामज्ञावृता सभा ॥ १३ ॥

---

१ 'वसु' ख ग २ 'प्रवर्तते' क ३ 'मानिन' ख ग ४ 'कुब्जत्रतय शत्रुस-ङ्घामपुन्नवा' क, 'कुब्जहृदया ' ग ५ एतत्पूर्वार्ध ख ग पुस्तकयोस्त्रुटितम्

मन्त्रिसेनापतिद्वा स्वसभापतिपुरोहितै ।
[1]उत्कोचद्रविणोत्तानपाणिभि क्षपिता प्रजा ॥ १४ ॥
[2]वैश्यस्य क्रौर्यवक्रत्वकार्कश्यै ककचोपमा ।
सरलच्छेदिनो वैश्या वैरस्मरणतत्परा ॥ १५ ॥
निर्मार्ल्यमलिना जातिं वर्जयन्ति शनै शनै ।
[3][4]वैश्या विप्रविवाहेन ब्राह्मण्याभिनिवेशिन ॥ १६ ॥
दृश्यते सरल शङ्खे फणी च विषवर्जित ।
कृतान्त करुणार्तो वा न तु वैश्य कदाचन ॥ १७ ॥
जीर्य्यते कालकूटेन जीव्यते खदिराग्निना ।
जीव्यते संनिपातेन न तु वैश्येन वैरिणा ॥ १८ ॥
निशिता सविषा वैश्या रोषनिर्घर्षधूमिन ।
दृश्यन्ते कलिकालस्य कठिना दशना इव ॥ १९ ॥
शूद्रा क्षत्रियतां याता वैश्यतामपरे श्रिता ।
[5]विप्रांहीं गुरुतामन्ये होतारो ब्रह्मवादिन ॥ २० ॥
श्राद्धेषु शूद्रा शूद्राणां भुञ्जते गुरुतापसा ।
ब्रह्मस्वदारहरणे प्रवृत्ताश्च महीभुज ॥ २१ ॥
शूद्रस्य ब्राह्मणो दास शिष्यश्च चरणच्युत ।
भूमिश्च ब्रह्मदेयाख्या प्रवृत्तमधरोत्तरम् ॥ २२ ॥
इत्येष चातुर्वर्ण्यस्य जात कलिविपर्यय ।
प्रतिलोमेन दृश्यन्ते प्रजाना वर्णसंकरा ॥ २३ ॥
ब्रह्मचर्यमतिक्रान्त [6]गृहिणो वेश्ययोषित ।
[7]वानप्रस्थस्थितिर्नास्ति यतीना सयति कुत ॥ २४ ॥
उक्त स्वय भगवता गिरिशेन शास्त्र
यद्वेदविद्भिरधिगम्यर्मशेषविद्यै ।

---

१ 'तत्कोश' ख ग २ 'वैश्यस्य' ख ग ३ एतदुत्तरार्धं ख ग पुस्तकयोस्त्रुटितम् ४ ख ग पुस्तकयो सर्वत्र 'जीवते' इति पाठ ५ 'विप्राहंगुरुता' ख-ग ६ 'गृहिणा शेषयोषित' ख ग ७ 'वानप्रस्थातिथि' ख-ग ८ 'अधीतवेदै' ख